


मूर्ध्नि ८ ॥ इति सिद्धिन्यासः ॥ ॐ क्लीं उर्वश्यप्सरःकन्यकायै नमो मूर्ध्नि १ । ॐ क्लीं मेनकाप्सरःकन्यकायै नमो ललाटे २ । ॐ क्लीं रंभाप्सरःकन्यकायै नमो दक्षनेत्रे ३ । ॐ क्लीं घृताच्यप्सरःकन्यकायै नमो वामनेत्रे ४ । ॐ क्लीं पुंजिकस्थल्यप्सरःकन्यकायै नमो वक्त्रे ५ । ॐ क्लीं सुकेश्यप्सरःकन्यकायै नमो दक्षकर्णे ६ । ॐ क्लीं मंजुघोषाप्सरःकन्यकायै नमो वामकर्णे ७ । ॐ क्लीं महारंगवत्यप्सरःकन्यकायै नमः ककुदि ८ ॥ इत्यप्सरोन्यासः ॥ ॐ क्लीं यक्षकन्यकायै नमो दक्षांसे १ । क्लीं गंधर्वकन्यकायै नमो वामांसे २ । क्लीं सिद्धकन्यकायै नमो हृदि ३ । क्लीं नरकन्यकायै नमो दक्षस्तने ४ । क्लीं नागकन्यकायै नमो वामस्तने ५ । क्लीं विद्याधरकन्यकायै नमो जठरे ६ । क्लीं किंपुरुषकन्यकायै नमो गुह्ये ७ । क्लीं पिशाचकन्यकायै नमः आधारे ८ ॥ इत्यष्टकन्यान्यासः ॥ ॐ अँ नमः दक्षिणबाहुमूले १ । ॐ नं नमः दक्षिणकूर्परे २ । ॐ मं नमः दक्षिणमणिबंधे ३ । ॐ उं नमः दक्षहस्तांगुलिमूले ४ । ॐ च्छिं नमः दक्षहस्तांगुल्यग्रे ५ । ॐ ष्टं नमः वामबाहुमूले ६ । ॐ चां नमः वामकूर्परे ७ । ॐ डां नमः वाममणिबंधे ८ । ॐ लिं नमः वामहस्तांगुलिमले ९ । ॐ मां नमः वामहस्तांगुल्यग्रे १० । ॐ तं नमः दक्षपादमूले ११ । ॐ गिं नमः दक्षजानुनि १२ । ॐ सं नमः दक्षगुल्फे १३ । ॐ व नमः दक्षपादांगलिमले १४ । ॐ वं नमः दक्षपादांगुल्यग्रे १५ । ॐ शं नमः वामपादमूले १६ । ॐ कं नमः वामजानुनि १७ । ॐ रिं नमः वामगुल्फे १८ । ॐ स्वां नमः वामपादांगुलिमूले १९ । ॐ हां नमः वामपादांगुल्यग्रे २० । इति मंत्रवर्णन्यासः ॥ एवं न्यासं कृत्वा सुवर्णवर्णांतरीपं द्वीपं तत्र यद्रत्नमंदिरं तन्मध्यगे सिंहासने स्थितां ध्यायेत् ॥ अथ ध्यानम्—ॐ माणिक्याभरणान्वितां स्मितमुखीं नीलोत्पलाभां वरां रम्यालक्तकलिप्तपादकमलां नेत्रत्रयोल्लासिनीम् ॥ वीणावादनतत्परां सुरनतां कीरच्छदश्यामलां मातंगीं शशिशेखरामनुभजेत्तांबूलपूर्णाननाम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूजयेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत् । तद्यथा—पूर्वाद्यष्टदिक्षु ॐ भूत्यै लघुश्यामायै नमः १ । ॐ उन्नत्यै लघुश्यामायै नमः २ । ॐ कान्त्यै

लघुश्यामायै नमः ३ । ॐ सृष्ट्यै लघुश्यामायै नमः ४ । ॐ कीर्त्यै लघुश्यामायै नमः ५ । ॐ सन्नत्यै लघुश्यामायै नमः ६ । ॐ व्युष्ट्यै लघुश्यामायै नमः ७ । ॐ उत्कृष्ट्यै लघुश्यामायै नमः ८ । मध्ये ॐ ऋद्ध्यै लघुश्यामायै नमः ९ ॥ इति पीठशक्तीः पूजयेत् ॥ ततः स्वर्णादिपत्रे त्रिकोणपंचकोणाष्टदलषोडशपत्रे भूपुरं लिखित्वा तत्ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संप्रोञ्छ्य 'ॐ ह्रीं' सर्वशक्तिकमलासनाय नमः इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुन र्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य । ऐं शुकप्रियायै विद्महे क्लीं कामेश्वरि धीमहि । तन्नः श्यामा प्रचोदयात् ॥ इति गायत्रीमंत्रेण यागवस्तूनि संप्रोक्ष्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् । तद्यथा–पुष्पांजलिमादाय ॐ संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि देवेशि परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं दद्यात् । इत्याज्ञां गृहीत्वा त्रिकोणे देव्यग्रे ॐ ऐं रत्यै नमः । रतिश्रीपादुकां पूजयामि तर्पयामि नमः । इति सर्वत्र १ । देवीदक्षिणतः । ॐ ह्रीं प्रीत्यै नमः । प्रीतिश्रीपा० २ । देवीवामे । ॐ क्लीं मनोभवायै नमः । मनोभवाश्रीपा० ३ । इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति प्रथमावरणम् ॥ १ ॥ तस्योपरि त्रिकोणे देव्यग्रे ॐ । ऐं इच्छाशक्त्यै नमः । इच्छाशक्तिश्रीपा० १ । देवीदक्षिणतः ॐ ह्रीं ज्ञानशक्त्यै नमः । ज्ञानशक्तिश्रीपा० २ । देवीवामे ॐ क्लीं क्रियाशक्त्यै नमः । क्रियाशक्तिश्रीपा० ३ ॥ इति पूजयेत् । ततः पुष्पांजलिमादाय मूल मुच्चार्य्य अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्यबिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततः पंचकोणेषु आग्नेय्यादिक्रमेण ॐ द्रावण बाणाय नमः । द्रावणबाणश्रीपा० १ । द्रीं शोषणबाणाय नमः । शोषणबाणश्रीपा० २ । क्लीं तापनबाणाय नमः । तापनबाणश्रीपा० ३ । ब्लूं मोहनबाणाय नमः । मोहनबाणश्रीपा० ४ । सः उन्मादनबाणाय नमः । उन्मादनबाणश्रीपा० ५ । इति बाणान् संपूज्य पुष्पां

१ एषोदिता तु मातंगीगायत्री सर्वार्थसिद्धिदा ॥ अनया यागवस्तूनि प्रोक्षेत्तस्याः समर्चने ॥

जालिं दद्यात्॥ इति तृतीयावरणम् ॥३॥ ततः पंचकोणाग्रे आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च। ऐं नमः हृदयाय नमः। हृदयश्रीपा० १। उच्छिष्ट शिरसे स्वाहा। शिरःश्रीपा० २। चांडायिशी लाखौ वषट् । शिखाश्रीपा० ३ । मातंगि कवचाये हुम् । कवचश्रीपा० ४ । सर्ववशंकारि नेत्रत्रयाय वौषट्। नेत्रत्रयश्रीपा० ५ । स्वाहास्त्राय फट्। अस्त्रश्रीपा० ६ ॥ इति षडंगानि पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततोऽष्टदल पूज्यपजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण। आं क्षां ब्राह्मी कन्यकायै नमः। ब्राह्मीकन्यकाश्रीपा० १। ईं लां माहेश्वरीकन्यकायै नमः। माहेश्वरीकन्यकाश्रीपा० २ । ऊं हां कौमारीकन्यकायै नमः। कौमारीकन्यकाश्रीपा० ३। ॠं सां वैष्णवकिन्यकायै नमः। वैष्णवीकन्यकाश्रीपा० ४ । ॡं षां वाराहीकन्यकायै नमः। वाराहीकन्यकाश्रीपा० ५। ऐं शां इन्द्राणीकन्यकायै नमः। इन्द्राणीकन्यकाश्रीपा० ६ । औं वां चामुंडाकन्यकायै नमः। चामुंडा कन्यकाश्रीपा० ७ । अः लां महालक्ष्मीकन्यकायै नमः। महालक्ष्मीकन्यकाश्रीपा० ८ ॥ इति संपूज्य पुष्पांजलिं दद्यात्। इति पंचमावरणम् ॥ ५ ॥ ततोऽष्टदलाग्रेषु तत्तत्समीपे। ॐ ऐं अणिमासिद्धिकन्यकायै नमः। अणिमासिद्धिकन्यकाश्रीपा० १। ॐ ऐं महिमासिद्धिकन्यकायै नमः। महिमासिद्धिकन्यकाश्रीपा० २। ॐ ऐं लघिमासिद्धिकन्यकायै नमः। लघिमासिद्धिकन्यकाश्रीपा० ३ । ॐ ऐं गरिमासिद्धिकन्यकायै नमः। गरिमासिद्धिकन्यकाश्रीपा० ४। ॐ ऐं ईशितासिद्धिकन्यकायै नमः। ईशितासिद्धिकन्यकाश्रीपा० ५ । ॐ ऐं वशितासिद्धिकन्यकाय नमः। वशितासिद्धिकन्यकाश्रीपा० ६ । ॐ ऐं प्राकाम्यसिद्धिकन्यकायै नमः। प्रकाम्यासिद्धिकन्यकाश्रीपा० ७। ॐ ऐं प्राप्तिसिद्धिकन्यकायै नमः। प्राप्तिसिद्धिकन्यकाश्रीपा० ८॥ इति संपूज्य पुष्पांजलिं दद्यात् ॥ इति षष्ठावरणम् ॥ ६ ॥ ततः षोडशदलेषु प्राचीक्रमेण। ॐ क्लीं उर्वश्यप्सरःकन्यकायै नमः। उर्वश्यप्सरःकन्यकाश्रीपा० १। ॐ क्लीं मेनकाप्सरःकन्यकायै नमः। मेनकाप्सरःकन्यकाश्रीपा० २। ॐ क्लीं रंभाप्सरःकन्यकायै नमः। रंभाप्सरःकन्यकाश्रीपा० ३। ॐ क्लीं घृताच्यप्सरःकन्यकायै नमः। घृताच्यप्सरःकन्यकाश्रीपा० ४। ॐ क्लीं पुंजिकस्थल्यप्सरःकन्यकायै नमः। पुंजिकस्थल्य


प्सरःकन्यकाश्रीपा० ५ । ॐ क्लीं सुकेश्यप्सरःकन्यकायै नमः । सुकेश्यप्सरःकन्यकाश्रीपा० ६ । ॐ क्लीं मंजुघोषाप्सरःकन्यकायै नमः । मंजुघोषाप्सरःकन्यकाश्रीपा० । ७ । ॐ क्लीं महारंगवत्यप्सरःकन्यकायै नमः । महारंगवत्यप्सरःकन्यकाश्रीपा० ८ । ॐ क्लीं यक्षकन्यकायै नमः । यक्षकन्यकाश्रीपा० ९ । ॐ क्लीं गंधर्वकन्यकाय नमः । गंधर्वकन्यकाश्रीपा० १० । ॐ क्लीं सिद्धकन्यकायै नमः । सिद्धकन्यकाश्रीपा० ११ । ॐ क्लीं नरकन्यकायै नमः । नरकान्यकाश्रीपा० १२ । ॐ क्लीं नागकन्यकायै नमः।नागकन्यकाश्रीपा० १३ । ॐ क्लीं विद्याधरकन्यकायै नमः । विद्याधरकन्यकाश्रीपा० १४ । ॐ क्लीं किंपुरुषकन्यकायै नमः । किंपुरुषकन्यकाश्रीपा० १५ । ॐ क्लीं पिशाचकन्यकायै नमः । पिशाचकन्यकाश्रीपा० १६ । इति संपूज्य पुष्पांजलिं दद्यात् ॥ इति सप्तमावरणम् ॥ ७ ॥ ततो भूपुराभ्यंतरे प्राच्यां दिशि । ॐ गजाननायै योगिन्यै नमः । गजाननायोगिनीश्रीपा० १ । ॐ सिंहमुख्यै योगिन्यै नमः । सिंहमुखीयोगिनीश्रीपा० २ । ॐ गृध्रास्यायै योगिन्यै नमः । गृध्रास्यायोगिनीश्रीपा० ३ । ॐ काकतुंडिकायै योगिन्यै नमः । काकतुंडिकायोगिनीश्रीपा० ४ । ॐ उष्ट्रग्रीवायै योगिन्यै नमः । उष्ट्रग्रीवायोगिनीश्रीपा० ५ । ॐ हयग्रीवायै योगिन्यै नमः । हयग्रीवायोगिनीश्रीपा० ६ । ॐ वाराह्यै योगिन्यै नमः । वाराहायीागेनेश्रिापी० ७ । ॐ शरभाननायै योगिन्यै नमः । शरभाननायोगिनीश्रीपा० ८ । ॐ उलूकिकाय योगिन्यै नमः । उलूकिकायोगिनीश्रीपा० ९ । ॐ शिवारावायै योगिन्यै नमः । शिवारावायोगिनीश्रीपा० १० । ॐ मयूर्य्यै योगिन्यै नमः । मयुरीयोगिनीश्रीपा० ११ । विकटाननायै योगिन्यै नमः । विकटाननायोगिनीश्रीपा० १२ । ॐ अष्टवक्रायै योगिन्यै नमः । अष्टवक्रायोगिनीश्रीपा० १३ । ॐ कोटराक्ष्यै योगिन्यै नमः । कोटराक्षीयोगिनीश्रीपा० १४ । ॐ कुब्जिकायै योगिन्य नमः । कुब्जिकायोगिनीश्रीपा० १५ । ॐ विकटलोचनायै योगिन्यै नमः । विकटलोचनायोगिनीश्रीपा० १६ ॥ इति षोडशयोगिनीः पूजयेत् ॥ ततो दक्षिणे । ॐ शुष्कोदर्य्यै योगिन्यै नमः । शुष्कोदरीयोगिनीश्रीपा० १ । ॐ ललज्जिह्वायै योगिन्यै नमः । ललज्जिह्वायोगिनीश्रीपा० २ । ॐ अश्वदंष्ट्रायोगिन्यै नमः । अश्वदंष्ट्रायोगिनीश्रीपा० ३ । ॐ वानराननायै योगिन्यै नमः ।


वानराननायोगिनीश्रीपा० ४ । ॐ ऋक्षाक्ष्यै योगिन्यै नमः । ऋक्षाक्षीयोगिनीश्रीपा० ५ । ॐ केकराक्ष्यै योगिन्यै नमः । केकराक्षी
योगिनीश्रीपा० ६ । ॐ बृहत्तुंडायै योगिन्यै नमः । बृहत्तुंडायोगिनीश्रीपा० ७ । ॐ सुराप्रियायै योगिन्यै नमः । सुराप्रियायोगिनी
श्रीपा० ८ । ॐ कपालहस्तायै योगिन्यै नमः । कपालहस्तायोगिनीश्रीपा० ९ । ॐ रक्ताक्ष्यै योगिन्यै नमः । रक्ताक्षीयोगिनीश्रीपा०
१० । ॐ शुक्यै योगिन्यै नमः । शुकीयोगिनीश्रीपा० ११ । ॐ श्येन्यै योगिन्यै नमः । श्येनीयोगिनीश्रीपा० १२ । ॐ कपोति
कायै योगिन्यै नमः । कपोतिकायोगिनीश्रीपा० १३ । ॐ पाशहस्तायै योगिन्यै नमः । पाशहस्तायोगिनीश्रीपा० १४ । ॐ दंड
हस्तायै योगिन्यै नमः । दंडहस्तायोगिनीश्रीपा० १५ । ॐ प्रचंडायै योगिन्यै नमः । प्रचंडायोगिनीश्रीपा० १६ ॥ इति षोडश
योगिनीः पूजयेत् ॥ ततः पश्चिमद्वारे ॐ चंडविक्रमायै योगिन्यै नमः । चंडविक्रमायोगिनीश्रीपा० १ । ॐ शिशुघ्न्यै योगिन्यै नमः ।
शिशुघ्नीयोगिनीश्रीपा० २ । ॐ पापहंत्र्यै योगिन्यै नमः । पापहंत्रीयोगिनीश्रीपा० ३ । ॐ काल्यै योगिन्यै नमः । कालीयोगिनी
श्रीपा० ४ । ॐ रुधिरपायिन्यै योगिन्यै नमः । रुधिरपायिनीयोगिनीश्रीपा० ५ । ॐ वसाधयायै योगिन्यै नमः । वसाधयायोगिनीश्रीपा०
६ । ॐ गर्भभक्षाय योगिन्यै नमः । गर्भभक्षायोगिनीश्रीपा० ७ । ॐ शवहस्तायै योगिन्यै नमः । शवहस्तायोगिनीश्रीपा० ८ । ॐ
अंत्रमालिन्यै योगिन्यै नमः । अंत्रमालिनीयोगिनीश्रीपा० ९ । स्थूलकेशिन्यै योगिन्यै नमः । स्थूलकेशिनीयोगिनीश्रीपा० १० ।
ॐ बृहत्कुक्ष्यै योगिन्यै नमः । बृहत्कुक्षियोगिनीश्रीपा० ११ । ॐ सर्पास्यायै योगिन्यै नमः । सर्पास्यायोगिनीश्रीपा० १२ । ॐ प्रेत
वाहनायै योगिन्यै नमः । प्रेतवाहनायोगिनीश्रीपा० १३ । ॐ दंदशूककरायै योगिन्यै नमः । दंदशूककरायोगिनीश्रीपा० १४ । ॐ
क्रौंच्य योगिन्यै नमः । क्रौंचीयोगिनीश्रीपा० १५ । ॐ मृगशीर्षायै योगिन्यै नमः । मृगशीर्षायोगिनीश्रीपा० १६ ॥ इति षोडश
योगिनीः पूजयेत् ॥ तत उत्तरद्वारे । ॐ वृषाननायै योगिन्यै नमः । वृषाननायोगिनीश्रीपा० १ । ॐ वृत्तास्यायै योगिन्यै नमः । वृत्तास्या
योगिनीश्रीपा० २ । ॐ धूमनिःश्वासायै योगिन्यै नमः । धूमनिःश्वासायोगिनीश्रीपा० ३ । ॐ व्योमैकचरणायै योगिन्यै नमः ।

व्योमैकचरणायोगिनीश्रीपा० ४। ॐ ऊर्ध्वदृशे योगिन्यै नमः। ऊर्ध्वदृग्योगिनीश्रीपा० ५। ॐ तापिन्यै योगिन्यै नमः। तापिनीयोगिनीश्रीपा० ६ । ॐ शोषिण्यै योगिन्यै नमः । शोषिणीयोगिनीश्रीपा० ७ । ॐ दृष्ट्यै योगिन्यै नमः । दृष्टियोगिनीश्रीपा० ८। ॐ कोटरायै योगिन्यै नमः। कोटरायोगिनीश्रीपा० ९ । ॐ स्थूलनासिकायै योगिन्यै नमः। स्थूलनासिकायोगिनीश्रीपा० १० । ॐ विद्युत्प्रभायै योगिन्यै नमः । विद्युत्प्रभायोगिनीश्रीपा० ११ । ॐ बलाकास्यायै योगिन्यै नमः । बलाकास्या योगिनीश्रीपा० १२ । ॐ मार्ज्जार्य्यै योगिन्यै नमः। मार्ज्जारीयोगिनीश्रीपादुकां पूजया० १३ । ॐ कटपूतनायै योगिन्यै नमः । कटपूतनायोगिनीश्रीपा० १४ । ॐ अट्टाट्टहासायै योगिन्यै नमः । अट्टाट्टहासायोगिनीश्रीपा० १५ । ॐ कामाक्ष्यै योगिन्यै नमः । कामाक्षीयोगिनीश्रीपा० १६ । इति षोडश योगिनीः पूजयेत् ॥ इति चतुःषष्टियोगिनीः पूजयित्वा पुष्पांजलिं दद्यात् ॥ इत्यष्टमावरणम् ॥ ८ ॥ ततो भूपुराभ्यंतरे अग्निकोणे ॐ बं बटुकाय नमः । बटुकश्रीपा० १ । नैर्ऋत्यकोणे ॐ गं गणतपये नमः। गणपतिश्रीपा० २ । वायुकोणे ॐ क्षं क्षेत्रपालाय नमः । क्षेत्रपालश्रीपा० ३ । ईशानकोणे ॐ दुं दुर्गायै नमः । दुर्गाश्रीपा० ४ । इति पजयित्वा पुष्पांजलिं दद्यात् ॥ इति नवमावरणम् ९ ॥ ॥ ततो दशमावरणे भूपुराद्बहिः पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् पजयित्वा पुष्पांजलिं दद्यात् ॥ १० ॥ एकादशावरणे इन्द्रादिसमीपे वज्राद्यस्त्राणि पूजयित्वा पुष्पांजलिं दद्यात् ॥११॥ तद्बहिः पर्वादिचतुर्दिक्षु । ॐ तत्तत्संज्ञवाद्येभ्यो नमः। तत्तत्संज्ञवाद्यश्रीपा० १ । ॐ विततवाद्याय नमः। विततवाद्यश्रीपा० २ । ॐ घनवाद्याय नमः। घनवाद्यश्रीपा० ३ । ॐ सुषिराभिधवाद्याय नमः। सुषिराभिधवाद्यश्रीपा० ४ ॥ इति चतुर्वाद्यानि पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वादशावरणम् ॥ १२ ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांत संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरण मेकलक्षजपः। मधूकपुष्पैः समिद्भिर्वा दशांशतो होमः। तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्य्यात् ॥ एवं कृते मंत्रः सिद्धो

१ नश्यंति भूतशाकिन्य आसां नामश्रुतेरपि ॥

सुमुखीपूजनयन्त्रम् ।




३४
४४
३९
४९

भवति। सिद्धे मंत्रे मंत्री मातंगीमंत्रोक्तप्रयोगान् साधयेत् ॥ तथाच—लक्षं जपेन्मधूकोत्थैर्जुहुयादयुतं शुभैः ॥ द्वादशावरणैरेवं लघु श्यामां यजेत्तु यः ॥ सर्वासां संपदां पात्रमचिराजायते स ना ॥ १ ॥ राजानो राजपुत्राश्च सुदृशो मदमंथराः ॥ दासा मनोवचःकायै र्भवंत्यस्या उपासितुः ॥ २ ॥ शाकिनीप्रेतभूताश्च धर्षितुं तन्न शक्नुयुः ॥ भूरिणा किमिहोक्तेन देवीयमखिलेष्टदा ॥ ३ ॥ यन्मंत्रस्मरणा देव नरो देवोपमो भवेत् ॥ देव्या उपासकैः पुंभिः स्त्रियो निंद्या न जातुचित् ॥ ४ ॥ देवीवन्माननीयास्ता मनोऽभीष्टमभीप्सुभिः ॥ मातंगीमंत्रसंप्रोक्ताः प्रयोगा अत्र कीर्तिताः ॥ ५ ॥ इति विंशत्यक्षरलघुश्यामामंत्रप्रयोगः ॥ अथ मातङ्गीदशाक्षरमंत्रप्रयोगः ॥ तंत्रसारे मंत्रो यथा—ॐ ह्रीं क्लीं हूं मातंग्यै फट् स्वाहा ॥ इति दशाक्षरो मंत्रः॥अस्य विधानम्। अस्य मंत्रस्य दक्षिणामूर्तिर्ऋषिः। विराट् छन्दः। मातङ्गी देवता। ह्रीं बीजम्। हूं शक्तिः। क्लीं कीलकम्। सर्वेष्टसिद्धये जपे विनियोगः ॥ ॐ दक्षिणामूर्तिऋषये नमः शिरसि १। विराट्छंदसे नमः मुखे २। मातङ्गीदेवतायै नमो हृदि ३। ह्रींबीजाय नमो गुह्ये ४। हूंशक्तये नमः पादयोः ५। क्लीं कीलकाय नमः नाभौ ६। विनियोगाय नमः सर्वाङ्गे ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यां नमः १। ॐ ह्रीं तर्जनीभ्यां नमः २। ॐ ह्रूं मध्यमाभ्यां नमः ३। ॐ ह्रैं अनामिकाभ्यां नमः ४। ॐ ह्रौं कनिष्ठिकाभ्यां नमः ५। ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ एवमेव हृदयादिषडंगन्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ श्यामाङ्गीं शशिशेखरां त्रिनयनां वेदैः करैर्बिभ्रतीं पाशं खेटमथांकुशं दृढमसिं नाशाय भक्तद्विषाम् ॥ रत्नालंकरणप्रभोज्ज्वलतनुं भास्वत्किरीटां शुभां मातङ्गीं मनसा स्मरामि सदयां सर्वार्थसिद्धिप्रदाम् ॥ १ ॥ इति ध्यायेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांत पीठदेवताभ्यो नमः' इति संपूज्य पर्वोक्तनवपीठशक्तीः पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रमग्न्युत्तारणपूर्वकम् 'ॐ ह्रीं सर्वशक्तिकमलासनाय नमः' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य पुनर्ध्यात्वा आवाहनादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात्। तद्यथा—अष्टदलेषु प्राचीक्रमेण। ॐ १ रत्यै नमः। ॐ प्रीत्यै नमः २। ॐ मनोभवायै नमः ३। ॐ क्रियायै नमः ४। ॐ शुद्धायै

नमः ५। ॐ अनंगकुसुमायै नमः ६। ॐ अनंगमदनायै नमः ७। ॐ मदनालसायै नमः ८। इत्यष्टौ शक्तीः पूजयेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततो भूपुरे इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य पायसशर्करानैवेद्यं च दत्त्वा जपं कुर्यात् ॥ अस्य पुरश्चरणं प्रतिदिनं षट्सहस्रं जपेत् ॥ तथा च–पुरश्चरणकाले तु षट्सहस्रं मनुं जपेत् ॥ तद्दशांशं हुनेदाज्यैः शर्करामधुभिः सह ॥ १ ॥ ब्रह्मवृक्षोद्भवैः काष्ठैः साधकः शक्तिभिः सह ॥ एवं पुरस्क्रियां कृत्वा प्रयोगविधिमाचरेत् ॥ २ ॥ चतुष्पथे श्मशाने वा कलामध्ये च मात्रिकः ॥ मत्स्यं मांसं पायसं च दद्याद्धूपं च गुग्गुलम् ॥ ३ ॥ रात्रियोगेन कर्तव्यं सदा पूर्णश्च साधकः ॥ एवं प्रयागमात्रेण कविता जायते ध्रुवम् ॥ ४ ॥ अग्निस्तंभं जलस्तंभं वाक्स्तंभं कारयेद्ध्रुवम् ॥ मंत्री जयति शत्रूंश्च ताक्ष्यों भोगिकुलं यथा ॥ ५ ॥ शास्त्रे वादे कवित्वे च बृहस्पतिरिवापरः ॥ अनेनैव विधानेन मातङ्गी सिद्धिदायिनी ॥ ॥ ६ ॥ नूनं तद्गृहमागत्य कुबेरैर्दीयते वसु ॥ विना मत्स्यैर्विनामांसैर्नार्चयेत्परदेवताम् ॥ ७ ॥ इति मातङ्गीदशाक्षरमंत्रप्रयोगः ॥

अथ मातङ्गीभेदेन सुमुखीमंत्रप्रयोगः[१] ॥ मंत्रमहोदधौ ॥ अथ वक्ष्ये परां विद्यां सुमुखीमतिगोपिताम् ॥ यां लब्ध्वा देशिको विद्वान्न शोचति कृताकृते ॥ १ ॥ मंत्रो यथा–उच्छिष्टचांडालिनि सुमुखि देवि महापिशाचिनि ह्रीं ठः ठः ठः ॥ इति द्वाविंशत्यक्षरो मंत्रः ॥ अस्य विधानम्। अस्य सुमुखीमंत्रस्य भैरव ऋषिः । गायत्री छंदः । सुमुखी देवता । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ भैरवऋषये नमः शिरसि १। गायत्रीच्छंदसे नमो मुखे २। सुमुखीदेवतायै नमो हृदि ३ । विनियोगाय नमः सर्वाङ्गे ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ उच्छिष्टचांडालिनि अंगुष्ठाभ्यां नमः १। सुमुखि तर्जनीभ्यां नमः २ । देवि मध्यमाभ्यां नमः ३ । महापिशाचिनि अनामिकाभ्यां नमः ४। ह्रीं कनिष्ठिकाभ्यां नमः ५। ठः ठः ठः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ उच्छिष्टचांडालिनि हृदयाय नमः १ । सुमुखि शिरसे स्वाहा २। देवि शिखायै वषट् ३। महापिशाचिनि कवचाय हुम् ४ । ह्रीं नेत्रत्रयाय वौषट् ५।

१ अस्य सुमुखीप्रयोगस्य सुमुखीपूजनयंत्रं पूर्वपृष्ठे (५२७) द्रष्टव्यम्।

ठः ठः ठः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम्–ॐ गुंजानिर्मितहारभूषितकुचां सद्यौवनोल्लासिनीं हस्ताभ्यां नृकपालखड्गलतिके रम्ये मुदा बिभ्रतीम् ॥ रक्तालंकृतिवस्त्रलेपनलसद्देहप्रभां ध्यायतां नृणां श्रीसुमुखीं शवासनगतां स्युः सर्वदा संपदः ॥ १ ॥ फेत्कारिणीतंत्रोक्तध्यानं यथा–शवोपरि समासीनां रक्ताम्बरपरिच्छदाम् ॥ रक्तालंकारसंयुक्तां गुंजाहारविभूषिताम् ॥ षोडशाब्दां च युवतीं पीनोन्नतपयोधराम् ॥ कपालकर्त्रिकाहस्तां परं ज्योतिःस्वरूपिणीम् ॥ २ ॥ इति ध्यायेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति पीठदेवताः संपूज्य पीठशक्तीः पूजयेत् । तत्र क्रमः । पूर्वाद्यष्टसु दिक्षु ॐ जयायै नमः १ । ॐ विजयायै नमः २ । ॐ अजितायै नमः ३ । ॐ अपराजितायै नमः ४ । ॐ नित्यायै नमः ५ । ॐ विलासिन्यै नमः ६ । ॐ दोग्ध्र्यै नमः ७ । ॐ अघोरायै नमः ८ । पीठमध्ये ॐ मंगलायै नमः ९ ॥ इति नव पीठशक्तीः पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण प्रोञ्छ्य 'ॐ ह्रीं सुमुखीयोगपीठात्मने नमः' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य पद्धतिमार्गेण प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्य्यात् । तत्र क्रमः–पुष्पांजलिमादाय–ॐ संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि सुमुखि परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इत्याज्ञां गृहीत्वा आवरणपूजामारभेत ॥ ततः पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण पंचकोणेषु । ॐ चन्द्रायै नमः । चन्द्राश्रीपादुकां पूजयामि तर्पयामि नमः १ । इति सर्वत्र ॥ ॐ चन्द्राननायै नमः । चन्द्राननाश्रीपा० २ । ॐ चारुमुख्यै नमः । चारुमुखीश्रीपा० ३ । ॐ चामीकरप्रभायै नमः । चामीकरप्रभाश्रीपा० ४ । ॐ चतुरायै नमः । चतुराश्रीपा० ५ । इति पंचांगदेवताः पूजयेत् । ततः पुष्पांजलिमादाय मूलमुच्चार्य–अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्याद्बिंदुं निक्षिप्य पूजिता

पितास्ताः संतु इति वदेत् । इति प्रथमावरणम् ॥१॥ ततोऽष्टदलेषु प्राचीक्रमेण ॐ ब्राह्म्यै नमः । ब्राह्मीश्रीपा० १ । ॐ माहेश्वर्य्यै नमः । माहेश्वरीश्रीपा० २ । ॐ कौमार्य्यै नमः । कौमारीश्रीपा० ३ । ॐ वैष्णव्यै नमः । वैष्णवीश्रीपा० ४ । ॐ वाराह्यै नमः । वाराहीश्रीपा० ५ । ॐ इन्द्राण्यै नमः । इन्द्राणीश्रीपा० ६ । ॐचामुंडायै नमः । चामुंडाश्रीपा० ७ । ॐमहालक्ष्म्यै नमः । महालक्ष्मीश्रीपा०८ । इत्यष्टौ संपूज्य पुष्पांजलिं दद्यात् । इति द्वितीयावरणम् ॥ २ ॥ ततः षोडशदलेषु प्राचीक्रमेण । ॐ कलायै नमः । कलाश्रीपा० १ । ॐ कलानिधये नमः । कलानिधिश्रीपा० २ । ॐ काल्यै नमः । कालीश्रीपा० ३ । ॐ कमलायै नमः । कमलाश्रीपा० ४ । ॐ क्रियायै नमः । क्रियाश्रीपा० ५ । ॐ कृपायै नमः । कृपाश्रीपा० ६ । ॐ कुलायै नमः । कुलाश्रीपा० ७ । ॐ कुलीनायै नमः । कुलीनाश्रीपा० ८ । ॐ कल्याण्यै नमः । कल्याणीश्रीपा० ९ । ॐ कुमार्यै नमः । कुमारीश्रीपा० १० । ॐ कलभाषिण्यै नमः । कलभाषिणीश्रीपा० ११ । ॐ करालाख्यायै नमः । करालाख्याश्रीपा० १२ । ॐ किशोर्य्यै नमः । किशोरीश्रीपा० १३ । ॐ कोमलायै नमः । कोमलाश्रीपा० १४ । ॐ कुलभूषणायै नमः । कलभूषणाश्रीपा० १५ । ॐ कल्पदायै नमः । कल्पदाश्रीपा० १६ ॥ इति षोडशदेवताः संपूज्य पुष्पांजलिं च दत्त्वा देव्यर्पणं कुर्य्यात् । इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुरे इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं लक्षजपः । किंशुकपुष्पैः समिद्भिर्वा दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्य्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च–लक्षमेकं जपेन्मंत्रं दशांशं किंशुकोद्भवैः ॥ पुष्पैः समिद्भिर्वापि जुहुयान्मंत्रसिद्धये ॥ १ ॥ इत्थं जपादिभिः सिद्धे मनौ काम्यानि साधयेत् ॥ भुक्तौदनमनाचम्य जपेन्मंत्रमनन्यधीः ॥ २ ॥ उच्छिष्टोऽयुतमेकं यः स भवेत्संपदां पदम् ॥ उच्छिष्टेनैव भक्तेन बलिं दद्यान्निरंतरम् ॥ ३ ॥ दध्नाभ्यक्तैः प्रजुहुयाल्लक्षं सिद्धार्थतंडुलैः ॥ राजानो मंत्रिणस्तस्य भवंति वशगाः क्षणात् ॥ ४ ॥ शस्त्राणि वशगानि स्युर्हुतान्मार्जारमांसतः ॥ धनर्द्धिश्छागमांसेन विद्याप्राप्तिस्तु पायसैः ॥ ५ ॥ मधुपायससंयुक्तस्त्रीरजोयुक्तवाससा ॥ होममाचरतः पुंसो

जनता वशवर्तिनी ॥ ६ ॥ मधुसर्पिर्युतैर्नागवल्लीपत्रैर्महाश्रियः ॥ सद्योनिहतमार्जारमांसेन मधुसर्पिषा ॥ ७ ॥ युक्तेनांत्यजकेशाद्यैर्हुतै राकर्षति स्त्रियः ॥ मध्वक्तशशमांसेन तत्फलं विद्यया सह ॥८॥ उन्मत्ततरुभिर्दीप्ते चिताग्नौ जुहुयाच्छदैः ॥ कोकिलाकाकयोर्मंत्री मार येदचिरादरीन् ॥ ९ ॥ वायसोलूकयोः पत्रैर्होमाद्विद्वेषयेदरीन् ॥ गर्भपातः सगर्भाणामुलूकच्छदनैर्भवेत् ॥ १० ॥ आज्याक्तैर्बिल्व पत्रैर्यो मासमेकं सहस्रकम् ॥ प्रत्यहं जुहुयात्तेन वंध्यापि लभते सुतम् ॥ ११ ॥ सौभाग्यार्थं दुर्भगाया बंधूककुसुमैर्नवैः ॥ मधुनाक्तैः प्रजुहुयात्स्त्रीणामाकृष्टयेऽपि तैः ॥ १२ ॥ निर्जने सदनेऽरण्ये प्रेतावासे चतुष्पथे ॥ बलिं दत्त्वा प्रजपतः सहस्रं चाष्टसंयुतम् ॥ १३ ॥ उच्छिष्टस्य च सा देवी प्रत्यक्षा जायतेऽचिरात् ॥ यत्र नोक्ता होमसंख्याऽयुतं तत्र विनिर्दिशेत् ॥ १४ ॥ वाममार्गेण सुमुखी शीघ्रं काम विधायिनी ॥ भोजनांते तथोच्छिष्टैर्जप्या सा स्वेष्टसिद्धये ॥ १५ ॥ न शीघ्रफलदा देवी सुमुखीसदृशी परा ॥ तस्या मंत्रजपादेव प्रसिध्यंति मनोरथाः ॥१६॥ इति सुमुखीमंत्रप्रयोगः॥अथ मातङ्गीसुमुखीकवचप्रारंभः॥श्रीपार्वत्युवाच ॥देवदेव महादेव सृष्टिसंहारकारक॥ मातंग्याः कवचं ब्रूहि यदि स्नेहोऽस्ति ते मयि ॥ १ ॥ शिव उवाच ॥ अत्यंतगोपनं गुह्यं कवचं सर्वकामदम् ॥ तव प्रीत्या मयाऽऽख्यातं नान्येषु कथ्यते शुभे ॥ २ ॥ शपथं कुरु मे देवि यदि किंचित्प्रकाशसे ॥ अनया सदृशी विद्या न भूता न भविष्यति ॥ ३ ॥ शवा सनां रक्तवस्त्रां युवतीं सर्वसिद्धिदाम् ॥ एवं ध्यात्वा महादेवीं पठेत्कवचमुत्तमम् ॥ ४ ॥ उच्छिष्टं रक्षतु शिरः शिखां चण्डालिनी ततः ॥ सुमुखी कवचं रक्षेद्देवी रक्षतु चक्षुषी ॥ ५ ॥ महापिशाचिनी पायान्नासिकां ह्रीं सदाऽवतु ॥ठः पातु कंठदेशं मे ठः पातु हृदयं तथा ॥ ६ ॥ ठो भुजौ बाहुमूले च सदा रक्षतु चण्डिका ॥ ऐं च रक्षतु पादौ मे सौः कुक्षिं सर्वतः शिवा ॥ ७ ॥ ऐं ह्रीं कटिदेशं च आं ह्रीं संधिषु सर्वदा ॥ ज्येष्ठमातंग्यंगुलीर्मे अंगुल्यग्रे नमामि च ॥ ८ ॥ उच्छिष्टचांडालि मां पातु त्रैलोक्यस्य वशंकरी ॥ शिवे स्वाहा शरीरं मे सर्वसौभाग्यदायिनी ॥९॥ उच्छिष्टचांडालि मातांगि सर्ववशंकारि नमः॥स्वाहा स्तनद्वयं पातु सर्वशत्रुविनाशिनी ॥ १० ॥ अत्यंतगोपनं देवि देवैरपि सुदुर्लभम् ॥ भ्रष्टेभ्यः साधकेभ्योऽपि द्रष्टव्यं न कदाचन॥११॥दत्तेन सिद्धिहानिः स्यात्सर्वथा न प्रकाश्यताम्॥

उच्छिष्टेन बालिं दत्त्वा शनौ वा मंगले निशि॥१२॥रजस्वलाभगं स्पृष्ट्वा जपेन्मंत्रं च साधकः॥ रजस्वलाया वस्त्रेण होमं कुर्यात्सदा सुधीः॥१३॥ सिद्धविद्या इतो नास्ति नियमो नास्ति कश्चन ॥ अष्टसहस्रं जपेन्मंत्रं दशांशं हवनादिकम् ॥ १४ ॥ भूर्जपत्रे लिखित्वा च रक्तसूत्रेण वेष्टयेत् ॥ प्राणप्रतिष्ठामंत्रेण जीवन्यासं समाचरेत् ॥ १५ ॥ स्वर्णमध्ये तु संस्थाप्य धारयेद्दक्षिणे करे ॥ सर्वसिद्धिर्भवेत्तस्य अचिरात्पुत्रवान्भवेत् ॥ १६ ॥ स्त्रीभिर्वामकरे धार्यं बहुपुत्रा भवेत्तदा ॥ वंध्या वा काकवंध्या वा मृतवत्सा च सांगना ॥ १७ ॥ जीवद्वत्सा भवेत्सापि समृद्धिर्भवति ध्रुवम् ॥ शक्तिपूजां सदा कुर्याच्छिवाबलिं प्रदापयेत् ॥ १८ ॥ इदं कवचमज्ञात्वा मातंगीं यो जपेत्सदा ॥ तस्य सिद्धिर्न भवति पुरश्चरणलक्षतः ॥ १९ ॥ इति श्रीरुद्रयामले तंत्रे मातंगीसुमुखीकवचं समाप्तम् ॥ अथ मातंगीकवचं द्वितीयम् ॥ श्रीदेव्युवाच ॥ साधु साधु महादेव कथयस्व सुरेश्वर ॥ मातंगीकवचं दिव्यं सर्वसिद्धिकरं नृणाम् ॥ १ ॥ श्रीइश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि मातंगीकवचं शुभम् ॥ गोपनीयं महादेवि मौनी जापं समाचरेत् ॥ २ ॥ अस्य श्रीमातंगीकवचस्य दक्षिणामूर्तिर्ऋषिः । विराट् छन्दः । मातंगी देवता । चतुर्वर्गसिद्धये पाठे विनियोगः ॥ ॐ शिरो मातंगिनी पातु भुवनेशी तु चक्षुषी॥ तोडला कर्णयुगलं त्रिपुरा वदनं मम ॥ ३ ॥ पातु कण्ठे महामाया हृदि माहेश्वरी तथा ॥ त्रिपुष्पा पार्श्वयोः पातु गुदे कामेश्वरी मम ॥ ४ ॥ ऊरुद्वये तथा चण्डी जंघयोश्च हरप्रिया ॥ महामाया पादयुग्मे सर्वांगेषु कुलेश्वरी ॥ ५ ॥ अंगं प्रत्यंगकं चैव सदा रक्षतु वैष्णवी ॥ ब्रह्मरंध्रे सदा रक्षेन्मातंगीनामसंस्थिता ॥ ६ ॥ रक्षेन्नित्यं ललाटे सा महापिशाचिनीति च ॥ नेत्रयोः सुमुखी रक्षेद्देवी रक्षतु नासिकाम् ॥ ७ ॥ महापिशाचिनी पायान्मुखे रक्षतु सर्वदा ॥ लज्जा रक्षतु मां दंताश्चोष्ठौ संमार्जनीकरा ॥ ८ ॥ चिबुके कण्ठदेशे च ठकारत्रितयं पुनः ॥ सविसर्गं महादेवि हृदयं पातु सर्वदा ॥ ९ ॥ नाभिं रक्षतु मां लोला कालिकावतु लोचने ॥ उदरे पातु चामुण्डा लिंगे कात्यायनी तथा ॥ १० ॥ उग्रतारा गुदे पातु पादौ रक्षतु चाम्बिका ॥ भुजौ रक्षतु शर्वाणी हृदयं चण्डभूषणा ॥ ११ ॥ जिह्वायां मातृका रक्षेत्पूर्वे रक्षतु पुष्टिका ॥ विजया दक्षिणे पातु मेधा रक्षतु वारुणे ॥ १२ ॥ नैर्ऋत्यां सुदया रक्षेद्वायव्यां पातु लक्ष्मणा ॥ ऐशान्यां रक्षेन्मां

देवी मातंगी शभकारिणी ॥ १३ ॥ रक्षेत्सुरेशी चाग्नेय्यां बगला पातु चोत्तरे ॥ ऊर्द्ध्वं पातु महादेवी देवानां हितकारिणी ॥ १४ ॥
पाताले पातु मां नित्यं वशिनी विश्वरूपिणी ॥ प्रणवं च तमोमाया कामबीजं च कूर्चकम् ॥ १५ ॥ मातंगिनी ङेयुतास्त्रं वह्निजाया
वधिर्मनुः ॥ सार्द्धैकादशवर्णा सा सर्वत्र पातु मां सदा ॥ १६ ॥ इति ते कथितं देवि गुह्याद्गुह्यतरं परम् ॥ त्रैलोक्यमंगलं नाम कवचं
देवदुर्लभम् ॥ १७ ॥ य इदं प्रपठेन्नित्यं जायते संपदालयम् ॥ परमैश्वर्यमतुलं प्राप्नुयान्नात्र संशयः ॥ १८ ॥ गुरुमभ्यर्च्य विधिवत
कवचं प्रपठेद्यदि ॥ ऐश्वर्यं सुकवित्वं च वाक्सिद्धिं लभते ध्रुवम् ॥ १९ ॥ नित्यं तस्य तु मातंगी महिला मंगलं चरेत् ॥ ब्रह्मा
विष्णुश्च रुद्रश्च ये देवाः सुरसत्तमाः ॥ २० ॥ ब्रह्मराक्षसवेताला ग्रहाद्या भूतजातयः ॥ तं दृष्ट्वा साधकं देवि लज्जायुक्ता भवंति ते
॥ २१ ॥ कवचं धारयेद्यस्तु सर्वांसिद्धिं लभेद्ध्रुवम् ॥ राजानोऽपि च दासाः स्युः षट्कर्माणि च साधयेत् ॥ २२ ॥ सिद्धो भवति सर्वत्र
किमन्यैर्बहुभाषितैः ॥ इदं कवचमज्ञात्वा मातंगीं यो भजेन्नरः ॥ २३ ॥ अल्पायुर्निर्द्धनो मूर्खो भवत्येव न संशयः ॥ गुरौ भक्तिः
सदा कार्या कवचे च दृढा मतिः ॥ २४ ॥ तस्मै मातंगिनी देवी सर्वसिद्धिं प्रयच्छति ॥ २५ ॥ इति नन्द्यावर्ते उत्तरखण्डे त्वरितफल
दायिनीमातंगिनीकवचं समाप्तम् ॥ अथ मातंगीस्तोत्रप्रारंभः ॥ ईश्वर उवाच ॥ आराध्य मातश्चरणाम्बुजे ते ब्रह्मादयो विस्तृतकीर्ति
मापुः ॥ अन्ये परं वा विभवं मुनीन्द्राः परां श्रियं भक्तिभरेण चान्ये ॥ १ ॥ नमामि देवीं नवचन्द्रमौलेर्मातंगिनीं चन्द्रकलावतंसाम् ॥
आम्नायप्राप्तिप्रतिपादितार्थं प्रबोधयंतीं प्रियमादरेण ॥ २ ॥ विनम्रदेवासुरमौलिरत्नैर्नीराजितं ते चरणारविंदम् ॥ भजंति ये देवि मही
पतीनां व्रजंति ते संपदमादरेण ॥ ३ ॥ कृतार्थयंतीं पदवीं पदाभ्यामास्फालयंतीं कृतवल्लकीं ताम् ॥ मातंगिनीं सद्धृदयांधिनोमि लीलां
शुकां शुद्धनितम्बबिंबाम् ॥ ४ ॥ तालीदलेनार्पितकर्णभूषां माध्वीमदोद्घूर्णितनेत्रपद्माम् ॥ घनस्तनीं शंभुवधूं नमामि तडिल्लताकांति
मनर्घ्यभूषाम् ॥ ५ ॥ चिरेण लक्ष्यं नवलोमराज्या स्मरामि भक्त्या जगतामधीशे ॥ वलित्रयाढ्यं तव मध्यमम्ब नीलोत्पलांशुश्रिय
मावहंत्याः ॥ ६ ॥ कांत्या कटाक्षैः कमलाकराणां कदम्बमालाञ्चितकेशपाशाम् ॥ मातङ्गकन्यां हृदि भावयामि ध्यायेयमारक्तकपोल

विंबाम् ॥ ७ ॥ विम्बाधरन्यस्तललामवश्यमालीललीलालकमायताक्षम् ॥ मन्दस्मितं ते वदनं महेशि स्तुत्यानया शंकरधर्मपत्नीम् ॥ ८ ॥ मातंगिनीं वागधिदेवतां तां स्तुवंति ये भक्तियुता मनुष्याः ॥ परां श्रियं नित्यमुपाश्रयंति परत्र कैलासतले वसन्ति ॥ ९ ॥ उद्यद्भानुमरीचिवीचिविलसद्वासो वसानां परां गौरीं संगतिपानकर्परकरामानन्दकन्दोद्भवाम् ॥ गुंजाहारचलद्विहारहृदयामापीनतुंगस्तनीं मत्तस्मेरमुखीं नमामि सुमुखीं शावासनासेदुषीम् ॥ १० ॥ इति रुद्रयामले मातंगीस्तोत्रं समाप्तम् ॥ अथ मातंगीशतनामस्तोत्रप्रारंभः ॥ श्रीभैरव्युवाच ॥ भगवञ्छ्रोतुमिच्छामि मातंग्याः शतनामकम् ॥ यद्गुह्यं सर्वतंत्रेषु न कस्यापि प्रकाशितम् ॥ १ ॥ श्रीभैरव उवाच ॥ शृणु देवि प्रवक्ष्यामि रहस्यातिरहस्यकम् ॥ नाख्येयं यत्र कुत्रापि पठनीयं परात्परम् ॥ २ ॥ यस्यैकवारपठनात्सर्वे विघ्ना उपद्रवाः ॥ नश्यंति तत्क्षणाद्देवि वह्निना तूलराशिवत् ॥ ३ ॥ प्रसन्ना जायते देवि मातंगी चास्य पाठतः ॥ सहस्रनामपठने यत्फलं परिकीर्तितम् ॥ तत्कोटिगुणितं देवि नामाष्टशतकं शुभम् ॥ ४ ॥ ॐ अस्य श्रीमातंगीशतनामस्तोत्रस्य भगवान्मतंग ऋषिः । अनुष्टुप्छंदः मातंगी देवता । मातंगीप्रीतये पाठे विनियोगः ॥ महामत्तमातंगिनी सिद्धिरूपा तथा योगिनी भद्रकाली रमा च ॥ भवानी भयप्रीतिदा भूतियुक्ता भवाराधिता भूतिसम्पत्करी च ॥ १ ॥ धनाधीशमाता धनागारदृष्टिर्धनेशार्चिता धीरवापी वरांगी ॥ प्रकृष्टा प्रभारूपिणी कामरूपा प्रहृष्टा महाकीर्तिदा कर्णनाली ॥ २ ॥ काराली भगा घोररूपा भगांगी भगाह्वा भगप्रीतिदा भीमरूपा ॥ भवानी महाकौशिकी कोशपूर्णा किशोरी किशोरप्रिया नन्दईहा ॥ ३ ॥ महाकारणा कारणा कर्मशीला कपाली प्रसिद्धा महासिद्धखण्डा ॥ मकारप्रिया मानरूपा महेशी मलोल्लासिनी लास्यलीलालयांगी ॥ ४ ॥ क्षमा क्षेमशीला क्षपाकारिणी चाक्षयप्रीतिदा भूतियुक्ता भवानी ॥ भवाराधिता भूतिसत्यात्मिका च प्रभोद्भासिता भानुभास्वत्करा च ॥ ५ ॥ धराधीशमाता धनागारदृष्टिर्धनेशार्चिता धीवरा धीवरांगी ॥ प्रकृष्टप्रभारूपिणी प्राणरूपा प्रकृष्टस्वरूपा स्वरूपप्रिया च ॥ ६ ॥ चलत्कुंडला कामिनी कांतयुक्ता कपाला चला कालकोद्धारिणी च ॥ कदम्बप्रिया कोटरी कोटदेहा क्रमा कीर्तिदा कर्णरूपा च काक्ष्मी ॥ ७ ॥ क्षमांगी क्षय

प्रेमरूपा क्षया च क्षयाक्षा क्षयाह्वा क्षयप्रांतरा च ॥ क्षवत्कामिनी क्षारिणी क्षीरपूर्णा ।शिवांगी च शाकंभरी शाकदेहा ॥ ८ ॥
महाशाकयज्ञा फलप्राशका च शकाह्वा शकाह्वाशकाख्या शका च ॥ शकाक्षांतरोषा सुरोषा सुरेखा महाशेषयज्ञोपवीतप्रिया च ॥ ९ ॥
जयंती जया जाग्रती योग्यरूपा जयांगा जपध्यानसंतुष्टसंज्ञा ॥ जयप्राणरूपा जयस्वर्णदेहा जयज्वालिनी यामिनी याम्यरूपा ॥ १० ॥
जगन्मातृरूपा जगद्रक्षणा च स्वधावौषडंता विलम्बाविलम्बा ॥ षडङ्गा महालंबरूपासिहस्ता पदाहारिणीहारिणी हारिणी च ॥ ११ ॥
महामंगला मंगलप्रेमकीर्तिर्निशुंभाच्छिदा शुम्भदर्पत्वहा च ॥ तथाऽनन्दबीजादिमुक्तिस्वरूपा तथा चण्डमुण्डापदा मुख्यचण्डा ॥ १२ ॥
प्रचण्डाऽप्रचण्डा महाचण्डवेगा चलच्चामरा चामरा चन्द्रकीर्तिः ॥ सुचामीकरा चित्रभूषोज्ज्वलाङ्गी सुसंगीतगीतश्च पायादपायात् ॥ १३॥
इति ते कथितं देवि नाम्नामष्टोत्तरं शतम् ॥ गोप्यं च सर्वतंत्रेषु गोपनीयं च सर्वदा ॥ १४ ॥ एतस्य सतताभ्यासात्साक्षाद्देवो महे
श्वरः ॥ त्रिसंध्यं च महाभक्त्या पठनीयं सुखोदयम् ॥ १५ ॥ न तस्य दुष्करं किंचिज्जायते स्पर्शतः क्षणात् ॥ सुकृतं यत्तदे
वास्तं तस्मादावर्त्तयेत्सदा ॥ १६ ॥ सदैव सन्निधौ तस्य देवी वसति सादरम् ॥ अयोगा ये त एवाग्रे सुयोगाश्च भवंति वै ॥ त एव मित्र
भूताश्च भवंति तत्प्रसादतः ॥ १७ ॥ विषाणि नोपसर्प्पंति व्याधयो न स्पृशंति तान् ॥ लूताविस्फोटकाः सर्वे शमं यांति च तत्क्षणात्
॥ १८ ॥ जरापलितनिर्मुक्तः कल्पजीवी भवेन्नरः ॥ अपि किं बहुनोक्तेन सान्निध्यं फलमाप्नुयात् ॥ १९ ॥ यावन्मया पुरा प्रोक्तं
फलं साहस्रनामकम् ॥ तत्सर्वं लभते मर्त्यो महामायाप्रसादतः ॥ २० ॥ इति श्रीरुद्रयामले मातंगीशतनामस्तोत्रं समाप्तम् ॥ अथ
मातंगीसहस्रनामस्तोत्रप्रारंभः ॥ ईश्वर उवाच ॥ शृणु देवि प्रवक्ष्यामि साम्प्रतं तत्त्वतः परम् ॥ नाम्नां सहस्रं परमं सुमुख्याः सिद्धये
हितम् ॥ १ ॥ सहस्रनामपाठी यः सर्वत्र विजयी भवेत् ॥ पराभवो न तस्यास्ति सभायां वा महारणे ॥ २ ॥ यथा तुष्टा भवेद्देवी
सुमुखी चास्य पाठतः ॥ तथा भवति देवेशि साधकः शिव एव सः ॥ ३ ॥ अश्वमेधसहस्राणि वाजपेयस्य कोटयः ॥ सकृत्पाठेन
जायंते प्रसन्ना सुमुखी भवेत् ॥ ४ ॥ मातंगोऽस्य ऋषिश्छंदोऽनुष्टुप् देवी समीरिता ॥ सुमुखी विनियोगः स्यात्सर्वसंपत्तिहेतवे ॥ ५ ॥

एवं ध्यात्वा पठेदेतद्यदीच्छेत्सिद्धिमात्मनः ॥ ६ ॥ अथ ध्यानम्—देवीं षोडशवार्षिकीं शवगतां माध्वीरसाघूर्णितां श्यामांगीमरुणाम्बरां पृथुकुचां गुंजावलीशोभिताम् ॥ हस्ताभ्यां दधतीं कपालममलं तीक्ष्णं तथा कर्त्रिकां ध्यायेन्मानसपङ्कजे भगवतीमुच्छिष्टचाण्डालिनीम् ॥ १ ॥ ॐ सुमुखी शेमुषी सेव्या सुरसा शशिशेखरा ॥ समानास्या साधनी च समस्तसुरसम्मुखी ॥ २ ॥ सर्वसम्पत्तिजननी सम्पदा सिंधुसेविनी ॥ शम्भुसीमंतिनी सौम्या समाराध्या सुधारसा ॥ ३ ॥ सारंगासवलीवेला लावण्यवनमालिनी ॥ वनजाक्षी वनचरी वनी वनविनोदिनी ॥ ४ ॥ वेगिनी वेगदा वेगा बगलस्था बलाधिका ॥ काली कालप्रिया केली कामला कालकामिनी ॥ ५ ॥ कमला कमलस्था च कमलस्था कलावती ॥ कुलीना कुटिला कांता कोकिला कलभाषिणी ॥ ६ ॥ कीरा केलिकरा काली कपालिन्यपि कालिका ॥ केशिनी च कशावर्ता कौशाम्भी केशवप्रिया ॥ ७ ॥ काली काशी महाकालसङ्काशा केशदायिनी ॥ कुण्डला च कुलस्था च कुण्डलाङ्गदमंडिता ॥ ८ ॥ कुण्डपद्मा कुमुदिनी कुमुदप्रीतिवर्द्धिनी ॥ कुण्डप्रिया कुण्डरुचिः कुरंगनयनाकुला ॥ ९ ॥ कुन्दबिम्बालिनदिनी कुसुंभकुसुमाकरा ॥ काञ्चीकनकशोभाढ्या क्वणत्किंकिणिकाकटिः ॥ १० ॥ कठोरकरणा काष्ठा कौमुदी कण्ठवत्यपि ॥ कपर्दिनी कपटिनी कठिनी कलकण्डिनी ॥ ११ ॥ कीरहस्ता कुमारी च कुरूढकुसुमप्रिया ॥ कुंजरस्था कुंजरता कुंभी कुंभस्तनी कला ॥ १२ ॥ कुम्भिकांगा करभोरूः कदलीकुशशायिनी ॥ कुपिता कोटरस्था च कङ्कोला कन्दलालया ॥ १३ ॥ कपालवासिनी केशी कम्पमानशिरोरुहा ॥ कादम्बरी कदम्बस्था कुंकुमप्रेमधारिणी ॥ १४ ॥ कुटुम्बिनी कृपायुक्ता क्रतुः क्रतुकरप्रिया ॥ कात्यायनी कृत्तिका च कार्तिकी कुशवर्तिनी ॥१५॥ कामपत्नी कामदात्री कामेशी कामवन्दिता ॥ कामरूपा कामरतिः कामाख्या ज्ञानमोहिनी ॥ १६ ॥ खड्गिनी खेचरी खञ्जा खञ्जरीटेक्षणा खगा ॥ खरगा खरनादा च खरस्था खेलनप्रिया ॥ १७ ॥ खरांशुः खेलिनी खट्वा खरा खट्वांगधारिणी ॥ खरखण्डिन्यपि ख्यातिः खण्डिता खण्डनाप्रिया ॥ १८ ॥ खण्डप्रिया खण्डखाद्या खण्डसिंधुश्च खण्डिनी ॥ गंगा गोदावरी गौरी गौतम्यपि च गोमती ॥ १९ ॥ गंगा गया गगनगा गारुडी गरुडध्वजा ॥ गीता गीतप्रिया गेया गुणप्रीतिर्गुरुर्गिरी ॥ २० ॥

गौगौरी गण्डसदना गोकुला गोप्रतारिणी ॥ गोप्ता गोविन्दिनी गूढा गूढविग्रस्तगुञ्जिनी ॥ २१ ॥ गजमा गोपिनी गोपी गोक्षा जय
प्रिया गणा ॥ गिरिभूपालदुहिता गोगा गोकुलवासिनी ॥ २२ ॥ घनस्तनी घनरुचिर्घनोरुर्घननिस्स्वना ॥ घुङ्कारिणी घुक्षकरी घूघूक
परिवारिता ॥ २३ ॥ घण्टानादप्रिया घण्टा घोटा घोटकवाहिनी ॥ घोररूपा च घोरा च घृतप्रीतिर्घृताञ्जनी ॥ २४ ॥ घृताची
घृतवृष्टिश्च घण्टाघटघटावृता ॥ घटस्था घटना घातकरी घातनिवारिणी ॥ २५ ॥ चंचरीकी चकोरी च चामुण्डा चीरधारिणी ॥
चातुरी चपला चञ्चुश्चिता चिंतामणिस्थिता ॥ २६ ॥ चातुर्वर्ण्यमयी चंचुश्चोराचार्य्या चमत्कृतिः ॥ चक्रवर्तिवधूश्चित्रा चक्रांगी
चक्रमोदिनी ॥ २७ ॥ चेतश्चरी चित्तवृत्तिश्चेतना चेतनाप्रिया ॥ चापिनी चम्पकप्रीतिश्चण्डा चण्डालवासिनी ॥ २८ ॥ चिरं
जीविनी तच्चित्ता चिंचामूलनिवासिनी ॥ छुरिका छत्रमध्यस्था छिन्दा छिन्दकरी छिदा ॥ २९ ॥ छुच्छुन्दरी छलप्रीतिश्छुच्छुन्दरि
निभस्वना ॥ छलिनी छत्रदा छिन्ना छिण्टिच्छेदकरी छटा ॥ ३० ॥ छद्मिनी छान्दसी छाया छरुच्छन्दकरीत्यपि ॥ जयदाजयदा
जाती जायिनी जामला जतुः ॥ ३१ ॥ जम्बूप्रिया जीवनस्था जंगमा जंगमप्रिया ॥ जपापुष्पप्रिया जप्या जगज्जीवा जगज्जनिः ॥
॥ ३२ ॥ जगज्जंतुप्रधाना च जगज्जीवपरा जवा ॥ जातिप्रिया जीवनस्था जीमूतसदृशीरुचिः ॥ ३३ ॥ जन्या जनहिता जाया
जन्मभूर्जंभसी जभूः ॥ ३४ ॥ जयदा जगदावासा जायिनी ज्वरकृच्छ्रजित् ॥ जपा च जपती जप्या जपाहा जायिनी जना ॥ ३५ ॥
जालन्धरमयी जानुर्जालौका जाप्यभूषणा ॥ जगज्जीवमयी जीवा जरत्कारुर्जनप्रिया ॥ ३६ ॥ जगतीजननिरता जगच्छोभाकरी जवा ॥
जगतीत्राणकृज्जङ्घा जातीफलविनोदिनी ॥३७॥ जातीपुष्पप्रिया ज्वाला जातिहा जातिरूपिणी ॥ जीमूतवाहनरुचिर्जीमूता जीर्णवस्त्रकृत्
॥ ३८ ॥ जीर्णवस्त्रधरा जीर्णा ज्वलती जालनाशिनी ॥ जगत्क्षोभकरी जातिर्जगत्क्षोभविनाशिनी ॥ ३९ ॥ जनापवादा जीवा च जननी
गृहवासिनी ॥ जनानुरागा जानुस्था जलवासा जलार्तिकृत्॥४०॥ जलजा जलवेला च जलचक्रनिवासिनी॥ जलमुक्ता जलारोहा जलसा
जलजेक्षणा ॥ ४१ ॥ जलप्रिया जलौका च जलशोभावती तथा ॥ जलविस्फूर्जितवपुर्ज्वलत्पावकशोभिनी ॥ ४२ ॥ झिञ्झा झिल्लमयी

झिञ्झाझणत्कारकरी जया ॥ झंझी झंपकरी झंपा झंपत्रासनिवारिणी ॥ ४३ ॥ टंकारस्था टंककरी टंकारकरणांहसा ॥ टंकारोट्टकृतष्ठीवा
डिण्डीरवसनावृता ॥ ४४ ॥ डाकिनी डामरी चैव डिण्डिमध्वनिनादिनी ॥ डकारनिस्स्वनरुचिस्तपिनी तापिनी तथा ॥ ४५ ॥ तरुणी
तुन्दिला तुन्दा तामसी च तमःप्रिया ॥ ताम्रा ताम्रवती तंतुस्तुन्दिलातुलसंभवा ॥ ४६ ॥ तुलाकोटिसुवेगा च तुल्यकामा तुलाश्रया ॥
तुदनी तुननी तुम्बी तुलाकाला तुलाश्रवा ॥ ४७ ॥ तुमुला तुलजा तुल्या तुलादानकरी तथा ॥ तुल्यवेगा तुल्यगतिस्तुलाकोटिनिना
दिनी ॥ ४८ ॥ ताम्रौष्ठा ताम्रपर्णी च तमःसंक्षोभकारिणी ॥ त्वरिता ज्वरहा तीरा तारकेशी तमालिनी ॥ ४९ ॥ तमोदानवती
ताम्रतालस्थानवती तमी ॥ तामसी च तमिस्रा च तीव्रा तीव्रपराक्रमा ॥ ५० ॥ तटस्था तिलतैलाक्ता तरुणी तपनद्युतिः ॥ तिलो
त्तमा च तिलकृत्तारकाधीशशेखरा ॥ ५१ ॥ तिलपुष्पप्रिया तारा तारकेशी कुटुम्बिनी ॥ स्थाणुपत्नी स्थिरकरी स्थूलसम्पद्विवर्द्धिनी
॥ ५२ ॥ स्थितिः स्थैर्य्यस्थविष्ठा च स्थपतिः स्थूलविग्रहा ॥ स्थूलस्थलवती स्थाली स्थलसंगविवर्द्धिनी ॥ ५३ ॥ दण्डिनी
दंतिनी दामा दरिद्रा दीनवत्सला॥देवी देववधूर्दित्या दामिनी देवभूषणा॥ दयादमवती दीनवत्सला दाडिमस्तनी ॥ ५४ ॥ देवमूर्तिकरा
दैत्या दारिणी देवतानता ॥ दोलाक्रीडा दयालुश्च दम्पती देवतामयी ॥ दशादीपस्थिता दोषा दोषहा दोषकारिणी ॥ ५५ ॥ दुर्गा
दुर्गार्तिशमनी दुर्गम्या दुर्गवासिनी ॥ दुर्गंधनाशिनी दुःस्था दुःखप्रशमकारिणी ॥ ५६ ॥ दुर्गंधा दुन्दुभिध्वांता दूरस्था दूरवासिनी ॥
दरदा दरदात्री च दुर्व्याधदयिता दमी ॥ ५७ ॥ धुरंधरा धुरीणा च धौरेयी धनदायिनी ॥ धीरारवा धरित्री च धर्मदा धीर
मानसा ॥ ५८ ॥ धनुर्द्धरा च धमनी धमनीधूर्तविग्रहा ॥ धूम्रवर्णा धूम्रपाना धूमला धूममोदिनी ॥ ५९ ॥ नन्दिनीनन्दिनी नन्दा
नन्दिनी नन्दबालिका ॥ नवीना नर्मदा नर्मनेमिर्नियमनिस्स्वना ॥ ६० ॥ निर्मला निगमाधारा निम्नगा नग्नकामिनी ॥ नीला निरत्ना
निर्वाणा निर्लोभा निर्गुणा नतिः ॥ ६१ ॥ नीलग्रीवा निरीहा च निरञ्जनजनानवा ॥ निर्गुण्डिका च निर्गुण्डा निर्नासा नासिकाभिधा
॥ ६२ ॥ पताकिनी पताका च पत्रप्रीतिः पयस्विनी ॥ पीना पीनस्तनी पत्नी पवनाशा निशामयी ॥ ६३ ॥ परा परपरा काली

पारक्तृत्यभुजप्रिया ॥ पवनस्था च पवना पवनप्रीतिवर्द्धिनी ॥ ६४ ॥ पशुवृद्धिकरी पुष्पपोषिका पुष्टिवर्द्धिनी ॥ पुष्पिणी पुस्तककरा
पूर्णिमाऽतलवासिनी ॥ ६५ ॥ पेशी पाशकरी पाशा पांशुहा पांशुला पशुः ॥ पटुः पराशा परशुधारिणी पाशिनी तथा ॥ ६६ ॥
पापघ्नी पतिपत्नी च पतिता पतितापनी ॥ पिशाची च पिशाचघ्नी पिशिताशनतोषिणी ॥ ६७ ॥ पानदा पानपात्री च पानदानकरोद्यता ॥
पेया प्रसिद्धा पीयूषा पूर्णा पूर्णमनोरथा ॥ ६८ ॥ पतंगाभा पतंगा च पौनःपुन्यमितापरा ॥ पङ्किला पंकमग्ना च पानीया पञ्जरस्थिता ॥
॥ ६९ ॥ पञ्चमी पञ्चयज्ञा च पञ्चता पञ्चमप्रिया ॥ पिचुमन्दा पुण्डरीका पिकी पिंगललोचना ॥ ७० ॥ प्रियंगुमञ्जरी पिण्डी पण्डिता
पाण्डुरप्रभा ॥ प्रेतासना प्रियालस्था पाण्डुघ्नी पीनसापहा ॥ ७१ ॥ फलिनी फलदात्री च फलश्रीः फलभूषणा ॥ फूत्कारकारिणी
स्फारी फुल्ला फुल्लाम्बुजानना ॥ ७२ ॥ स्फुलिंगहा स्फीतमतिः स्फीतकीर्तिकरी तथा ॥ बलमाया बलारातिर्बलिनी बलवर्द्धिनी ॥ ७३ ॥
वेणुवाद्या वनचरी विरञ्चिजनयित्र्यपि ॥ विद्याप्रदा महाविद्या बोधिनी बोधदायिनी ॥ ७४ ॥ बुद्धमाता च बुद्धा च वनमालावती वरा ॥
वरदा वारुणी वीणा वीणावादनतत्परा ॥ ७५ ॥ विनोदिनी विनोदस्था वैष्णवी विष्णुवल्लभा ॥ वैद्या वैद्यचिकित्सा च विवशा विश्व
विश्रुता ॥ ७६ ॥ विद्यौघविह्वला वेला वित्तदा विगतज्वरा ॥ विरावा विवरीकारा बिम्बोष्ठी बिम्बवत्सला ॥ ७७ ॥ विंध्यस्था
वरवंद्या च वीरस्थानवरा च वित् ॥ वेदांतवेद्या विजया विजया विजयप्रदा ॥ ७८ ॥ विरोगिवन्दिनी वंध्या वंद्यबधनिवारिणी ॥
भगिनी भगमाला च भवानी भवनाशिनी ॥ ७९ ॥ भीमा भीमाननाभीमा भंगुरा भीमदर्शना ॥ भिल्ली भिल्लधरा भीरुर्भेरुण्डा भी
र्भयावहा ॥ ८० ॥ भगसर्पिण्यपि भगा भगरूपा भगालया ॥ भगासना भगाभोगा भेरीझङ्काररञ्जिता ॥ ८१ ॥ भीषणा भीषणारावा
भगवत्यहिभूषणा ॥ भारद्वाजा भोगदात्री भूतिघ्नी भूतिभूषणा ॥ ८२ ॥ भूमिदा भूमिदात्री च भूपतिर्भरदायिनी ॥ भ्रमरी भ्रामरी
भाला भूपालकुलसंस्थिता ॥ ८३ ॥ माता मनोहरा माया मानिनी मोहिनी मही ॥ महालक्ष्मीर्मदक्षीबा मदिरा मदिरालया ॥ ८४ ॥
मदोद्धता मतंगस्था माधवी मधुमर्दिनी ॥ मोदा मोदकरी मेधा मेध्या मध्याधिपस्थिता ॥ ८५ ॥ मद्यपा मांसलोमस्था मोदिनी मैथुनो

यता ॥ मूर्द्धावती महामाया मायामहिममन्दिरा ॥ ८६ ॥ महामाला महाविद्या महामारी महेश्वरी ॥ महादेववधूर्मान्या मधुरा मेरु मण्डिता ॥ ८७ ॥ मेदस्विनी मिलिन्दाक्षी महिषासुरमर्द्दिनी ॥ मण्डलस्था भगस्था च मदिरारागगर्विता ॥ ८८ ॥ मोक्षदा मुण्ड माला च माला मालविलासिनी ॥ मातंगिनी च मातंगी मातंगतनयापि च ॥ ८९ ॥ मधुस्रवा मधुरसा बंधूककुसुमप्रिया ॥ यामिनी यामिनीनाथभूषा यावकरञ्जिता ॥ ९० ॥ यवांकुरप्रिया यामा यवनी यवनार्द्दिनी ॥ यमघ्नी यमकल्पा च यजमानस्वरूपिणी ॥ ९१ ॥ यज्ञा यज्ञयजुर्यक्षी यशोनिष्कंपकारिणी ॥ यक्षिणी यक्षजननी यशोदायासधारिणी ॥ ९२ ॥ यशस्सूत्रपदा यामा यज्ञकर्मकरी त्यपि ॥ यशस्विनी यकारस्था यूपस्तंभनिवासिनी ॥ ९३ ॥ रंजिता राजपत्नी च रमा रेखा रवीरणा ॥ रजोवती रजश्चित्रा रंजनी रजनीपतिः ॥ ९४ ॥ रोगिणी रजनी राज्ञो राज्यदा राज्यवर्द्धिनी ॥ राजन्वती राजनीतिस्तथा रजतवासिनी ॥ ९५ ॥ रमणी रमणीया च रामा रामावती रतिः ॥ रेतोरती रतोत्साहा रोगघ्नी रोगकारिणी ॥ ९६ ॥ रंगा रंगवती रागा रागज्ञा रागकृद्दया ॥ रामिका रजकी रेवा रजनी रंगलोचना ॥ ९७ ॥ रक्तचर्मधरा रंगी रंगस्था रंगवाहिनी ॥ रमा रंभाफलप्रीती रंभोरू राघवाप्रिया ॥ ॥ ९८ ॥ रंगा रंगांगमधुरा रोदसी च महारवा ॥ रोगकृद्रोगहंत्री च रोगभृद्रोगस्राविणी ॥ ९९ ॥ बन्दी बन्दिस्तुता बन्धुर्बन्धूक कुसुमाधरा ॥ वंदिता वंद्यमाना च वैद्रावी वेदविद्विधा ॥ १०० ॥ विकोपा विकपाला च विकस्था विङ्कवत्सला ॥ वेदिर्विलग्नलग्ना च विधिविङ्ककरी विधा ॥ १०१ ॥ शङ्खिनी शङ्खवलया शंखमालावती शमी ॥ शंखपात्राशिनी शंखस्वना शंखगला शशी ॥ ॥ १०२ ॥ शवरी शांवरी शंभुः शंभुकेशा शरासिनी ॥ शवा श्येनवती श्यामा श्यामांगी श्यामलोचना ॥ १०३ ॥ श्मशानस्था श्मशाना च श्मशानस्थानभूषणा ॥ शमदा शमहंत्री च शंखिनी शंखरोषणा ॥ १०४ ॥ शांतिः शांतिप्रदा शेषा शेषाख्या शेष शायिनी ॥ शेमुषी शोषिणी शेषा शौर्य्या शौर्य्यशरा शरी ॥ १०५ ॥ शापदा शापहा शापा शापपंथाः सदाशिवा ॥ भृंगिणी भंगिपलभुक् शङ्करी शांकरी शिवा ॥ १०६ ॥ शवस्था शवभुक् शांता शवकर्णा शवोदरी ॥ शाविनी शवशिंशा

 श्रीः शवा च शवशायिनी ॥ १०७ ॥ शवकुण्डलिनी शैवा शीकरा शिशिराशना ॥ शवकाञ्ची शवश्रीका शवमाला
 शवाकृतिः ॥ १०८ ॥ स्रवंती सङ्चा शक्तिः शंतनुः शवदायिनी ॥ सिंधुः सरस्वती सिंधुः सुंदरी सुन्दरानना ॥ १०९ ॥
साधुः सिद्धिप्रदात्री च सिद्धा सिद्धसरस्वती ॥ संततिः सम्पदा संविच्छंकिसम्पत्तिदायिनी ॥ ११० ॥ सपत्नी सरसा सारा सारस्वत
करी सुधा ॥ सुरा समांसाशना च समाराध्या समस्तदा ॥ १११ ॥ समधीः सामदा सीमा संमोहा समदर्शना ॥ सामतिः सामदा सीमा
सावित्री सविधा सती ॥ ११२ ॥ सवना सवनासारा सवरा सावरा समी ॥ सिमरा सतता साध्वी सध्रींची ससहायिनी ॥ ११३ ॥
हंसी हंसगतिर्हंसी हंसोज्ज्वलनिचोलयुक् ॥ हलिनी हालिनी हाला हलश्रीर्हरवल्लभा ॥ ११४ ॥ हला हलवती ह्येषा हेला हर्षविव
र्द्धिनी ॥ हंतिर्हंता हया हाहाहताऽहंतातिकारिणी ॥ ११५ ॥ हंकारी हंकृतिर्हंका हीहीहाहाहिता हिता ॥ हीतिर्हेमप्रदा हारा राविणी
हरिसम्मता ॥ ११६ ॥ होरा होत्री होलिका च होमा होमहर्विर्हविः ॥ हारिणी हारिणीनेत्रा हिमाचलनिवासिनी ॥ ११७ ॥
लम्बोदरी लम्बकर्णा लम्बिका लम्बविग्रहा ॥ लीला लीलावती लोला ललना ललिता लता ॥ ११८ ॥ ललामलोचना लोम्या लोलाक्षी
सत्कुलालया ॥ लपत्नी लपती लम्या लोपामुद्रा ललंतिका ॥ ११९ ॥ लतिका लंघिनी लंघा लालिमा लघुमध्यमा ॥ लघीयसी
लघूदर्य्या लूता लूताविनाशिनी ॥ १२० ॥ लोमशा लोमलम्बी च ललंती च लुलुम्पती ॥ लुलायस्था च लहरी लङ्कापुरपुरंदरा ॥
॥ १२१ ॥ लक्ष्मीर्लक्ष्मीप्रदाऽलभ्या लाक्षाक्षी लुलितप्रभा ॥ क्षणा क्षणक्षुः क्षुत्क्षीणी क्षमा क्षांतिः क्षमावती ॥ १२२ ॥ क्षमा क्षामो
दरी क्षेम्या क्षोभभृत्क्षत्रियांगना ॥ क्षया क्षयकरी क्षीरा क्षीरदा क्षीरसागरा ॥ १२३ ॥ क्षेमंकरी क्षयकरी क्षयकृत्क्षयदा क्षतिः ॥
क्षुद्रिकाऽक्षुद्रिका क्षुद्रा क्षुत्क्षामा क्षीणपातका ॥ १२४ ॥ मातुः सहस्रनामेदं सुमुख्याः सिद्धिदायकम् ॥ यः पठेत्प्रयतो नित्यं स एव
स्यान्महेश्वरः ॥ १२५ ॥ अनाचारात्पठेन्नित्यं दरिद्रो धनवान्भवेत् ॥ मूकः स्याद्वाक्पतिर्देवि रोगी नीरोगतां व्रजेत् ॥ १२६ ॥
पुत्रार्थी पुत्रमाप्नोति त्रिषु लोकेषु विश्रुतम् ॥ वंध्यापि सूते सत्पुत्रं विदुषः सदृशं गुरोः ॥ १२७ ॥ सत्यं च बहुधा भूयाद्गावश्च बहु

दुग्धदाः ॥ राजानः पादनम्राः स्युस्तस्य हासा इव स्फुटाः ॥ १२८ ॥ अरयः संक्षयं यांति मनसा संस्मृता अपि ॥ दर्शनादेव जायंते
नरा नार्य्योऽपि तद्वशाः ॥ १२९ ॥ कर्ता हर्ता स्वयं वीरो जायते नात्र संशयः ॥ यं यं कामयते कामं तं तं प्राप्नोति निश्चितम् ॥
॥ १३० ॥ दुरितं न च तस्यास्ति नास्ति शोकः कथंचन ॥ चतुष्पथेऽर्द्धरात्रे च यः पठेत्साधकोत्तमः ॥ १३१ ॥ एकाकी निर्भयो
वीरो दशवारं स्तवोत्तमम् ॥ मनसा चिंतितं कार्यं तस्य सिद्ध्येन्न संशयः ॥ १३२ ॥ विना सहस्रनाम्नां यो जपेन्मंत्रं कदाचन ॥
न सिद्धिर्जायते तस्य कल्पकोटिशतैरपि ॥ १३३ ॥ कुजवारे श्मशाने वा मध्याह्ने यो जपेत्सदा ॥ कृतकृत्यः स जायेत कर्ता हर्ता
नृणामिह ॥ १३४ ॥ रोगार्तोऽर्द्धनिशायां यः पठेदासनसंस्थितः ॥ सद्यो नीरोगतामेति यदि स्यान्निर्भयस्तदा ॥ १३५ ॥ अर्द्ध
रात्रे श्मशाने वा शनिवारे जपेन्मनुम् ॥ अष्टोत्तरसहस्रं तु दशवारं जपेत्ततः ॥ १३६ ॥ सहस्रनाम चैतद्धि तदा याति स्वयं शिवा ॥
महापवनरूपेण घोरगोमायुनादिनी ॥ १३७ ॥ ततो यदि न भीतिः स्यात्तदा देहीति वाग्भवेत् ॥ तदा पशुबलिं दद्यात्स्वयं गृह्णाति
चण्डिका ॥ १३८ ॥ यथेष्टं च वरं दत्त्वा प्रयाति सुमुखी शिवा ॥ रोचनागुरुकस्तूरीकर्पूरैश्च सचन्दनैः ॥ १३९ ॥ कुंकुमेन दिने
श्रेष्ठे लिखित्वा भूर्जपत्रके ॥ शुभनक्षत्रयोगे च कृतमारुतसत्क्रियः ॥ १४० ॥ कृत्वा सम्पातनविधिं धारयेद्दक्षिणे करे ॥ सहस्रनाम
स्वर्णस्थं कण्ठे वा विजितेन्द्रियः ॥ १४१ ॥ तदा यं प्रणमेन्मंत्री क्रुद्धः स म्रियते नरः ॥ दुष्टश्वापदजंतूनां न भीः कुत्रापि जायते
॥ १४२ ॥ बालकानामियं रक्षा गर्भिणीनामपि प्रिये ॥ मोहनस्तंभनाकर्षमारणोच्चाटनानि च ॥ १४३ ॥ यंत्रधारणतो नूनं जायंते
साधकस्य तु ॥ नीलवस्त्रे विलिख्यैतत्तद्ध्वजे स्थापयेद्यदि ॥ १४४ ॥ तदा नष्टा भवत्येव प्रचण्डाप्यारिवाहिनी ॥ एतज्जप्तं महाभस्म
ललाटे यदि धारयेत् ॥ १४५ ॥ तद्विलोकन एव स्युः प्राणिनस्तस्य किंकराः ॥ राजपत्न्योऽपि विवशाः किमन्याः पुरयोषितः ॥
॥ १४६ ॥ एतज्जप्तं पिबेत्तोयं मासेन स्यान्महाकविः ॥ पण्डितश्च महावादी जायते नात्र संशयः ॥ १४७ ॥ अयुतं च पठेत्स्तोत्रं
पुरश्चरणसिद्धये ॥ दशांशं कमलैर्हुत्वा त्रिमध्वक्तैर्विधानतः ॥ १४८ ॥ स्वयमायाति कमला वाण्या सह तदालये ॥ मंत्रो निष्कील

तामात सुमुखी सुमुखी भवेत् ॥ १४९ ॥ अनंतं च भवेत्पुण्यमपुण्यं च क्षयं व्रजेत् ॥ पुष्करादिषु तीर्थेषु स्नानतो यत्फलं भवेत् ॥
॥ १५० ॥ तत्फलं लभते जंतुः सुमुख्याः स्तोत्रपाठतः ॥ एतदुक्तं रहस्यं ते स्वसर्वस्वं वरानने ॥ १५१ ॥ न प्रकाश्यं त्वया देवि
यदि सिद्धिं त्वमिच्छसि ॥ प्रकाशनादसिद्धिः स्यात्कुपिता सुमुखी भवेत् ॥ १५२ ॥ नातः परतरं लोके सिद्धिदं प्राणिनामिह ॥
॥ १५३ ॥ वन्दे श्रीसुमुखीं प्रसन्नवदनां पूर्णेन्दुबिम्बाननां सिन्दूरांकितमस्तकां मधुमदोल्लोलोच्चमुक्तावलीम् ॥ श्यामां कज्जलिकाकरां
करगतं चाध्यापयंतीं शुकं गुंजापुंजविभूषणां सकरुणामामुक्तवेणीलताम् ॥ १५४ ॥ इति श्रीनन्द्यावर्ततंत्रे उत्तरखण्डे मातंगीसहस्रनाम
स्तोत्रं सम्पूर्णम् ॥ अथ मातंगीहृदयप्रारंभः ॥ एकदा कौतुकाविष्टा भैरवं भूतसेवितम् ॥ भैरवी परिपप्रच्छ सर्वभूतहिते रता ॥ १ ॥
श्रीभैरव्युवाच ॥ भगवन्सर्वधर्मज्ञ भूतवात्सल्यभावन ॥ अहं तु वेत्तुमिच्छामि सर्वभूतोपकारकम् ॥ २ ॥ केन मंत्रेण जप्तेन स्तोत्रेण
पठितेन च ॥ सर्वथा श्रेयसां प्राप्तिर्भूतानां भूतिमिच्छताम् ॥३॥ श्रीभैरव उवाच ॥ शृणु देवि तव स्नेहात्प्रायो गोप्यमपि प्रिये ॥ कथ
यिष्यामि तत्सर्वं सुखसम्पत्करं शुभम् ॥ ४ ॥ पठतां शृण्वतां नित्यं सर्वसम्पत्तिदायकम् ॥ विद्यैश्वर्यसुखावाप्तिमंगलप्रदमुत्तमम् ॥ ५॥
मातंग्या हृदयं स्तोत्रं दुःखदारिद्र्यभञ्जनम् ॥ मंगलं मंगलानां च ह्यस्ति सर्वसुखप्रदम् ॥ ६ ॥ ॐ अस्य श्रीमातंगीहृदयस्तोत्र
मंत्रस्य दक्षिणामूर्तिर्ऋषिः । विराट् छन्दः । मातंगी देवता । ह्रीं बीजम् । हूं शक्तिः ।क्लीं कीलकम्।सर्ववांछितार्थसिद्धये पाठे विनियोगः॥
ॐ दक्षिणामूर्तिऋषये नमः शिरसि १ । विराट्छंदसे नमो मुखे २ । मातंगीदेवतायै नमः हृदि ३ । ह्रीं बीजाय नमो गुह्ये ४ । हूं
शक्तये नमः पादयोः ५ । क्लीं कीलकाय नमो नाभौ ६ । विनियोगाय नमोः सर्वांगे ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रीं हृदयाय
नमः १ । ॐ क्लीं शिरसे स्वाहा २ । ॐ हूं शिखायै वषट् ३ । ॐ ह्रीं कवचाय हुम् ४ । ॐ क्लीं नेत्रत्रयाय वौषट् ५ । ॐ हूं
अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ ह्रीं अंगुष्ठाभ्यां नमाः १ । ॐ क्लीं तर्जनीभ्यां नमः २ । ॐ हूं मध्यमाभ्यां नमः ३ ।
ॐ ह्रीं अनामिकाभ्यां नमः ४ । ॐ क्लीं कनिष्ठिकाभ्यां नमः ५ । ॐ हूं करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ अथ

ध्यानम् । ॐ श्यामां शुभ्रांशुभालां त्रिकमलनयनां रत्नसिंहासनस्थां भक्ताभीष्टप्रदात्रीं सुरनिकरकरासेव्यकंजांघ्रियुग्माम् ॥ नीलांभोजांशुकांतिं निशिचरनिकरारण्यदावाग्निरूपां पाशं खड्गं चतुर्भिर्वरकमलकरैः खेटकं चाङ्कुशं च॥(मातंगीमावहंतीमभिमतफलदां मोदिनीं चिंतयामि) ॥७॥ नमस्ते मातंग्यै मृदुमुदिततन्वै तनुमतां परश्रेयोदायै कमलचरणध्यानमनसाम् ॥ सदा संसेव्यायै सदसि विबुधैर्दिव्यधिषणैर्दयार्द्रायै देव्यै दुरितदलनोद्दण्डमनसे ॥ ८ ॥ परं मातस्ते यो जपति मनुमव्यग्रहृदयः कवित्वं कल्पानां कलयति सुकल्पः प्रतिपदम् ॥ अपि प्रायो रम्यामृतमयपदा तस्य ललिता नटींमन्या वाणी नटति रसनायां चपलिता ॥ ९ ॥ तव ध्यायंतो ये वपुरनुजपंति प्रवलितं सदा मंत्रं मातर्नहि भवति तेषां परिभवः ॥ कदम्बानां मालाः शिरसि तव युंजंति सदये भवंति प्रायस्ते युवतिजनयूथस्त्र वशगाः ॥१०॥ सरोजैः साहस्रैः सरसिजपदद्वन्द्वमपि ये सहस्रं नामोक्त्वा तदपि तव ङेऽन्तं मनुमितम् ॥ पृथङ्नाम्ना तेनायुतकलितमर्चंति खलु ते सदा देवव्रातप्रणमितपदांभोजयुगलाः ॥११॥ तव प्रीत्यै मातर्ददति बलिमाधाय बलिना समत्स्यं मांसं वा सुरुचिरसितं राजरुचितम् ॥ सुपुण्या ये स्वांतस्तवचरणमोदैकरसिका अहो भाग्यं तेषां त्रिभुवनमलं वश्यमखिलम् ॥ १२ ॥ लसल्लोलश्रोत्राभरणकिरणक्रांतिकलितं मितस्मित्यापन्नप्रतिभितममन्नं विकसितम्॥मुखांभोजं मातस्तव परिलुठद्भ्रूमधुकरं रमा ये ध्यायंति त्यजति नहि तेषां सुभवनम् ॥ १३ ॥ परः श्रीमातंग्या जयति हृदयाख्यः सुमनसामयं सेव्यः सद्योऽभिमतफलदश्चातिलालितः ॥ नरा ये शृण्वंति स्तवमपि पठंतीममानिशं न तेषां दुःप्राप्यं जगति यदलभ्यं दिविषदाम् ॥ १४ ॥ धनार्थी धनमाप्नोति दारार्थी सुन्दरीं प्रियाम् ॥ सुतार्थी लभते पुत्रं स्तवस्यास्य प्रकीर्त्तनात् ॥ १५ ॥ विद्यार्थी लभते विद्यां विविधां विभवप्रदाम् ॥ जयार्थी पठनादस्य जयं प्राप्नोति निश्चितम् ॥ १६ ॥ नष्टराज्यो लभेद्राज्यं सर्वसम्पत्समाश्रितम् ॥ कुबेरसमसम्पत्तिः स भवेद्धृदयं पठन् ॥ १७ ॥ किमत्र बहुनोक्तेन यद्यदिच्छति मानवः॥ मातंगीहृदयस्तोत्रपाठात्तत्सर्वमाप्नुयात् ॥ १८ ॥ इति श्रीदक्षिणामूर्तिसंहितायां श्रीमातंगीहृदयस्तोत्रं समाप्तम् ॥ इति श्रीमंत्रमहार्णवे मध्यखण्डे मातंगीतंत्रे द्वादशस्तरंगः ॥ १२ ॥ ॥ ॥ ॥ ॥ ॥ ॥

कमलात्मिकायै नमः ।




॥ श्रीगणेशाय नमः ॥ अथ कमलात्मिका (लक्ष्मी) तंत्रप्रारंभः ॥ तत्रादौ पटल प्रारंभः ॥ अथ वक्ष्ये श्रियो मंत्रान् श्रीसौभाग्यफलप्रदान् ॥ यस्याः कटाक्षमात्रेण त्रैलोक्यमतिवर्तते ॥ १ ॥ अथ लक्ष्म्या एकाक्षरबीजमंत्रप्रयोगः ॥ शारदा तिलके मंत्रो यथा-(श्रीं) इत्येकाक्षरबीजमंत्रः ॥ अस्य मंत्रस्य भृगुर्ऋषिः । निवृच्छंदः । श्रीलक्ष्मीर्देवता। मम धनाप्तये जपे विनियोगः । भृगुऋषये नमः शिरसि १। निवृच्छंदसे नमो मुखे २। श्रीलक्ष्मीदेवतायै नमो हृदि ३ । विनियोगाय नमः सर्वांगे ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ श्रां अंगुष्ठाभ्यां नमः १। ॐ श्रीं तर्जनीभ्यां नमः २। ॐ श्रूं मध्यमाभ्यां नमः ३। ॐ श्रैं अनामिकाभ्यां नमः ४ । ॐ श्रौं कनिष्ठिकाभ्यां नमः ५। ॐ श्रः करतलकरपृष्ठाभ्यां नमः ६॥ इति करन्यासः ॥ ॐ श्रां हृदयाय नमः १ ।ॐ श्रीं शिरसे स्वाहा २ । ॐ श्रूं शिखायै वषट् ३ ॥ ॐ श्रैं कवचाय हुम् ४। ॐ श्रौं नेत्रत्रयाय वौषट् ५। ॐ श्रः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः॥ एवं न्यासविधिं कृत्वा ध्यायेत् । अथ ध्यानम् । ॐ कांत्या कांचनसन्निभां हिमगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमाना श्रियम् । बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां क्षौमाबद्धनितंबबिंबलसितां वंदेऽरविन्दस्थिताम् ॥ १ ॥ एवं ध्यात्वा सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति पीठदेवताः संपूज्य । ततः पूर्वाद्यष्टसु दिक्षु नवपीठशक्तीः पूजयेत् । तथा च-ॐ विभूत्यै नमः १ । ॐ उन्नत्यै नमः २ । ॐ कांत्यै नमः ३। ॐ सृष्ट्यै नमः४।

ॐ कीर्त्यै नमः ५। ॐ सन्नत्यै नमः ६ । ॐ पुष्ट्यै नमः ७ । ॐ उत्कृष्टयै नमः ८ । पीठमध्ये । ॐ ऋद्ध्यै नमः ९ । इति पीठशक्तीः संपूजयेत् । ततः स्वर्णादिनिर्मितं यंत्रमग्न्युत्तारणपूर्वकं 'श्रीं कमलासनाय नमः' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्राणप्रतिष्ठां कृत्वा मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पान्तैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् । तद्यथा–षट्कोणकेसरेषु । अग्निकोणे। ॐ श्रां हृदयाय नमः १ । नैर्ऋत्ये । ॐ श्रीं शिरसे स्वाहा २ । वायव्ये । ॐ श्रूं शिखायै वषट् ३ । ऐशान्याम् । ॐ श्रैं कवचायै हुम् ४ । पूज्यपूजकयोर्मध्ये । ॐ श्रौं नेत्रत्रयाय वौषट् ५ । देवीपश्चिमे । ॐ श्रः अस्त्राय फट् ६ । इति षडंगानि पूजयेत् । ततः पुष्पाञ्जलिमादाय मूलमुच्चार्य ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् । इति प्रथमावरणम् ॥ १ ॥ पूज्यपूजकयोरंतरालं प्राची तदनुसारेणान्या दिशः प्रकल्प्य प्राच्यादिचतुर्दिक्षु विदिक्षु च । पूर्वे । ॐ वासुदेवाय नमः वासुदेवश्रीपादुकां पूजयामि तर्पयामि नमः १ । इति सर्वत्र । दक्षिणे । ॐ संकर्षणाय नमः संकर्षणश्रीपा० २ । पश्चिमे । ॐ प्रद्युम्नाय नमः प्रद्युम्नश्रीपा० ३ । उत्तरे । ॐ अनिरुद्धाय नमः अनिरुद्धश्रीपा० ४ । अग्निकोणे । ॐ दमकाय नमः दमकश्रीपा० ५ । निर्ऋतिकोणे । ॐ सलिलाय नमः सलिलश्रीपा० ६ । वायव्ये । ॐ गुग्गुलाय नमः गुग्गुलश्रीपा० ७ । ऐशान्याम् ॐ कुरुंटकाय नमः कुरुंटकश्रीपा० ८ । देव्या दक्षिणे । ॐ शंखनिधये नमः शंखनिधिश्रीपा० ९ । ॐ वसुधायै नमः वसुधाश्रीपा० १० । वामे । ॐ पद्मनिधये नमः पद्मनिधिश्रीपा० ११ । ॐ वसुमत्यै नमः वसुमतीश्रीपा० १२ ॥ इति द्वादशदेवतानि पूजयित्वा पुष्पांजलिं दद्यात् । इति द्वितीयावरणम् ॥ २ ॥ ततः पत्राग्रेषु पूर्वादिक्रमेण । ॐ बलाक्यै नमः बलाकीश्रीपा० १ । ॐ विमलायै नमः विमलाश्रीपा० २ । ॐ कमलायै नमः कमलाश्रीपा० ३ । ॐ वनमालिकायै नमः वनमालिकाश्रीपा० ४ । ॐ विभीषिकायै नमः विभीषिकाश्रीपा० ५ । ॐ मालिकायै नमः मालिकाश्रीपा० ६ । ॐ शांकर्य्यै नमः शांकरीश्रीपा० ७ । ॐ वसुमालिकायै नमः वसुमालिकाश्रीपा० ८ । इति पूजयित्वा पुष्पांजलिं दद्यात् ।

इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुरे पूर्वादिक्रमेण । ॐ लं इन्द्राय नमः १। ॐ रं अग्नये नमः २। ॐ मं यमाय नमः ३। ॐ क्षं निर्ऋतये नमः ४। ॐ वं वरुणाय नमः ५। ॐ यं वायवे नमः ६। ॐ कुं कुबेराय नमः ७। ॐ हं ईशानाय नमः ८। ईशानपूर्वयोर्मध्ये। ॐ आं ब्रह्मणे नमः ९। निर्ऋति पाश्चिमयोर्मध्ये। ॐ ह्रीं अनंताय नमः १०॥ इति दशदिक्पालान् पूजयेत्॥ तद्बाह्ये ॐ वं वज्राय नमः १। ॐ शं शक्तये नमः २। ॐ दं दंडाय नमः ३। ॐ खं खड्गाय नमः ४। ॐ पां पाशाय नमः ५। ॐ अं अङ्कुशाय नमः ६। ॐ गं गदायै नमः ७। ॐ त्रिं त्रिशूलाय नमः ८। ॐ पं पद्माय नमः ९। ॐ चं चक्राय नमः १०। इत्यस्त्राणि पूजयेत्॥ इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः। द्वादशसहस्रकमलपुष्पहोमः।तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि च कुर्यात्॥ एवं कृते मंत्रः सिद्धो भवति॥सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत्॥तथा च–भानुलक्षं जपेन्मंत्रं दीक्षितो विजितेन्द्रियः॥ तत्सहस्रं प्रजुहुयात्कमलैर्मधुरोक्षितैः॥ १॥

छद्म्येकाक्षरबीजमन्त्रपूजनम् ।




जपांते जुहुयान्मंत्री तिलैर्वा मधुराप्लुतैः॥ बैल्वैः फलैर्वा जुहुयात्त्रिभिर्वा साधकोत्तमः॥ २॥ इत्थं यो भजते देवीं विधिना साधकोत्तमः॥ धनधान्यसमृद्धिः स्याच्छ्रियमाप्नोत्यनिंदिताम्॥ ३॥ वक्षःप्रमाणे सलिले स्थित्वा मंत्रमिमं जपेत्॥ त्रिलक्षं प्रजपेन्मंत्रं वांछितं लभते धनम्॥ ४॥ अशोकवह्नौ जुहुयात्तंडुलराज्यलोलितैः॥ वशयत्यचिरादेव त्रैलोक्यमपि मंत्रवित्॥ ५॥ जुहुया

तंडुलैः शुद्धैरर्काग्नौ नियुतं वशी ॥ राज्यश्रियमवाप्नोति राजपुत्रो महीयसीम् ॥ ६ ॥ जुहुयात्खादिरे वह्नौ तंडुलैर्मधुरोक्षितैः ॥ राजा वश्यो भवेच्छीघ्रं महालक्ष्मीश्च वर्द्धते ॥ ७ ॥ बिल्वच्छायामधिवसन् बिल्वमिश्रहविष्यभुक् ॥ संवत्सरद्वयं हुत्वा तत्फलैरथवांबुजैः ॥ ८ ॥ साधकेन्द्रो महालक्ष्मीं चक्षुषा पश्यति ध्रुवम् ॥ हविषा घृतसिक्तेन पायसेन ससर्पिषा ॥ ९ ॥ हुत्वा श्रियमवाप्नोति नियुतं मंत्रवित्तमः ॥ मधुराक्तारुणांभोजैर्जुहुयाल्लक्षमादरात् ॥ न मुंचति रमा तस्य वंशमाभूतसंप्लवम् ॥ १० ॥ इत्येकाक्षरलक्ष्मीबीजमंत्रप्रयोगः ॥ अथ चतुरक्षरलक्ष्मीबीजमंत्रप्रयोगः ॥ शारदातिलके मंत्रो यथा—'ऐं श्रीं ह्रीं क्लीं'। इति चतुरक्षरो लक्ष्मीबीजात्मको मंत्रः ॥ ॐ श्रीं अंगुष्ठाभ्यां नमः १ । ॐ श्रीं तर्जनीभ्यां नमः २ । ॐ श्रूं मध्यमाभ्यां नमः ३ । ॐ श्रैं अनामिकाभ्यां नमः ४ । ॐ श्रौं कनिष्ठिकाभ्यां नमः ५ । ॐ श्रः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ श्रीं हृदयाय नमः १ । ॐ श्रीं शिरसे स्वाहा २ । ॐ श्रूं शिखायै वषट् ३ । ॐ श्रैं कवचाय हुम् ४ । ॐ श्रौं नेत्रत्रयाय वौषट् ५ । ॐ श्रः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत् ॥ ॐ माणिक्यप्रतिमप्रभां हिमनिभैस्तुंगैश्चतुर्भिर्गजैर्हस्ताग्राहितरत्नकुंभसलिलैरासिच्यमानां मुदा ॥ हस्ताब्जैर्वरदानमंबुजयुगाभीतीर्दधानां हरेः कांतां कांक्षितपारिजातलतिकां वंदे सरोजासनाम् ॥ १ ॥ इति ध्यायेत् ॥ अस्य पूजादिकं सर्वं पूर्ववत् ॥ अस्य पुरश्चरणं द्वादशलक्षजपः ॥ तथाच—भानुलक्षं हविष्याशी जपेदंते सरोरुहैः ॥ जुहुयादरुणैः फुल्लैस्तत्सहस्रं जितेन्द्रियः ॥ १ ॥ कुर्य्यात्प्रयोगांस्तत्रस्थान्मनुना तेन साधकः ॥ निधिभिः सेव्यते नित्यं मूर्तिमद्भिरुपासितैः ॥ २ ॥ इति चतुरक्षरलक्ष्मीबीजात्मकमंत्रप्रयोगः ॥ अथ दशाक्षरलक्ष्मीमंत्रप्रयोगः ॥ शारदातिलके मंत्रो यथा—'ॐ नमः कमलवासिन्यै स्वाहा' ॥ इति दशाक्षरमंत्रः ॥ अस्य मंत्रस्य दक्ष ऋषिः । विराट् छंदः। श्रीलक्ष्मीर्देवता॥सर्वेष्टसिद्धये जपे विनियोगः॥ दक्षऋषये नमः शिरसि १ । विराट्छंदसे नमः मुखे २ । श्रियै देवतायै नमः हृदि ३ । विनियोगाय नमः सर्वांगे ४ । इति ऋष्यादिन्यासः॥ ॐ देव्यै नमोऽगुष्ठाभ्यां नमः १ । ॐ पद्मिन्यै नमस्तर्जनीभ्यां नमः २ । ॐ विष्णुपत्न्यै नमो मध्यमाभ्यां नमः ३ । ॐ वरदायै नमोऽनामिकाभ्यां नमः ४ । ॐ कमलायै नमः कनिष्ठिकाभ्यां

नमः ५॥ इति करन्यासः ॥ ॐ देव्यै नमो हृदयाय नमः १ । ॐ पद्मिन्यै नमः शिरसे स्वाहा २ । ॐ विष्णुपत्न्यै नमः शिखायै वषट् ३ । ॐ वरदायै नमः कवचाय हुम् ४ । ॐ कमलायै नमः अस्त्राय फट् ५ ॥ इति नेत्रहीनपंचांगन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत् ॥ ॐ आसीना सरसीरुहे स्मितमुखी हस्तांबुजैर्बिभ्रती दानं पद्मयुगाभये च वपुषा सौदामिनीसन्निभा ॥ मुक्ताहारविराजमानपृथुलोत्तुंगस्तनोद्भासिनी पायाद्वः कमला कटाक्षविभवैरानंदयंती हरिम् ॥ १ ॥ एवं ध्यात्वा पूर्वोक्तपीठशक्तिभिः सह पीठपूजां विधाय ततः स्वर्णादिनिर्मितं यंत्रम् आसनमंत्रेणासनं दत्त्वा पीठमध्ये संस्थाप्य पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्यावाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तत्र क्रमः ॥ षट्कोणकेसरेषु । अग्निकोणे । ॐ देव्यै नमो हृदयाय नमः ॥ १ ॥ निर्ऋतिकोणे । ॐ पद्मिन्यै नमः शिरसे स्वाहा २ । वायव्ये । ॐ विष्णपत्न्यै नमः शिखायै वषट् ३ । ऐशान्याम् । ॐ वरदाय नमः कवचाय हुम् ४ ।

लक्ष्मीदशाक्षरमन्त्रयन्त्रम्.




देवीपश्चिमे । ॐ कमलरूपायै नमोऽस्त्राय फट् ५ । इति पंचांगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा विशेषार्घ्यबिंदुं निक्षिप्य पूजिता

१ पंचांगानि मनोर्थत्र तत्र नेत्रमतु त्यजेत्

स्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥१॥ ततः पूज्यपूजकयोरंतरालं प्राची । तदनुसारेण अन्याः दिशः प्रकल्प्याष्टदलेषु प्राची क्रमेण । ॐ बलाक्यै नमः १ । ॐ विमलायै नमः २ । ॐ कमलायै नमः ३ । ॐ वनमालिकायै नमः ४ । ॐ विभीषिकायै नमः ५ । ॐ मालिकायै नमः ६ । ॐ शांकर्यै नमः ७ । ॐ वसुमालिकायै नमः ८ । इत्यष्टौ पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्विती यावरणम् ॥ २ ॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादीन् वज्रादींश्च पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपांश्च कुर्यात् । अस्य पुरश्चरणं दशलक्षजपः । जपदशांशेन होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथाच–दशलक्षं जपेन्मंत्रं मंत्रविद्विजितेन्द्रियः ॥ दशांशं जुहुयान्मंत्री मधु राक्तैः सरोरुहैः ॥ १ ॥ इति संपूजयेद्देवीं संपदामालयं भवेत् ॥ समुद्रगायां सरिति कंठमात्रे जले स्थितः ॥ २ ॥ त्रिलक्षं प्रजपे न्मंत्री साक्षाद्वैश्रवणो भवेत् ॥ आराध्योत्तरनक्षत्रे देवीं स्रक्चंदनादिभिः ॥ ३ ॥ नंद्यावर्तभवैः पुष्पैः सहस्रं जुहुयात्ततः ॥ पूर्णमास्यां फलैर्बैल्वैर्जुहुयान्मधुराप्लुतैः ॥ ४ ॥ पंचम्यां विशदांभोजैः शुक्रवारे सुगंधिभिः ॥ अन्यैर्वा विशदैः पुष्पैः प्रतिमासं विशालधीः ॥ स भवेदब्दमात्रेण सर्वदा संपदां निधिः ॥ ५ ॥ इति दशाक्षरलक्ष्मीमंत्रप्रयोगः ॥ अथ सप्तविंशत्य क्षरमहालक्ष्मीमंत्रप्रयोगः ॥ शारदायां मंत्रो यथा–ॐ श्रीं ह्रीं श्रीं कमले कमलालये प्रसीद प्रसीद श्रीं ह्रीं श्रीं महालक्ष्म्यै नमः ॥ इति सप्तविंशत्यक्षरो मंत्रः ॥ अस्य विधानम्–अस्य मंत्रस्य ब्रह्मा ऋषिः । गायत्रीच्छंदः । श्रीमहालक्ष्मीर्देवता । श्रीं बीजम् । नमः शक्तिः।सर्वेष्टसिद्धये जपे विनियोगः ॥ॐब्रह्मऋषये नमः शिरसि १ । ॐगायत्रीच्छंदसे नमः मुखे २ । ॐमहालक्ष्मीदेवतायै नमः हृदि ३ । ॐ श्रीं बीजाय नमः गुह्ये ४। ॐ नमःशक्तये नमः पादयोः ५ ।ॐविनियोगाय नमः सर्वांगे॥इति ऋष्यादिन्यासः ॥ ॐ श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं अंगुष्ठाभ्यां नमः १ । ॐ श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं तर्जनीभ्यां नमः २ ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं मध्यमाभ्यां नमः ३ । ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं अनामिकाभ्यां नमः ४ । ॐ श्रीं ह्रीं श्रीं महालक्ष्म्यै श्रीं ह्रीं श्रीं

लक्ष्मीचतुर्विंशत्यक्षरमन्त्रपूजनम्.



कनिष्ठिकाभ्यां नमः ५ ॥ इति करन्यासः ॥ ॐ श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं हृदयाय नमः १ । ॐ श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं शिरसे स्वाहा २ । ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं शिखायै वषट् ३ । ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं कवचाय हुम् ४ । ॐ श्रीं ह्रीं श्रीं महालक्ष्म्यै श्रीं ह्रीं श्रीं अस्त्राय फट् ५ ॥ इति नेत्रहीनपंचांगन्यासः ॥ एवं न्यासविधिं कृत्वा ध्यायेत् ॥ ॐ सिंदूरारुणकांतिमब्जवसतिं सौंदर्यवारांनिधिं कोटीरांगदहारकुंडलकटीसूत्रादिभिर्भूषिताम्॥हस्ताब्जैर्वसुपत्रमब्जयुगलादर्शौ वहंतीं परामावीतां परिचारिकाभिरनिशं ध्यायेत्प्रियां शार्ङ्गिणः ॥ १ ॥ इति ध्यात्वा पूर्ववत् पीठपूजां विधाय स्वर्णादिनिर्मितं यंत्रम् अग्न्युत्तारणपूर्वकमासनमंत्रेणासनं दत्त्वा पीठमध्ये संस्थाप्य पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्यावाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तथाच—षट्कोणकेसरेषु अग्निकोणे ॐ श्रीं ह्रीं श्रीं कमले श्रीं ह्रीं श्रीं हृदयाय नमः १ । निर्ऋतिकोणे ॐ श्रीं ह्रीं श्रीं कमलालये श्रीं ह्रीं श्रीं शिरसे स्वाहा २ । वायव्ये ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं शिखायै वषट् ३ । ऐशान्याम् ॐ श्रीं ह्रीं श्रीं प्रसीद श्रीं ह्रीं श्रीं कवचायै हुम् ४ । देवीपश्चिमे ॐ श्रीं ह्रीं श्रीं महालक्ष्म्यै श्रीं ह्रीं श्रीं अस्त्रायफट् ५ ॥ इति पंचांगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य—ॐ अभीष्टसिद्धिं मे देहि शरणागत

१ पंचांगानि मनोर्यत्र तत्र नेत्रमनुं त्यजेत् ॥

वत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य ततोऽष्टदलेषु पूर्वादिक्रमेण । ॐ श्रीधराय नमः श्रीधरश्रीपादुकां पूजयामि तर्पयामि नमः १ । इति सर्वत्र । ॐ हृषीकेशाय नमः हृषीकेशश्रीपा० २ । ॐ वैकुंठाय नमः वैकुंठश्रीपा० ३ । ॐ विश्वरूपाय नमः विश्वरूपश्रीपा० ४ । ॐ वासुदेवाय नमः वासुदेवश्रीपा० ५ । ॐ संकर्षणाय नमः संकर्षणश्रीपा० ६ । ॐ प्रद्युम्नाय नमः प्रद्युम्नश्रीपा० ७ । ॐ अनिरुद्धाय नमः अनिरुद्धश्रीपा० ८ । इत्यष्टौ पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ ततोऽष्टदलमध्येषु पूर्वादिक्रमेण । ॐ भारत्यै नमः भारतीश्रीपा० १ । ॐ पार्वत्यै नमः पार्वतीश्रीपा० २ । ॐ चान्द्र्यै नमः चान्द्रीश्रीपा० ३ । ॐ शच्यै नमः शचीश्रीपा० ४ । ॐ दमकायै नमः दमकाश्रीपा० ५ । ॐ सलिलाय नमः सलिलश्रीपा० ६ । ॐ गुग्गुलवे नमः गुग्गुलुश्रीपा० ७ । कुरुण्टकाय नमः कुरुण्टकश्रीपा० ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणम् ॥ ततोऽष्टदलाग्रेषु । ॐ अनुरागाय महालक्ष्मीबाणाय नमः १ । ॐ संवादाय महालक्ष्मीबाणाय नमः २ । ॐ विजयाय महालक्ष्मीबाणाय नमः ३ । ॐ वल्लभाय महालक्ष्मीबाणाय नमः ४ । ॐ मदाय महालक्ष्मीबाणाय नमः ५ । ॐ हर्षाय महालक्ष्मीबाणाय नमः ६ । ॐ बलाय महालक्ष्मीबाणाय नमः ७ । ॐ तेजसे महालक्ष्मीबाणाय नमः ८ ॥ इत्यष्टौ बाणान् पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणम् ॥ ततो भूपुरे पूर्वादिक्रमेण इंद्रादीन् वज्रादींश्च पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं लक्षजपः । तत्तद्दशांशेन होमतर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति ॥ सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथाच–लक्षं जपेत्फलैर्बैल्वैर्जुहुयान्मधुरोक्षितैः ॥ दशांशसंस्कृते वह्नौ प्राक्प्रोक्तेनैव वर्त्मना ॥ १ ॥ अनेन विधिना देवीं महालक्ष्मीमुपासते ॥ ये तेषु निवसेल्लक्ष्मीरस्मरंती निजालयम् ॥ २ ॥ उत्पलैर्जुहुय लक्षं चंदनांभसि लोलितैः ॥ शत्रूणां लभते राज्यं विना युद्धेन पार्थिवः ॥ ३ ॥ जपन्राजसभां गच्छेत्संभाव्येत तया नरः ॥


दूर्वा देवी महालक्ष्मीर्विष्णुकांता मधुव्रता ॥ ४ ॥ मुशली शत्रुवल्ली च सदाभद्रांजलिप्रिया ॥ हरिचंदनकर्पूरचंदनाकोलरोचनाः ॥ ५ ॥ मालूरकेसरौ कुष्ठं सर्वं पिष्ट्वा निशारसैः ॥ अष्टोत्तरसहस्रं तु जपित्वा तिलकक्रियाम् ॥ ६ ॥ कुर्वतो मंत्रिणः सर्वे वशे तिष्ठंत्यहर्निशम् ॥ श्रियो मंत्रं भजेन्मंत्री श्रीसूक्तान्यपि संजपेत् ॥ ७ ॥ भूयसीं श्रियमाकांक्षन् सत्यवादी भवेत्सदा ॥ प्रत्यगाशामुखोऽश्नीयात्स्थितः पूर्वं प्रियं वदेत् ॥ ८ ॥ पूजयेद्गंधपुष्पाद्यैरात्मानं नियतः शुचिः ॥ शयीत शुद्धशय्यायां तरुण्या सह नान्यथा ॥ ९ ॥ नग्नो नावतरेदंभस्तैलाभ्यक्तो न भक्षयेत् ॥ हरिद्रां न मुखे लिंपेन्न स्वपेदशुचिः कचित् ॥ १० ॥ न वृथा विलिखेद्भूमिं न बिल्वं द्रोणमंबुजम् ॥ धारयेन्मूर्ध्नि नैवाद्यात्लोणं तैलं च केवलम् ॥११॥ मलिनो न भवेज्जातु कुत्सितान्नं न भक्षयेत् ॥ द्रोणपंकजबिल्वानि पद्भ्यां जातु न लंघयेत् ॥ १२ ॥ सहदेवीमिंद्रवल्लीं श्रीवल्लीं विष्णुवल्लभाम् ॥ कन्यांबुजप्रवालं च धारयेन्मूर्ध्नि सर्वदा ॥ १३ ॥ इत्याचारपरो नित्यं विष्णुभक्तो दृढव्रतः ॥ श्रियमाप्नोति महतीं देवानामपि दुर्लभाम् ॥ १४ ॥ इति सप्तविंशत्यक्षरमहालक्ष्मीमंत्रप्रयोगः ॥ अथ द्वादशाक्षरमहालक्ष्मीमंत्रप्रयोगः॥शारदातिलके मंत्रो यथा—'ऐं ह्रीं श्रीं क्लीं सौं जगत्प्रसूत्यै नमः' ॥ इति द्वादशाक्षरो मंत्रः । अस्य विधानम्—अस्य मंत्रस्य ब्रह्मा ऋषिः।गायत्री च्छंदः।श्रीजगन्माता महालक्ष्मीर्देवता।श्रींबीजम्।सर्वेष्टसिद्धये जपे विनियोगः॥ॐ ब्रह्मऋषये नमः शिरसि १। गायत्रीच्छंदसे नमः मुखे २ । श्रीजगन्मातृमहालक्ष्म्यै नमः हृदि ३ । श्रीं बीजाय नमः गुह्ये ४। विनियोगाय नमः सर्वांगे ५ । इति ऋष्यादिन्यासः ॥ ततो मूलेन करौ संशोध्य । ॐ ऐं अंगुष्ठाभ्यां नमः १ । ॐ ह्रीं तर्जनीभ्यां नमः २ । ॐ श्रीं मध्यमाभ्यां नमः ३ । ॐ क्लीं अनामिकाभ्यां नमः ४ । ॐ सौं कनिष्ठिकाभ्यां नमः ५ । ॐ जगत्प्रसूत्यै करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ततः 'ऐं ह्रीं श्रीं क्लीं सौं जगत्प्रसूत्यै नमः' इति मस्तकादिचरणान्तं व्यापकं न्यसेत् ॥ इति विन्यस्य मंत्रवर्णन्यासं कुर्यात् ॥तद्यथा—ॐ ऐं नमः मूर्ध्नि १ । ॐ ह्रीं नमः मुखे २ । ॐ श्रीं नमः हृदये ३ । ॐ क्लीं नमः गुह्ये ४ । ॐ सौं नमः पादयोः ५ ॥ इति विन्यस्य हृदये करं दत्त्वा सप्तवर्णान् न्यसेत् ॥ तत्र क्रमः—ॐ जं नमः त्वचि ६ । ॐ गत् नमः रक्ते ७ । ॐ प्रं नमः मांसे ८ । ॐ सूं

नमः मेदसि ९। ॐ त्यैं नमः अस्थिन १०। ॐ नं नमः मज्जायाम् ११ । ॐ मं नमः शुक्रे १२॥ इति विन्यसेत् ॥ इति मंत्र वर्णन्यासः ॥ ॐ ऐं ज्ञानाय अंगुष्ठाभ्यां नमः १। ॐ ह्रीं ऐश्वर्य्याय तर्जनीभ्यां नमः २। ॐ श्रीं शक्तये मध्यमाभ्यां नमः ३। ॐ क्लीं बलाय अनामिकाभ्यां नमः ४। ॐ सौं वीर्याय कनिष्ठिकाभ्यां नमः ५। ॐ जगत्प्रसूत्यैं नमस्तेजसे करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ ऐं ज्ञानाय हृदयाय नमः १। ॐ ह्रीं ऐश्वर्याय शिरसे स्वाहा २। ॐ श्रीं शक्तये शिखायै वषट् ३। ॐ क्लीं बलाय कवचाय हुम् ४। ॐ सौं वीर्याय नेत्रत्रयाय वौषट् ५ । ॐ जगत्प्रसूत्यै नमस्तेजसे अस्त्राय फट् ६॥ इति हृदयादिषडंग न्यासः॥ एवं न्यासविधिं कृत्वोद्यानस्मरणं कुर्यात् तथाच—चंपकाशोकपुन्नागपाटलैरुपशोभितम् ॥ लवंगमालतीबिल्वदेवदारुनमे रुभिः॥ १ ॥ मंदारपारिजाताद्यैः कल्पवृक्षैः सुपुष्पितैः॥ चंदनैः कर्णिकारैश्च मातुलिंगैश्च वंजुलैः ॥ २ ॥ दाडिमीलकुचांकोलैः पूगैः कुरवकैरपि॥ कदलीकुंदमंदारनालिकेरैरलंकृतैः॥ ३ ॥ अन्यैः सुगंधिपुष्पाद्यैर्वृक्षसंघैश्च मंडितम् ॥ मालतीमल्लिकाजातीकेतकी शतपत्रकैः ॥ ४ ॥ पारंतीतुलसीनंद्यावर्तैर्दमनकैरपि ॥ सर्वर्तुकुसुमोपेतैर्नमद्भिरुपशोभितम् ॥ ५ ॥ मंदमारुतसंभिन्नकुसुमा मोदिदिङ्मुखम् ॥ तस्य मध्ये सदोत्फुल्लैः कुमुदोत्पलपंकजैः ॥ ६ ॥ सौगंधिकैश्च कह्लारैर्नवैः कुवलयैरपि ॥ हंससारसकारंडै र्भ्रमरैश्चक्रनानभिः ॥ ७ ॥ अन्यैः कलकलारावैर्विहंगैरुपशोभितम् ॥ महासरसि तन्मध्ये पुलिनेऽतिमनोहरे ॥ ८ ॥ परितः पारिजाताद्यं मंडपं मणिकुट्टिमम् ॥ उद्यदादित्यसंकाशं भास्वरं शशिशीतलम् ॥ ९ ॥ चतुर्द्वारसमायुक्तं हेमप्राकार शोभितम् ॥ रत्नोपक्लृप्तिसंशोभिकपाटाष्टकसंयुतम् ॥ १० ॥ नवरत्नसमाक्लृप्तं तुंगगोपुरतोरणम् ॥ हेमदंडसमालंबिध्वजाव लिपारिष्कृतम् ॥ ११ ॥ नवरत्नसमाबद्धस्तंभराजिविराजितम् ॥ सहस्रदीपसंयुक्तदीपं दंडविराजितम् ॥ १२ ॥ तप्तहाटक संक्लृप्तवातायनमनोहरम् ॥ नानावर्णांशुकोद्बद्धसुवर्णशतकोटिभिः ॥ १३ ॥ किंकिणीमल्लिकायुक्तपताकाभिरलंकृतम् ॥ जातरूपमयै रत्नविचित्रैरतिविस्तृतैः ॥ १४ ॥ माणिक्यरत्नवैदूर्य्यस्वर्णमालावलीयुतैः ॥ अंतरांतरसंबद्धरत्नैर्दृष्टिमनोहरैः ॥ १५ ॥ विचित्रै

श्चित्रवर्णैश्च वितानैरुपशोभितम् ॥ सवर्रत्नसमायुक्तं हेमकुट्टिममुज्ज्वलम् ॥ १६ ॥ केतकीमालतीजातीचंपकोत्पलकेसरैः ॥ मल्लिका
तुलसीजातीनंद्यावर्तकदंबकैः ॥ १७ ॥ एतैरन्यैश्च कुसुमैरलंकृतमहीतलम् ॥ अंबुकाश्मीरकस्तूरीमृगनाभितमालकैः ॥ १८ ॥
चंदनागुरुकर्पूरैरामोदितदिगंतरम् ॥ एवं संचिंत्य मनसा मंडपं सुमनोहरम् ॥ १९ ॥ तन्मध्ये भावयेन्मंत्री पारिजातं मनोहरम् ॥
तस्याधस्तात्स्मरेन्मंत्री रत्नसिंहासनं शुभम् ॥ तस्मिन्संचिंतयेद्देवीं महालक्ष्मीं मनोरमाम् ॥ २० ॥ इत्युद्यानस्मरणं कृत्वा महालक्ष्मीं
ध्यायेत् ॥ अथ ध्यानम्—बालार्कद्युतिमिंदुखंडविलसत्कोटीरहारोज्ज्वलां रत्नाकल्पविभूषितां कुचनतां शालैः करैर्मंजरीम् ॥ पद्मं कौस्तुभ
रत्नमप्यविरतं संबिभ्रतीं सस्मितां फुल्लांभोजविलोचनत्रययुतां ध्यायेत्परां देवताम् ॥ १ ॥ सिंजन्मंजीरसंशोभिपदांभोजविराजिताम् ॥
नवरत्नगणाकीर्णकांचीदामविभूषिताम् ॥ २ ॥ मुक्तामाणिक्यवैदूर्यसंबद्धोदरबंधनाम् ॥ विभ्राजमानां मध्येन वलित्रितयशोभिताम् ॥
॥ ३ ॥ जाह्नवीसरिदावर्तशोभिनाभिविभूषिताम् ॥ पाटीरपंककर्पूरकुंकुमालंकृतस्तनीम् ॥ ४ ॥ वारिवाहविनिर्मुक्तमुक्तादामगरी
यसीम् ॥ वहंतीमुत्तरासंगं दुकुलपरिकल्पिताम् ॥ ५ ॥ तप्तकांचनसन्नद्धवैदूर्यांगदभूषणाम् ॥ पद्मरागस्फुरद्रूर्णकंकणाढ्यकरांबुजाम् ॥
॥ ६ ॥ माणिक्यशकलाबद्धमुद्रिकाभिरलंकृताम् ॥ तप्तहाटकसंक्लृप्तमालाग्रैवेयशोभिताम् ॥ ७ ॥ विचित्रविविधाकल्पकंबुसंकाशकंध
राम् ॥ उद्यद्दिनकराकारमणिताटंकमंडिताम् ॥ ८ ॥ रत्नांकितलसत्स्वर्णकर्णपूरोपशोभिताम् ॥ जयाविद्रुमलावण्यललिताधरपल्लवाम्
॥ ९ ॥ दाडिमीफलबीजाभदंतपंक्तिविभूषिताम् ॥ कलंककार्श्यनिर्मुक्तशरच्चंद्रनिभाननाम् ॥ १० ॥ पुंडरीकदलाकारनयनत्रय
सुंदरीम् ॥ भ्रूलताजितकंदर्पकरकार्मुकविभ्रमाम् ॥ ११ ॥ विलसत्तिलपुष्पश्रीविजयोद्यतनासिकाम् ॥ ललाटकांतिविभवविजितार्द्ध
सुधाकराम् ॥ १२ ॥ सांद्रसौरभसंपन्नकस्तूरीतिलकांकिताम् ॥ मत्तालिमालाविलसदलकाढ्यमुखांबुजाम् ॥ १३ ॥ पारिजात
प्रसूनश्रीवाहिधम्मिल्लबंधनाम् ॥ अनर्घ्यरत्नघटितमुकुटांकितमस्तकाम् ॥ १४ ॥ सर्वलावण्यवसतिं भवनं विभ्रमाश्रियः ॥ तेजसां जन्म
भूमिं तां महालक्ष्मीं मनोहराम् ॥ १५ ॥ इति ध्यात्वा सर्वतोभद्रमंडले पूर्ववत् पीठपूजां विधाय स्वर्णादिनिर्मितं यंत्रममग्न्युत्तारणपूर्वक

मासनमंत्रेणासनं दत्त्वा पीठमध्ये संस्थाप्य पुनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्यावाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्य्यात् ॥ तत्र क्रमः—देव्या दक्षिणे ॐ शंकरनंदनाय नमः । शंकरनंदनश्रीपादुकां पूजयामि तर्पयामि नमः १ । एवं सर्वत्र ॥ देव्या वामे ॐ पुष्पधन्वने नमः । पुष्पधन्वश्रीपा० २ । इति पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य—ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततः षट्कोणकेसरेषु अग्निकोणे ॐ ऐं ज्ञानाय हृदयाय नमः । हृदयश्रीपा० १ । निर्ऋतिकोणे ॐ ह्रीं ऐश्वर्याय शिरसे स्वाहा । शिरःश्रीपा० २ । वायव्ये ॐ श्रीं शक्तये शिखायै वषट् । शिखाश्रीपा० ३ । ऐशान्याम् ॐ क्लीं बलाय कवचाय हुम् । कवचश्रीपा० ४ । पूज्यपूजकयोर्मध्ये ॐ सौं वीर्याय नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ५ । देव्याः पश्चिमे ॐ जगत्प्रसूत्यै नमस्तेजसे अस्त्राय फट् । अस्त्रश्रीपा० ६ । इति षडंगानि पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टदलेषु पूज्यपूजकयोर्मध्ये प्राची । तदनुसारेण अन्या दिशः प्रकल्प्य पूर्वादिक्रमेण । ॐ उमायै नमः । उमाश्रीपा० १ । ॐ श्रियै नमः । श्रीश्रीपा० २ ।

द्वादशाक्षरमहालक्ष्मीमन्त्रयन्त्रम् ।



१-श्रीपदं पूर्वमुच्चार्य पादुकापदमुद्धरेत् ॥ पूजयामि नमः पश्चात्पूजयेदंगदेवताः ॥ १ ॥

ॐ सरस्वत्यै नमः । सरस्वतीश्रीपा० ३ । ॐ दुर्गायै नमः । दुर्गाश्रीपादुकां पू० ४ । ॐ धरण्यै नमः धरणिश्रीपा० ५ । ॐ गायत्र्यै नमः । गायत्रीश्रीपा० ६ । ॐ देव्यै नमः । देवीश्रीपा० ७ । ॐ उषायै नमः । उषाश्रीपा० ८ ॥ इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो देव्या दक्षिणे ॐ जह्नुसुतायै नमः । जह्नुसुताश्रीपा० १ । देव्या वामे ॐ सूर्य्यसुतायै नमः । सूर्य्यसुताश्रीपा० २ । ततः पुनर्देव्या दक्षिणे ॐ शंखनिधये नमः । शंखनिधिश्रीपा० ३ । पुनर्देव्या वामे ॐ पद्मनिधये नमः । पद्मनिधिश्रीपा० ४ । पश्चिमे धृतातपत्रं वरुणं पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततोऽष्टदलाग्रेषु पूर्वादिक्रमेण ॐ सूर्य्याय नमः । सूर्य्यश्रीपा० १ । ॐ सोमाय नमः । सोमश्रीपा० २ । ॐ भौमाय नमः । भौमश्रीपा० ३ । ॐ बुधाय नमः । बुधश्रीपा० ४ । ॐ बृहस्पतये नमः । बृहस्पतिश्रीपा० ५ । ॐ शुक्राय नमः । शुक्रश्रीपा० ६ । ॐ शनैश्चराय नमः । शनैश्चरश्रीपा० ७ । ॐ राहवे केतवे नमः । राहुकेतुश्रीपा० ८ । इति नवग्रहान् पूजयित्वा पुष्पांजलिं दद्यात ॥ इति पंचमावरणम् ॥ ५ ॥ ततो भूपुराभ्यंतरे ॐ ऐरावताय नमः । ऐरावतश्रीपा० १ । ॐ पुंडरीकाय नमः । पुंडरीकश्रीपा० २ । ॐ वामनाय नमः । वामनश्रीपा० ३ । ॐ कुमुदाय नमः । कुमुदश्रीपा० ४ । ॐ अंजनाय नमः । अंजनश्रीपा० ५ । ॐ पुष्पदंताय नमः । पष्पदंतश्रीपा० ६ । ॐ सार्वभौमाय नमः सार्वभौमश्रीपा० ७ । ॐ सुप्रतीकाय नमः । सुप्रतीकश्रीपादुकां पूजयामि तर्पयामि नमः ॥ इत्यष्टौ दिग्गजान्पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति षष्ठावरणम् ॥ ६ ॥ ततो भूपुरे इन्द्रादीन् वज्रादींश्च पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य पुनर्ध्यात्वा जपं कुर्य्यात् । अस्य पुरश्चरणं द्वादश लक्षजपः । जपदशांशतो घृतहोमः । पुनः श्रीफलैः पद्मैः प्रत्येकमयुतं होमः । ततोऽयुतद्वयमितं तर्पणं कुर्य्यात् । एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथाच--भानुलक्षं जपेन्मंत्रं दशांशं जुहुयाद्घृतैः ॥ जुहुयाच्छ्रीफलैः पद्मैः प्रत्येकमयुतं ततः ॥ १ ॥ तर्पयेत्सातिलैः शुद्धैः सुगंधैरयुतद्वयम् ॥ आगमोक्तेन विधिना सुगन्धैः सुमनोहरैः ॥ पूजयेद्गंधपुष्पाद्यैर्देवीमन्त्रह

मादरात् ॥ २ ॥ दूर्वाभिराज्यसिक्ताभिर्जुहुयादायुषे नरः ॥ दशरात्रं समिद्धेऽप्यावष्टोत्तरसहस्रकम् ॥ ३ ॥ गुडूचीमाज्यसंयुक्तां जुहुया त्सप्तवासरम् ॥ अष्टोत्तरसहस्रं यः स जीवेच्छरदां शतम् ॥ ४ ॥ हुत्वा तिलान् घृताभ्यक्तान्दीर्घमायुरवाप्नुयात् ॥ आरभ्यार्क दिनं मंत्री दशरात्रं दिने दिने ॥ ५ ॥ आज्याक्तार्कसमिद्धोमादारोग्यं लभते ध्रुवम् ॥ कंठमात्रोदके स्थित्वा ध्यात्वा देवीं दिवाकरे॥ ६ ॥ ऊर्ध्वबाहुर्दशशतमष्टोत्तरामिमं हुनेत् ॥ आरोग्यं लभते सद्यो वांछितान्यपि मंत्रवित् ॥ ७ ॥ शालीभिर्जुह्वतो नित्यमष्टोत्तरसहस्रकम् ॥ अचिरादेव महती लक्ष्मीः संजायते ध्रुवम् ॥ ८ ॥ प्रसनैर्जुहुयान्मंत्री लक्ष्मीवल्लीसमुद्भवैः ॥ नंद्यावर्तसमुत्थैश्च सिद्धार्थैश्च घृताप्लुतैः ॥ महतीं श्रियमाप्नोति मान्यते सर्वजंतुभिः ॥ ९ ॥ मरीचजीरकोन्मिश्रैर्नारिकेलरजःप्लुतैः ॥ सगुडैराज्यसंपक्वैरपूपैराज्यलोलितैः॥जुहुयात्पा यसाहारो मंत्रविद्विजितेंद्रियः ॥ १० ॥ अष्टोत्तरशतं नित्यं मंडलाद्धनदो भवेत् ॥ हविषा गुडमिश्रेण जुहुयादर्थवान्भवेत् ॥ ११ ॥ जपा पुष्पाणि जुहुयादष्टोत्तरसहस्रकम् ॥ गृहीत्वा प्रजपेद्भस्म नागवल्लीसमन्वितम् ॥ १२ ॥ तिलकं तनुयात्तेन सर्ववश्यकरो भवेत् ॥ ब्रह्म वृक्षसमित्पुष्पैर्ब्राह्मणान्वशयेद्वशी ॥ १३ ॥ जातीपुष्पैश्च राजानं वैश्यान् रक्तोत्पलैः शुभैः ॥ शूद्रान्नीलोत्पलैर्हुत्वा वशयेन्मंत्रविन्नरः ॥ १४ ॥ पुष्पैर्मधूकजैर्हुत्वा वशमानयति स्त्रियः ॥ कृत्वा नवपदात्मानं मंडलं यंत्रभूषितम् ॥ १५ ॥ अभिषेकं प्रकुर्वीत विधिना सर्वसिद्धये ॥ कलशान्स्थापयेत्तेषु पदेषु शुभलक्षणान् ॥ १६ ॥ चंदनालिप्तसर्वांगान् दूर्वाक्षतसमन्वितान् ॥ दुकूल वेष्टितानेतान्पूरयेत्तीर्थवारिणा ॥ १७ ॥ नवरत्नसमाबद्धं कर्षकांचनकल्पितम् ॥ मध्यकुंभे क्षिपेत्पद्मं यंत्राढ्यं देशिकोत्तमः ॥ १८ ॥ चंदनोशीरकर्पूरजातीकंकोलकुंकुमम् ॥ कुष्ठागरुतमालैलायुतं संपिष्य भागतः ॥ १९ ॥ विलोड्य सर्वकुंभेषु रत्नान्यपि विनिक्षिपेत् ॥ लक्ष्मीदूर्वासदाभद्रासहदेवीमधुव्रताः ॥ २० ॥ मुशलीं शक्रवल्लीं च क्रांतापामार्गपत्रकान् ॥ प्रियंगुमुद्गगोधूमव्रीहींश्च सतिलान्यवान् ॥ २१ ॥ शालितंडुलमाषांश्च प्रक्षाल्येतेषु निक्षिपेत् ॥ धात्रीलकुचबिल्वानां कदलीनालिकेरयोः ॥ २२ ॥ फलान्यपि विनिक्षिप्य पुष्पाण्येतानि निक्षिपेत् ॥ पद्मं सौगंधिकं जातिं मल्लिकां बकुलं तथा॥२३॥ चंपकाशोकपुन्नागतुलसीकेतकोद्भवान् ॥ पल्लवांश्च वटाश्वत्थ

प्लक्षोदुंबरशाखिनाम् ॥ २४ ॥ ब्रह्मकुर्चं विनिक्षिप्य चंपकैः सफलान्वितैः ॥ पिधाय कुंभवक्राणि क्षौमैराच्छदयेत्ततः ॥ २५ ॥ आवाह्य मध्यकलशे महालक्ष्मीं प्रपूजयेत् ॥ यजेदुमाद्याः शिष्टेषु कलशेष्वष्टसु क्रमात् ॥ २६ ॥ गंधैर्मनोहरैः पुष्पैर्धूपदीपसमन्वितैः ॥ निवेद्य भक्ष्यभोज्यानि तान्स्पृष्ट्वा प्रजपेन्मनुम् ॥ २७ ॥ त्रिसहस्रं जपस्यांते साध्यमानीय संयतम् ॥ संस्थाप्य स्थंडिले पीठं तस्मिंस्तं विनिवेशयेत् ॥ २८ ॥ रम्यैरावरणैर्वस्त्रैरलंकृत्य तमादरात् ॥ सुमंगलाभिर्नारीभिः क्षिप्तपुष्पाक्षतान्वितम् ॥ २९ ॥ अर्चितानां द्विजातीनामाशीर्वादपुरःसरम् ॥ नदत्सु पंचवाद्येषु मुहूर्ते शोभने सधीः ॥ ३० ॥ मध्यस्थं कुंभमुत्सृज्य महालक्ष्मीमनुस्मरन् ॥ अभिषिंचेत्क्रमादन्यैः कलशैरपि देशिकः ॥ ३१ ॥ करेणास्य शिरः स्पृष्ट्वा प्रयुंजीताशिषं गुरुः ॥ "भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु ॥ ३२ ॥ रक्षंतु त्वां सदा देवाः संपदः संतु सर्वदा ॥" अथोत्थायाभिषिक्तः सन् वाससी परिधाय च ॥ ३३ ॥ यथाविधि समाचम्य दंडवत्प्रणमेद्गुरुम् ॥ वस्त्रैराभरणैर्धान्यैर्धनैर्गोमहिषादिभिः ॥ ३४ ॥ दासीदासैश्च विधिवत्तोषयेद्देवताधिया ॥ ब्राह्मणान्भोजयेत्पश्चादीनांधकृपणैः सह ॥ ३५ ॥ महान्तमुत्सवं कुर्य्याद्भवने बंधुभिः सह ॥ तदा कृतार्थमात्मानं मन्यते मनुजोत्तमः ॥ ३६ ॥ अभिषिक्तो नरपतिः परान् विजयतेऽचिरात् ॥ पदेच्छुः पदमाप्नोति राजपुत्रो न संशयः ॥ ३७ ॥ अभिषिक्ता सती वंध्या सूते पुत्रं महामतिम् ॥ महारोगेषु जातेषु कृत्याद्रोहेषु देशिकः ॥ ३८ ॥ भूतेषु दुर्निमित्तादौ विदध्यादभिषेचनम् ॥ सर्वसम्पत्करं पुंसां सर्वसौभाग्यसिद्धिदम् ॥ ३९ ॥ सर्वरोगप्रशमनं सर्वापद्विनिवारणम् ॥ गर्भरक्षाकरं स्त्रीणां दीर्घायुर्जनकं परम् ॥ ४० ॥ प्रसूतानामपि स्त्रीणां सूतिकागाररक्षकम् ॥ प्रनष्टपुष्पगर्भाणां पुष्पगर्भाभिरक्षणम् ॥ ४१ ॥ आसन्नशत्रुभीतानां नाशनं च महीभृताम् ॥ अभिषेकमिमं प्राहुरागमार्थविशारदाः ॥ ४२ ॥ इति द्वादशाक्षरलक्ष्मीमंत्रप्रयोगः ॥ अथ त्रयोविंशत्यक्षरलक्ष्मीमंत्रप्रयोगः ॥ प्राकृतग्रंथे मंत्रो यथा–'ॐ श्रीं ह्रीं क्लीं श्रीं लक्ष्मीरागच्छागच्छ मम मंदिरे तिष्ठतिष्ठ स्वाहा ॥' इति त्रयोविंशत्यक्षरो मंत्रः ॥ अस्य विधानम् । अष्टोत्तरशतं प्रतिदिनं

जपेत्॥लक्ष्मीः प्रसन्ना भवति द्रव्यं च ददाति॥ इति त्रयोविंशत्यक्षरमहालक्ष्मीमंत्रप्रयोगः॥ श्रीगणेशाय नमः ॥ अथ सिद्धलक्ष्म्येकादशाक्षरमंत्रप्रयोगः ॥ मंत्रो यथा–'ॐ श्रीं ह्रीं क्लीं श्रीं सिद्धलक्ष्म्यै नमः॥' इति मंत्रः॥अस्य विधानम्–ॐ अस्य श्रीसिद्धलक्ष्मीमंत्रस्य हिरण्यगर्भ ऋषिः । अनुष्टुप् छंदः॥श्रीमहाकालीमहालक्ष्मीसरस्वत्यो देवताः । श्रीं बीजम् ।ह्रीं शक्तिः।क्लीं कीलकम्।मम सर्वक्लेशपीडापरिहारार्थं सर्वदुःखदारिद्र्यनाशनार्थं सर्वकार्यसिद्ध्यर्थं च श्रीसिद्धलक्ष्मीमंत्रजपे विनियोगः ॥ ॐ हिरण्यगर्भऋषये नमः शिरसि १ । अनुष्टुप् छंदसे नमः मुखे२।श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमः हृदि ३ । श्रीं बीजाय नमः लिंगे ४। ह्रीं शक्तये नमः पादयोः ५। क्लीं कीलकाय नमः नाभौ ६। विनियोगाय नमः सर्वाङ्गे ७ । इति ऋष्यादिन्यासः ॥ ॐ श्रीं अंगुष्ठाभ्यां नमः १ । ॐ ह्रीं तर्जनीभ्यां नमः २ । ॐ क्लीं मध्यमाभ्यां नमः ३ । ॐ श्रीं अनामिकाभ्यां नमः ४। ॐ सिद्धलक्ष्म्यै कनिष्ठिकाभ्यां नमः ५। ॐ नमः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ श्रीं हृदयाय नमः १। ॐ ह्रीं शिरसे स्वाहा २। ॐ क्लीं शिखायै वषट् ३ । ॐ श्रीं कवचाय हुम् ४ । ॐ सिद्धलक्ष्म्यै नेत्रत्रयाय वौषट् ५। ॐ नमः अस्त्राय फट् ६ ॥ इति हृदयादिषडङ्गन्यासः ॥ अथ ध्यानम्–ब्राह्मीं च वैष्णवीं भद्रां षड्भुजां च चतुर्मुखीम्॥ त्रिनेत्रां खड्गशूलाभीपद्मचक्रगदाधराम् ॥ १ ॥ पीताम्बरधरां देवीं नानालंकारभूषिताम् ॥ तेजःपुंजधरां श्रेष्ठां ध्यायेद्बालकुमारिकाम् ॥ २ ॥ इति ध्यात्वा पूर्वोक्तपीठपूजां विधाय ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संप्रोञ्छ्य 'ॐ सिद्धलक्ष्मीपद्मपीठाय नमः' इत्यासनमंत्रेणासनं दत्त्वा पीठमध्ये संस्थाप्य पुनर्ध्यात्वा मूलेनावाहनादिपंचोपचारैः सम्पूज्य देवीं ध्यात्वा मूलमंत्रं जपेत् ॥ अस्य पुरश्चरणमेकलक्षजपः । तत्तद्दशांशेन होमतर्पणमार्जनब्राह्मणभोजनानि कुर्यात् । एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत्।तथा च रौप्यदीपमादाय गोघृतेनापूर्य्य एकादशतंतुभिः पुष्पवर्तिकां निक्षिप्य मूलेन दीपं समर्पयामि इति प्रज्वाल्य


पूर्वाभिमुखः स्थित्वा शर्कराया नैवेद्यं निवेद्य स्फटिकमालामादाय हृदये धारयन् देवीं ध्यात्वा मंत्रार्थं स्मरन् त्रिसंध्यं मूलमंत्रमष्टोत्तर शतं प्रतिदिनं जपेत् ॥ जपादौ जपांते च स्तोत्रं पठेत् ॥ अथ सिद्धलक्ष्मीस्तोत्रप्रारंभः ॥ ॐ अस्य श्रीसिद्धलक्ष्मीस्तोत्रमंत्रस्य हिरण्य गर्भ ऋषिः । अनुष्टुप् छंदः । श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः । श्रीं बीजम् । ह्रीं शक्तिः । क्लीं कीलकम्॥मम सर्वक्लेशपीडापरि हारार्थं सर्वदुःखदारिद्र्यनाशनार्थं सर्वकार्यसिद्ध्यर्थं च श्रीसिद्धलक्ष्मीस्तोत्रपाठे विनियोगः॥ ॐ हिरण्यगर्भऋषये नमः शिरसि १ । अनुष्टुप् छंदसे नमो मुखे २ । श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवताभ्यो नमो हृदि ३ । श्रीं बीजाय नमो गुह्ये ४ । ह्रीं शक्तये नमः पादयोः ५ । क्लीं कीलकाय नमो नाभौ ६ । विनियोगाय नमः सर्वांङ्गे ॥ ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ श्रीं सिद्धलक्ष्म्यै अंगुष्ठाभ्यां नमः १ । ॐ ह्रीं विष्णुतेजसे तर्जनीभ्यां नमः २ । ॐ क्लीं अमृतानंदायै मध्यमाभ्यां नमः ३ । ॐ श्रीं दैत्यमालिन्यै अनामिकाभ्यां नमः ४ । ॐ ह्रीं तेजःप्रकाशिन्यै कनिष्ठिकाभ्यां नमः ५ । ॐ क्लीं ब्राह्म्यै वैष्णव्यै रुद्राण्यै करतलकरपृष्ठाभ्यां नमः ६ ॥ इति कर न्यासः ॥ ॐ श्रीं सिद्धलक्ष्म्यै हृदयाय नमः १ । ॐ ह्रीं विष्णुतेजसे शिरसे स्वाहा २ । ॐ क्लीं अमृतानंदायै शिखायै वषट् ३ । ॐ श्रीं दैत्यमालिन्यै कवचाय हुम् ४ । ॐ ह्रीं तेजःप्रकाशिन्यै नेत्रत्रयाय वौषट् ५ । ॐ क्लीं ब्राह्म्यै वैष्णव्यै रुद्राण्यै अस्त्राय फट् ६ ॥ इति हृदयादिषडङ्गन्यासः ॥ 'ॐ श्रीं ह्रीं क्लीं श्रीं सिद्धलक्ष्म्यै नमः' इति मंत्रेण तालत्रयं दिग्बंधनं च कुर्यात् ॥ अथ ध्यानम् । ब्राह्मीं च वैष्णवीं भद्रां षड्भुजां च चतुर्मुखीम् ॥ त्रिनेत्रां खड्गत्रिशूलपद्मचक्रगदाधराम् ॥ १ ॥ पीताम्बरधरां देवीं नानालंकार भूषिताम् ॥ तेजःपुञ्जधरीं श्रेष्ठां ध्यायेद्बालकुमारिकाम् ॥ २ ॥ इति ध्यात्वा स्तोत्रं पठेत् ॥ तथाच–ॐकारं लक्ष्मीरूपं तु विष्णुं हृदय मव्ययम् ॥ विष्णुमानंदमव्यक्तं ह्रींकारं बीजरूपिणीम् ॥ १ ॥ क्लीं अमृतानंदिनीं भद्रां सदात्यानंददायिनीम् ॥ श्रीं दैत्यशमनीं शक्तिं मालिनीं शत्रुमर्दिनीम् ॥ २ ॥ तेजःप्रकाशिनीं देवीं वरदां शुभकारिणीम् ॥ ब्राह्मीं च वैष्णवीं रौद्रीं कालिकारूपशोभिनीम् ॥ ३ ॥ अकारे

लक्ष्मीरूपं तु उकारे विष्णुमव्ययम् ॥ (ध्यायेदिति शेषः) मकारः पुरुषोऽव्यक्तो देवी प्रणव उच्यते ॥ ४ ॥ सूर्य्यकोटिप्रतीकाशं चन्द्रकोटिसमप्रभम् ॥ तन्मध्ये निकरं सूक्ष्मं ब्रह्मरूपं व्यवस्थितम् ॥ ५ ॥ ॐकारं परमानंदं सदैव सुखसुन्दरीम् ॥ सिद्धलक्ष्मि मोक्ष लक्ष्मि आद्यलक्ष्मि नमोऽस्तु ते ॥ ६ ॥ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यंबके गौरि नारायणि नमोऽस्तु ते ॥ प्रथमं त्र्यंबका गौरी द्वितीयं वैष्णवी तथा ॥ ७ ॥ तृतीयं कमला प्रोक्ता चतुर्थं सुन्दरी तथा ॥ पंचमं विष्णुशक्तिश्च षष्ठं कात्यायनी तथा ॥ ८ ॥ वाराही सप्तमं चैव ह्यष्टमं हरिवल्लभा ॥ नवमं खड्गिनी प्रोक्ता दशमं चैव देविका ॥ ९ ॥ एकादशं सिद्धलक्ष्मी र्द्वादशं हंसवाहिनी ॥ एतत्स्तोत्रवरं देव्या ये पठंति सदा नरः ॥ १० ॥ सर्वापद्भ्यो विमुच्यंते नात्र कार्या विचारणा ॥ एकमासं द्विमासं च त्रिमासं माश्चतुष्टयम् ॥ ११ ॥ पंचमासं च षण्मासं त्रिकालं यः सदा पठेत् ॥ ब्राह्मणः क्लेशितो दुःखी दारिद्र्यामय पीडितः ॥ १२ ॥ जन्मांतरसहस्रोत्थैर्मुच्यते सर्वकिल्बिषैः ॥ दरिद्रो लभते लक्ष्मीमपुत्रः पुत्रवान्भवेत् ॥ १३ ॥ धन्यो यशस्वी शत्रुघ्नो वह्निचौरभयेषु च ॥ शाकिनीभूतवेतालसर्पव्याघ्रनिपातने ॥ १४ ॥ राजद्वारे सभास्थाने कारागृह निबंधने ॥ ईश्वरेण कृतं स्तोत्रं प्राणिनां हितकारकम् ॥ १५ ॥ स्तुवंतु ब्राह्मणा नित्यं दारिद्र्यं न च बाधते ॥ सर्वपापहरा लक्ष्मीः सर्वसिद्धिप्रदायिनी ॥ १६ ॥ इति श्रीब्रह्मपुराणे ईश्वरविष्णुसंवादे श्रीसिद्धलक्ष्मीमंत्रस्तोत्रविधानं समाप्तम् ॥ अथ ज्येष्ठालक्ष्मीमंत्रप्रयोगः ॥ मंत्रमहोदधौ–ज्येष्ठालक्ष्मीमहामंत्रः प्राच्यत धनवृद्धिदः ॥ मंत्रो यथा–ऐं ह्रीं श्रीं ज्येष्ठालक्ष्मि स्वयंभुवे ह्रीं ज्येष्ठायै नमः ॥ इति सप्तदशाक्षरो मंत्रः ॥ अस्य विधानम् । अस्य ज्येष्ठालक्ष्मीमंत्रस्य ब्रह्मा ऋषिः । अष्टिश्छंदः । ज्येष्ठालक्ष्मीर्देवता ह्रीं बीजम् । श्रीं शक्तिः । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ब्रह्मऋषये नमः शिरसि १ । अष्टिच्छंदसे नमो मुखे २ । ज्येष्ठा लक्ष्मीदेवतायै नमः हृदि ३ । ह्रीं बीजाय नमः लिंगे ४ । श्रीं शक्तये नमः पादयोः ५ । विनियोगाय नमः सर्वाङ्गे ६ ॥

इति ऋष्यादिन्यासः ॥ ऐं ह्रीं श्रीं अंगुष्ठाभ्यां नमः १। ज्येष्ठालक्ष्मि तर्जनीभ्यां नमः २। स्वयंभुव मध्यमाभ्यां नमः ३। ह्रीं अनामिकाभ्यां नमः ४। ज्येष्ठायै कनिष्ठिकाभ्यां नमः ५। नमः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ऐं ह्रीं श्रीं हृदयाय नमः १। ज्येष्ठालक्ष्मि शिरसे स्वाहा २। स्वयंभुवे शिखायै वषट् ३। ह्रीं कवचाय हुम् ४। ज्येष्ठायै नेत्रत्रयाय वौषट् ५। नमः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ ऐं नमः शिरसि १। ॐ ह्रीं नमो भ्रूमध्ये २। ॐ श्रीं नमो मुखे ३। ॐ ज्येष्ठालक्ष्म्यै नमः हृदि ४। ॐ स्वयंभुवे नमः नाभौ ५। ॐ ह्रीं नमः आधारे ६। ॐ ज्येष्ठायै नमः जानुनि ७। ॐ नमो नमः पादयोः ८ ॥ इति मंत्रवर्णन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् -ॐ उद्यद्भास्करसन्निभा स्मितमुखी रक्ताम्बरालेपना सत्कुंभं धनभाजनं सृणिमथो पाशं करैर्बिभ्रती ॥ पद्मस्था कमलेक्षणा दृढकुचा सौंदर्य्यवारांनिधिर्ध्यातव्या सकलाभिलाषफलदा श्रीज्येष्ठलक्ष्मीरियम् ॥ १ ॥ इति ध्यायेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति पीठदेवताः संपूज्य नवपीठशक्तीः पूजयेत् ॥ तद्यथा-पूर्वाद्यष्टदिक्षु ॐ लोहिताक्ष्यै नमः १। ॐ विरूपायै नमः २। ॐ करात्यै नमः ३। ॐ नीललोहितायै नमः ४। ॐ समदायै नमः ५। ॐ वारुण्यै नमः ६। ॐ पुष्ट्यै नमः ७। ॐ अमोघायै नमः ८। मध्ये ॐ विश्वमोहिन्यै नमः ९॥ इति पीठशक्तीः पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संप्रोञ्छ्य 'ॐ रक्तज्येष्ठायै विद्महे नीलज्येष्ठायै धीमहि। तन्नो लक्ष्मी प्रचोदयात् ॥' इति गायत्रीमंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादि पुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्य्यात् ॥ तद्यथा-पुष्पांजलिमादाय मूलमुच्चार्य--ॐ संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि ज्येष्ठायै परिवारार्चनाय मे ॥१॥ इति पठित्वा पुष्पांजलिं दद्यात् ॥ इत्याज्ञां गृहीत्वा षट्कोणकेसरेषु आग्नेय्यादि

चतुर्षु दिक्षु मध्ये दिक्षु च । ऐं ह्रीं श्रीं हृदयाय नमः। हृदयश्रीपादुकां पूजयामि तर्पयामि नमः १ । इति सर्वत्र ॥ ज्येष्ठालक्ष्मि शिरसे स्वाहा । शिरःश्रीपा०२। स्वयंभुवे शिखायै वषट् । शिखाश्रीपा० ३ । ह्रीं कवचायै हुम् । कवचश्रीपा० ४ । ज्येष्ठायै नेत्रत्रयायै वौषट् । नेत्रत्रयश्रीपा० ५ । नमः अस्त्राय फट् । अस्त्रश्रीपा० ६ ॥ इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य—अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततोऽष्टदलेषु पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण ॐ ब्राह्म्यै नमः । ब्राह्मीश्रीपा० १ । ॐ माहेश्वर्य्यै नमः । माहेश्वरीश्रीपा० २ । ॐ कौमार्य्यै नमः । कौमारीश्रीपा० ३ । ॐ वैष्णव्यै नमः । वैष्णवीश्रीपा० ४ । ॐ वाराह्यै नमः । वाराहीश्रीपा० ५ । ॐ इन्द्राण्यै नमः । इन्द्राणीश्रीपा० ६ । ॐ चामुंडायै नमः । चामुंडाश्रीपा० ७ । ॐ महालक्ष्म्यै नमः ।

ज्येष्ठालक्ष्मीमन्त्रपूजनयन्त्रम् ।




महालक्ष्मीश्रीपा० ८ ॥ इत्यष्टौ मातृः संपूज्य पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥२॥ ततो भूपुरे पूर्वादिक्रमेणेन्द्रादिदिक्पालान् वज्राद्यायुधानि च संपूज्य पुष्पांजलिं दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं लक्षजपः । आज्याक्तमिश्रितपायसेन दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्य्यात् ॥ एवं कृते

मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च–लक्षं जपेत्पायसेन जुहुयात्तद्दशांशतः ॥ आज्याक्तेन यजेत्पीठे वक्ष्यमाणे महाश्रियम् ॥ १ ॥ इत्थं जपादिभिः सिद्धो मनुर्दद्यादभीप्सितम् ॥ इति सप्तदशाक्षरज्येष्ठालक्ष्मीमंत्रप्रयोगः ॥

॥ अथ वसुधालक्ष्मीमंत्रप्रयोगः ॥ मंत्रो यथा-- 'ॐ ग्लौं श्रीं अन्नं मह्यन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा श्रीं ग्लौं ॐ ॥' इत्यष्टाविंशत्यक्षरो मंत्रः ॥ अस्य विधानम्॥अस्य वसुधासंज्ञकज्येष्ठालक्ष्मीमंत्रस्य ब्रह्मा ऋषिः । निचृद्गायत्री च्छंदः।वसुधाश्री देवता।ग्लौं बीजम् । श्रीं शक्तिः । ममाभीष्टप्राप्त्यै जपे विनियोगः ॥ ॐ ब्रह्मऋषये नमः शिरसि १ । निचृद्गायत्रीच्छंदसे नमो मुखे २ । वसुधाश्रीदेवतायै नमो हृदि ३ । ग्लौं बीजाय नमो लिंगे ४ । श्रीं शक्तये नमः पादयोः ५ । विनियोगाय नमः सर्वाङ्गे ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ अन्नं महि ग्लां श्रीं अंगुष्ठाभ्यां नमः १ । ॐ अन्नं मे देहि ग्लीं श्रीं तर्जनीभ्यां नमः २ । ॐ अन्नाधिपतये ग्लूं श्रीं मध्यमाभ्यां नमः ३ । ॐ ममान्नं प्रदापय ग्लैं श्रीं अनामिकाभ्यां नमः ४ । ॐ स्वाहा ग्लौं श्रीं कनिष्ठिकाभ्यां नमः ५ ॥ इति करन्यासः ॥ ॐ अन्नं महि ग्लां श्रीं हृदयाय नमः १ । ॐ अन्नं मे देहि ग्लीं श्रीं शिरसे स्वाहा २ । ॐ अन्नाधिपतये ग्लूं श्रीं शिखायै वषट् ३ । ॐ ममान्नं प्रदापय ग्लैं श्रीं कवचाय हुम् ४ । ॐ स्वाहा ग्लौं श्रीं अस्त्राय फट् ५ ॥ इति पंचांगन्यासः ॥ इति न्यासं कृत्वा स्वर्णदीपे देवीं ध्यायेत् । अथ ध्यानम्--ॐ कल्पद्रुमाधो मणिवेदिकायां समास्थिते वस्त्रविभूषणाढ्ये ॥ भूमिश्रियौ वांछितवामदक्ष संचिंतये देवमुनीन्द्रवंद्ये ॥ १ ॥ इति ध्यात्वा सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति संपूज्य नवपीठशक्तीः पूजयेत् ॥ तद्यथा–पूर्वाद्यष्टसु दिक्षु ॐ विमलायै नमः १ । ॐ उत्कर्षिण्यै नमः २ । ॐ ज्ञानायै नमः ३ । ॐ क्रियायै नमः ४ । ॐ योगायै नमः ५ । ॐ प्रह्व्यै नमः ६ । ॐ सत्यायै नमः ७ । ॐ ईशानायै नमः ८ । मध्ये ॐ अनुग्रहायै नमः ९ ॥ इति पीठशक्तीः पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण संप्रोञ्छ्य 'ॐ नमो भगवते विष्णवे सर्वभूतात्मसंयोगपद्मपीठात्मने नमः' इति मंत्रेण पुष्पाद्यासनं

दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्य्यात्। तद्यथा–पुष्पांजलिमादाय। ॐ संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि वसुधे परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं दद्यात्॥इत्याज्ञां गृहीत्वा षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च। ॐ अन्नं महि ग्लां श्रीं हृदयाय नमः। हृदयश्रीपादुकां पूजयामि तर्पयामि नमः १। इति सर्वत्र। ॐ अन्नं मे देहि ग्लीं श्रीं शिरसे स्वाहा। शिरःश्रीपा० २। ॐ अन्नाधिपतये ग्लूं श्रीं शिखायै वषट्। शिखाश्रीपा० ३। ॐ ममान्नं प्रदापय ग्लैं श्रीं कवचायैं हुम्। कवचश्रीपा० ४। ॐ स्वाहा ग्लौं श्रीं अस्त्राय फट्। अस्त्रश्रीपा० ५। इति पंचांगानि पूजयेत्॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य्य–अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥१॥ ततः पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेणाष्टदलेषु चतुर्दिक्षु ॐ पृथिव्यै नमः। पृथिवी श्रीपा० १। ॐ अग्नये नमः। अग्निश्रीपा० २। ॐ जलाय नमः। जलश्रीपा० ३। ॐ मारुताय नमः। मारुतश्रीपा० ४।

वसुधालक्ष्मीपूजनयंत्रम्।



आग्नेय्यादिविदिक्षु च ॐ निवृत्त्यै नमः। निवृत्तिश्रीपा० ५। ॐ प्रतिष्ठायै नमः। प्रतिष्ठाश्रीपा० ६। ॐ विद्यायै नमः। विद्याश्रीपा० ७। ॐ शांत्यै नमः। शांतिश्रीपा० ८। इत्यष्टौ पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततोऽष्टदलाग्रेषु

प्राचीक्रमेण ॐ बलाकायै नमः । बलाकाश्रीपा० १ । ॐ विमलायै नमः । विमलाश्रीपा० २ । ॐ कमलायै नमः । कमलाश्रीपा० ३ । ॐ वनमालायै नमः । वनमालाश्रीपा० ४ । ॐ विभीषायै नमः । विभीषाश्रीपा० ५ । ॐ मालिकायै नमः । मालिकाश्रीपा० ६ । ॐ शांकर्यै नमः । शांकरीश्रीपा० ७ । ॐ वसुमालिकायै नमः । वसुमालिकाश्रीपा० ८ ॥ इत्यष्टौ शक्तीः पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुरे पूर्वादिक्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणं लक्षजपः । घृतान्नेन दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्य्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथाच—लक्षमेकं जपेन्मंत्रं तद्दशांशं घृताप्लुतैः ॥ अन्नैर्हुत्वा यजेत्पीठे वैष्णवे वसुधाश्रियौ ॥ १ ॥ इत्थं सपरिवारे यो धरालक्ष्म्यौ जपादिभिः ॥ आराधयेत्स लभते महतीमन्नसंपदम् ॥ २ ॥ आज्याक्तैश्च तिलैर्बिल्वसमिद्भिर्जुहुयाच्छ्रिये ॥ साज्येन पायसेनापि फलैः पत्रैश्च बिल्वजैः ॥३॥ जपतामुं महामंत्रं होमः कार्य्यो दिने दिने ॥ दशसंख्यैः कुबेरस्य मनुनेध्मैर्वटोद्भवैः ॥ ४ ॥ होमकाले कुबेरं तु चिंतयेदग्निमध्यगम् ॥ कुबेरध्यानं यथा–धनपूर्णं स्वर्णकुंभं तथा रत्नकरंडकम् ॥ ५ ॥ हस्ताभ्यां विप्लुतं खर्वकरपादं च तुंदिलम् ॥ वटाधस्ताद्रत्नपीठोपविष्टं सुस्मिताननम् ॥ एवं कृतहुतो मंत्री लक्ष्म्या जयति वित्तपम् ॥ ६ ॥ इति वसुधालक्ष्म्यष्टाविंशत्यक्षरमंत्रप्रयोगः ॥ अथ लक्ष्मीकवचप्रारंभः ॥ अथ वक्ष्ये महेशानि कवचं सर्वकामदम् ॥ यस्य विज्ञानमात्रेण भवेत्साक्षात्सदाशिवः ॥ १ ॥ नार्चनं तस्य देवेशि मंत्रमात्रं जपेन्नरः ॥ स भवेत्पार्वतीपुत्रः सर्वशास्त्रपुरस्कृतः ॥ २ ॥ विद्यार्थिनां सदा सेव्या धनदात्री विशेषतः ॥ धनार्थिभिः सदा सेव्या कमला विष्णुवल्लभा ॥ ३ ॥ ॐ अस्याश्चतुरक्षराविष्णुवनितायाः कवचस्य श्रीभगवान् शिवऋषिः।अनुष्टुप्छंदः।वाग्भवा देवता । वाग्भवं बीजम्। लज्जा शक्तिः। रमा कीलकम्।कामबीजात्मकं कवचम् । मम सुकवित्वपांडित्यसमृद्धि

१ कुबेरमन्त्रो यथा–ॐ वैश्रवणाय स्वाहा ॥ २ इध्मैः समिद्भिः ॥

सिद्धये पाठे विनियोगः ॥ ऐंकारो मस्तके पातु वाग्भवा सर्वसिद्धिदा ॥ ह्रीं पातु चक्षुषोर्मध्ये चक्षुर्युग्मे च शांकरी ॥ ४ ॥ जिह्वायां मुखवृत्ते च कर्णयोर्दन्तयोर्नसि ॥ ओष्ठाधारे दंतपंक्तौ तालुमूले हनौ पुनः ॥ ५ ॥ पातु मां विष्णुवनिता लक्ष्मीः श्रीवर्णरूपिणी ॥ कर्णयुग्मे भुजद्वंद्वे स्तनद्वंद्वे च पार्वती ॥ ६ ॥ हृदये मणिबंधे च ग्रीवायां पार्श्वयोर्द्वयोः ॥ पृष्ठदेशे तथा गुह्ये वामे च दक्षिणे तथा ॥ ७ ॥ उपस्थे च नितंबे च नाभौ जंघाद्वये पुनः ॥ जानुचक्रे पदद्वंद्वे घुटिकेंऽगुलिमूलके ॥८॥ स्वधा तु प्राणशक्त्यां वा सभिन्न्यां मस्तके तथा ॥ सर्वांगे पातु कामेशी महादेवी समुन्नतिः ॥ ९ ॥ पुष्टिः पातु महामाया उत्कृष्टिः सर्वदाऽवतु ॥ ऋद्धिः पातु सदा देवी सर्वत्र शंभुवल्लभा ॥१०॥ वाग्भवा सर्वदा पातु पातु मां हरगेहिनी ॥ रमा पातु महादेवी पातु माया स्वराट् स्वयम् ॥ ११ ॥ सर्वांगे पातु मां लक्ष्मीर्विष्णुमाया सुरेश्वरी ॥ विजया पातु भवने जया पातु सदा मम ॥ १२ ॥ शिवदूती सदा पातु सुंदरी पातु सर्वदा ॥ भैरवी पातु सर्वत्र भेरुंडा सर्वदाऽवतु ॥ १३ ॥ त्वरिता पातु मां नित्यमुग्रतारा सदाऽवतु ॥ पातु मां कालिका नित्यं कालरात्रिः सदाऽवतु ॥ १४ ॥ नवदुर्गाः सदा पांतु कामाख्या सर्वदाऽवतु ॥ योगिन्यः सर्वदा पांतु मुद्राः पांतु सदा मम ॥ १५ ॥ मात्राः पांतु सदा देव्यश्चक्रस्था योगिनी गणाः ॥ सर्वत्र सर्वकार्येषु सर्वकर्मसु सर्वदा ॥ १६ ॥ पातु मां देवदेवी च लक्ष्मीः सर्वसमृद्धिदा ॥ इति ते कथितं दिव्यं कवचं सर्वसिद्धये ॥ १७ ॥ यत्र तत्र न वक्तव्यं यदीच्छेदात्मनो हितम् ॥ शठाय भक्तिहीनाय निंदकाय महेश्वरि ॥ १८ ॥ न्यूनांगे ह्यतिरिक्तांगे दर्शयेन्न कदाचन ॥ न स्तवं दर्शयेद्दिव्यं दर्शनाच्छिवहा भवेत् ॥ १९ ॥ कुलीनाय महेशाय दुर्गाभक्तिपराय च ॥ वैष्णवाय विशुद्धाय दद्यात्कवचमुत्तमम् ॥ २० ॥ निजशिष्याय शांताय धानिने कुलिने तथा ॥ दद्यात्कवचमित्युक्तं सर्वतंत्रसमन्वितम् ॥ २१ ॥ शनौ मंगलवारे च रक्तचंदनकैस्तथा ॥ यावकेन लिखेन्मंत्रं सर्वचक्रसमन्वितम् ॥ २२ ॥ विलिखेत्कवचं दिव्यं स्वयंभूकुसुमैः शुभैः ॥ स्वशुक्रैः परशुक्रैश्च नानागंधसमन्वितैः ॥ २३ ॥ गोरोचनाकुंकुमेन रक्तचंदनकेन वा ॥ सुतिथौ शुभयोगे वा श्रवणायां रवेर्दिने ॥ २४ ॥ अश्विन्यां कृत्तिकायां वा फाल्गुन्यां वा मघासु च ॥ पूर्वाभाद्रपदायोगे स्वात्यां मंगलवासरे ॥ २५ ॥

विलिखेत्प्रपठेत्स्तोत्रं शुभयोगे सुरालये ॥ आयुष्मत्प्रीतियोगे च ब्रह्मयोगे विशेषतः ॥ २६ ॥ इन्द्रयोगे शुभे योगे शुक्लयोगे तथैव च ॥ कौलवे बालवे चैव वणिजे चैव सत्तमः ॥ २७ ॥ शून्यागारे श्मशाने वा विजने च विशेषतः ॥ कुमारीं पूजयित्वा च यजेद्देवीं सनातनीम् ॥ २८ ॥ मत्स्यैर्मांसैः शाकमूलैः पूजयेत्परदेवताम् ॥ घृताद्यैः सोमकरणैः पुष्पधूपैर्विशेषतः ॥ २९ ॥ ब्राह्मणान्भोजयित्वा च पूजयेत्परमेश्वरीम् ॥ आखेटकमुपाख्यानं तत्र कुर्याद्दिनत्रयम् ॥ ३० ॥ तदा कुर्यान्महारक्षां शंकरेण प्रभाषिताम् ॥ मारणद्वेषणादीनि लभते नात्र संशयः ॥ स भवेत्पार्वतीपुत्रः सर्वशास्त्रपुरस्कृतः ॥ ३१ ॥ गुरुर्देवो हरः साक्षात्पत्नी तस्य हरप्रिया ॥ अभेदेन यजेद्यस्तु तस्य सिद्धिरदूरतः ॥ ३२ ॥ पठति य इह मर्त्यो नित्यमार्द्रांतरात्मा जपफलमनुमेयं लक्ष्यते सद्विशेषम् ॥ स भवति पदमुच्चैः संपदां पादनम्रक्षितिपमुकुटलक्ष्मीलक्षणानां चिराय ॥ ३३ ॥ इति विश्वसारतंत्रे लक्ष्मीकवचं समाप्तम् ॥ अथ लक्ष्मीस्तोत्रप्रारंभः ॥ त्रैलोक्यपूजिते देवि कमले विष्णुवल्लभे ॥ यथा त्वमचला कृष्णे तथा भव मयि स्थिरा ॥ १ ॥ कमला चंचला लक्ष्मीश्चला भूतिर्हरिप्रिया ॥ पद्मा पद्मालया सम्यगुच्चैः श्रीपद्मधारिणी ॥ २ ॥ द्वादशैतानि नामानि लक्ष्मीं संपूज्य यः पठेत् ॥ स्थिरा लक्ष्मीर्भवेत्तस्य पुत्रदारादिभिः सह ॥ ३ ॥ इति विश्वसारतंत्रे लक्ष्मीस्तोत्रं समाप्तम् ॥ ॥ अथ कमलाया अष्टोत्तरशतनामस्तोत्रप्रारंभः ॥ श्रीशिव उवाच ॥ शतमष्टोत्तरं नाम्नां कमलाया वरानने ॥ प्रवक्ष्याम्यतिगुह्यं हि न कदापि प्रकाशयेत् ॥ १ ॥ महामाया महालक्ष्मीर्महावाणी महेश्वरी ॥ महादेवी महारात्रिर्महिषासुरमर्दिनी ॥ २ ॥ कालरात्रिः कुहूः पूर्णा नन्दाऽऽद्या भद्रिका निशा ॥ जया रिक्ता महाशक्तिर्देवमाता कृशोदरी ॥ ३ ॥ शचीन्द्राणी शक्रनुता शङ्करप्रियवल्लभा ॥ महावराहजननी मदनोन्मथिनी मही ॥ ४ ॥ वैकुण्ठनाथरमणी विष्णुवक्षःस्थलस्थिता ॥ विश्वेश्वरी विश्वमाता वरदाऽभयदा शिवा ॥ ५ ॥ शूलिनी चक्रिणी मा च पाशिनी शंखधारिणी ॥ गदिनी मुंडमाला च कमला करुणालया ॥ ६ ॥ पद्माक्षधारिणी ह्यम्बा महाविष्णुप्रियङ्करी ॥ गोलोकनाथरमणी गोलोकेश्वरपूजिता ॥ ७ ॥ गया गङ्गा च यमुना गोमती गरुडासना ॥ गण्डकी सरयूस्तापी रेवा

चैव पयस्विनी ॥ ८ ॥ नर्मदा चैव कावेरी केदारस्थलवासिनी ॥ किशोरी केशवनुता महेन्द्रपरिवन्दिता ॥ ९ ॥ ब्रह्मादिदेवनिर्माण
कारिणी देवपूजिता ॥ कोटिब्रह्माण्डमध्यस्था कोटिब्रह्माण्डकारिणी ॥ १० ॥ श्रुतिरूपा श्रुतिकरी श्रुतिस्मृतिपरायणा ॥ इन्दिरा
सिंधुतनया मातंगी लोकमातृका ॥ ११ ॥ त्रिलोकजननी तंत्रा तंत्रमंत्रस्वरूपिणी ॥ तरुणी च तमोहंत्री मंगला मंगलायना ॥ १२ ॥
मधुकैटभमथिनी शुम्भासुरविनाशिनी ॥ निशुम्भादिहरा माता हरिशङ्करपूजिता ॥ १३ ॥ सर्वदेवमयी सर्वा शरणागतपालिनी ॥
शरण्या शम्भुवनिता सिंधुतीरनिवासिनी ॥ १४ ॥ गंधर्वगानरसिका गीता गोविन्दवल्लभा ॥ त्रैलोक्यपालिनी तत्त्वरूपा तारुण्यपूरिता
॥ १५ ॥ चन्द्रावली चन्द्रमुखी चन्द्रिका चन्द्रपूजिता ॥ चन्द्रा शशाङ्कभगिनी गीतवाद्यपरायणा ॥ १६ ॥ सृष्टिरूपा सृष्टिकरी
सृष्टिसंहारकारिणी ॥ इति ते कथितं देवि रमानामशताष्टकम् ॥ १७ ॥ त्रिसंध्यं प्रयतो भूत्वा पठेदेतत्समाहितः ॥ यं यं कामयते
कामं तं तं प्राप्नोत्यसंशयम् ॥ १८ ॥ इमं स्तवं यः पठतीह मर्त्यो वैकुण्ठपत्न्याः परमादरेण ॥ धनाधिपाद्यैः परिवन्दितः स्यात् प्रया
स्यति श्रीपदमंतकाले ॥ १९ ॥ इति कमलाया अष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥ अथ लक्ष्मीसहस्रनामस्तोत्रप्रारंभः ॥ ॐ तामाह्व
यामि सुभगां लक्ष्मीं त्रैलोक्यपूजिताम् ॥ एह्येहि देवि पद्माक्षि पद्माकरकृतालये ॥ १ ॥ आगच्छागच्छ वरदे पश्य मां स्वेन चक्षुषा ॥
आयाह्यायाहि धर्मार्थकाममोक्षमये शुभे ॥ २ ॥ एवंविधैः स्तुतिपदैः सत्यैः सत्यार्थसंस्तुता ॥ कनीयसी महाभागा चन्द्रेण परमा
त्मना ॥ ३ ॥ निशाकरश्च सा देवी भ्रातरौ द्वौ पयोनिधेः ॥ उत्पन्नमात्रौ तवास्तां शिवकेशवसंश्रितौ ॥ ४ ॥ सनत्कुमारस्तमृषिं
समाभाष्य पुरातनम् ॥ प्रोक्तवानितिहासं तु लक्ष्म्याः स्तोत्रमनुत्तमम् ॥ ५ ॥ अथेदृशान्महाघोराद्दारिद्र्यान्नरकात्कथम् ॥ मुक्ति
र्भवति लोकेऽस्मिन् दारिद्र्यं याति भस्मताम् ॥ ६ ॥ सनत्कुमार उवाच ॥ पूर्वं कृतयुगे ब्रह्मा भगवान् सर्वलोककृत् ॥ सृष्टिं नानाविधां
कृत्वा पश्चाच्चिंतामुपेयिवान् ॥ ७ ॥ किमाहाराः प्रजास्त्वेताः सम्भविष्यंति भूतले ॥ तथैव चासां दारिद्र्यात्कथमुत्तरणं भवेत् ॥ ८ ॥
दारिद्र्यान्मरणं श्रेयस्त्विति संचिन्त्य चेतसि ॥ क्षीरोदस्योत्तरे कूले जगाम कमलोद्भवः ॥ ९ ॥ तत्र तीव्रं ततस्तप्त्वा कदाचित्परमेश्व

रम् ॥ ददर्श पुण्डरीकाक्षं वासुदेवं जगद्गुरुम् ॥ १० ॥ सर्वज्ञं सर्वशक्तीनां सर्वावासं सनातनम् ॥ सर्वेश्वरं वासुदेवं विष्णुं लक्ष्मीपतिं
प्रभुम् ॥ ११ ॥ सोमकोटिप्रतीकाशं क्षीरोदविमले जले ॥ अनंतभोगशयनं विश्रांतं श्रीनिकेतनम् ॥ १२ ॥ कोटिसूर्य्यप्रतीकाशं
महायोगेश्वरेश्वरम् ॥ योगनिद्रारतं श्रीशं सर्वावासं सुरेश्वरम् ॥ १३ ॥ जगदुत्पत्तिसंहारस्थितिकारणकारणम् ॥ लक्ष्म्यादिशक्ति
करणं जातमण्डलमंडितम् ॥ १४ ॥ आयुधैर्देहवद्भिश्च चक्राद्यैः परिवारितम् ॥ दुर्निरीक्ष्यं सुरैः । सिद्धैर्महायोनिशतैरपि ॥ १५ ॥ आधारं
सर्वशक्तीनां परं तेजः सुदुस्सहम् ॥ प्रबुद्धं देवमीशानं दृष्ट्वा कमलसम्भवः ॥ १६ ॥ शिरस्यंजलिमाधाय स्तोत्रं पूर्वमुवाच ह ॥ मनो
वांछितसिद्धिं त्वं पूरयस्व महेश्वर ॥ १७ ॥ जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन ॥ नमस्तेऽस्तु हृषीकेश महापुरुषपूर्वज ॥ १८ ॥
सर्वेश्वर जयानन्द सर्वावास परात्पर ॥ प्रसीद मम भक्तस्य छिंधि सन्देहजं तमः ॥ १९ ॥ एवं स्तुतः स भगवान् ब्रह्मणाऽव्यक्त
जन्मना ॥ प्रसादाभिमुखः प्राह हरिर्विश्रांतलोचनः ॥ २० ॥ श्रीभगवानुवाच ॥ हिरण्यगर्भ तुष्टोऽस्मि ब्रूहि यत्तेऽभिवांछितम् ॥
तद्वक्ष्यामि न सन्देहो भक्तोऽसि मम सुव्रत ॥ २१ ॥ केशवाद्वचनं श्रुत्वा करुणाविष्टचेतनः ॥ प्रत्युवाच महाबुद्धिर्भगवंतं जनार्द्दनम्
॥ २२ ॥ चतुर्विधं भवस्यास्य भूतसर्गस्य केशव ॥ परित्राणाय मे ब्रूहि रहस्यं परमाद्भुतम् ॥ २३ ॥ दारिद्र्यशमनं धन्यं मनोज्ञं
पावनं परम् ॥ सर्वेश्वर महाबुद्धे स्वरूपं भैरवं महत् ॥ २४ ॥ श्रियः सर्वातिशायिन्यास्तथा ज्ञानं च शाश्वतम् ॥ नामानि चैव मुख्यानि
यानि गौणानि चाच्युत ॥ २५ ॥ त्वद्वक्त्रकमलोत्थानि श्रोतुमिच्छामि तत्त्वतः ॥ इति तस्य वचः श्रुत्वा प्रतिवाक्यमुवाच सः
॥ २६ ॥ श्रीभगवानुवाच ॥ महाविभूतिसंयुक्ता षाड्गुण्यवपुषः प्रभोः ॥ भगवद्वासुदेवस्य नित्यं चैषाऽनपायिनी ॥ २७ ॥ एकैव
वर्त्ततेऽभिन्ना ज्योत्स्नेव हिमदीधितेः ॥ सर्वशक्त्यात्मिका चैव विश्वं व्याप्य व्यवस्थिता ॥ २८ ॥ सर्वैश्वर्यगुणोपेता नित्यशुद्धस्वरू
पिणी ॥ प्राणशक्तिः परा ह्येषा सर्वेषां प्राणिनां भुवि ॥ २९ ॥ शक्तीनां चैव सर्वासां योनिभूता परा कला ॥ अहं तस्याः परं नाम्नां
सहस्रमिदमुत्तमम् ॥ ३० ॥ शृणुष्वावहितो भूत्वा परमैश्वर्य्यभूतिदम् ॥ देव्याख्यास्मृतिमात्रेण दारिद्र्यं याति भस्मताम् ॥ ३१ ॥

श्रीः पद्मा प्रकृतिः सत्त्वा शांता चिच्छक्तिरव्यया ॥ केवला निष्कला शुद्धा व्यापिनी व्योमविग्रहा ॥ ३२ ॥ व्योमपद्मकृताधारा परा व्योमा मतोद्भवा ॥ निर्व्योमा व्योममध्यस्था पञ्चव्योमपदाश्रिता ॥ ३३ ॥ अच्युता व्योमनिलया परमानन्दरूपिणी ॥ नित्यशुद्धा नित्यतृप्ता निर्विकारा निरीक्षणा ॥ ३४ ॥ ज्ञानशक्तिः कर्तृशक्तिर्भोक्तृशक्तिः शिखावहा ॥ स्नेहाभासा निरानन्दा विभूतिर्विमला चला ॥ ३५ ॥ अनंता वैष्णवी व्यक्ता विश्वानन्दा विकाशिनी ॥ शक्तिर्विभिन्नसर्वार्तिः समुद्रपरितोषिणी ॥ ३६ ॥ मूर्तिः सनातनी हार्दी निस्तरङ्गा निरामया ॥ ज्ञानज्ञेया ज्ञानगम्या ज्ञानज्ञेयविकासिनी ॥ ३७ ॥ स्वच्छन्दशक्तिर्गहना निष्कंपाऽर्चिः सुनिर्मला ॥ स्वरूपा सर्वगाऽपारा बृंहिणी सुगुणोर्जिता ॥ ३८ ॥ अकलङ्का निराधारा निस्सङ्कल्पा निराश्रया ॥ असङ्कीर्णा सुशांता च शाश्वती भासुरी स्थिरा ॥ ३९ ॥ अनौपम्या निर्विकल्पा निर्यंत्रा यंत्रवाहिनी ॥ अभेद्या भेदिनी भिन्ना भारती वैखरी खगा ॥ ४० ॥ अग्राह्या ग्राहिका गूढा गम्भीरा विश्वगोपिनी ॥ अनिर्देश्याऽप्रतिहता निर्बीजा पावनी परा ॥ ४१ ॥ अप्रतर्क्याऽपरिमिता भवभ्रांतिविनाशिनी ॥ एका द्विरूपा त्रिविधा असंख्याता सुरेश्वरी ॥ ४२ ॥ सुप्रतिष्ठा महाधात्री स्थितिर्वृद्धिर्ध्रुवा गतिः ॥ ईश्वरी महिमा ऋद्धिः प्रमोदा उज्ज्वलोद्यमा ॥ ४३ ॥ अक्षया वर्द्धमाना च सुप्रकाशा विहङ्गमा ॥ नीरजा जननी नित्या जया रोचिष्मती शुभा ॥ ४४ ॥ तपोनुदा च ज्वाला च सुदीप्तिश्चांशुमालिनी ॥ अप्रमेया त्रिधा सूक्ष्मा परा निर्माणदायिनी ॥ ४५ ॥ अवदाता सुशुद्धा च अमोघाख्या परंपरा ॥ संधानकी शुद्धविद्या सर्वभूतमहेश्वरी ॥ ४६ ॥ लक्ष्मीस्तुष्टिर्महाधीरा शांतिरापूरणेन वा ॥ अनुग्रहाशक्तिराद्या जगज्ज्येष्ठा जगद्विधिः ॥ ४७ ॥ सत्या प्रह्वा क्रियायोग्या ह्यपर्णाह्लादिनी शिवा ॥ सम्पूर्णाह्लादिनी शुद्धा ज्योतिष्मत्यमतावहा ॥ ४८ ॥ रजोवत्यर्कप्रतिभाऽऽकर्षिणी कर्षिणी रसा ॥ परा वसुमती देवी कांतिः शांतिर्मतिः कला ॥ ४९ ॥ कला कलंकरहिता विशालोद्दीपनी रतिः ॥ सम्बोधिनी हारिणी च प्रभावा भवभूतिदा ॥ ५० ॥ अमृतस्यंदिनी जीवा जननी खण्डिका स्थिरा ॥ धूमा कलावती पूर्णा भासुरा सुमती रसा ॥ ५१ ॥ शुद्धा ध्वनिः सृतिः सृष्टिर्विकृतिः कृष्टिरेव च ॥ प्रापणी प्राणदा प्रह्वा विश्वा पाण्डुर

वासिनी ॥ ५२ ॥ अवानिर्वज्रनालिका चित्रा ब्रह्माण्डवासिनी ॥ अनंतरूपाऽनंतात्माऽनंतस्थाऽनंतसम्भवा ॥ ५३ ॥ महाशक्तिः प्राणशक्तिः प्राणदात्री रतिम्भरा ॥ महासमूहा निखिला इच्छाधारा सुखावहा ॥ ५४ ॥ प्रत्यक्षलक्ष्मीर्निष्कम्पा प्ररोहाबुद्धिगोचरा ॥ नानादेहा महावर्ता बहुदेहविकासिनी ॥ ५५ ॥ सहस्राणी प्रधाना च न्यायवस्तुप्रकाशिका ॥ सर्वाभिलाषपूर्णेच्छा सर्वा सर्वार्थभाषिणी ॥ ५६ ॥ नानास्वरूपचिद्धात्री शब्दपूर्वा पुरातना ॥ व्यक्ताऽव्यक्ता जविकेशा सर्वेच्छापरिपूरिता ॥ ५७ ॥ सङ्कल्पसिद्धा सांख्येया तत्त्वगर्भा धरावहा ॥ भूतरूपा चित्स्वरूपा त्रिगुणा गुणगर्विता ॥ ५८ ॥ प्रजापतीश्वरी रौद्री सर्वाधारा सुखावहा ॥ कल्याणवाहिका कल्या कलिकल्मषनाशिनी ॥ ५९ ॥ नीरूपोद्भिन्नसंताना सुयंत्रा त्रिगुणालया ॥ महामाया योगमाया महायोगेश्वरी प्रिया ॥ ६० ॥ महास्त्री विमला कीर्तिर्जया लक्ष्मीर्निरञ्जना ॥ प्रकृतिर्भगवन्माया शक्तिर्निद्रा यशस्करी ॥ ६१ ॥ चिंता बुद्धिर्यशः प्रज्ञा शांतिरासातिवर्द्धिनी ॥ प्रद्युम्नमाता साध्वी च सुखसौभाग्यसिद्धिदा ॥ ६२ ॥ काष्ठा निष्ठा प्रतिष्ठा च ज्येष्ठा श्रेष्ठा जयावहा ॥ सर्वातिशायिनी प्रीतिर्विश्वशक्तिर्महाबला ॥ ६३ ॥ वरिष्ठा विजया वीरा जयंती विजयप्रदा ॥ हृद्गृहा गोपिनी गुह्या गणगंधर्वसेविता ॥ ६४ ॥ योगीश्वरी योगमाया योगिनी योगसिद्धिदा ॥ महायोगेश्वरवृता योगा योगेश्वरप्रिया ॥ ६५ ॥ ब्रह्मेन्द्ररुद्रनमिता सुरासुरवरप्रदा ॥ त्रिवर्त्मगा त्रिलोकस्था त्रिविक्रमपदोद्भवा ॥ ६६ ॥ सुतारा तारिणी तारा दुर्गा संतारिणी परा ॥ सुतारिणी तारयंती भूरितारेश्वरप्रभा ॥ ६७ ॥ गुह्यविद्या यज्ञविद्या महाविद्या सुशोभिता ॥ अध्यात्मविद्या विघ्नेशी पद्मस्था परमेष्ठिनी ॥ ॥ ६८ ॥ आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिर्नयात्मिका ॥ गौरी वागीश्वरी गोप्त्री गायत्री कमलोद्भवा ॥ ६९ ॥ विश्वम्भरा विश्वरूपा विश्वमाता वसुप्रदा ॥ सिद्धिः स्वाहा स्वधा स्वस्ति सुधा सर्वार्थसाधिनी ॥ ७० ॥ इच्छा सृष्टिर्द्युतिर्भूतिः कीर्तिः श्रद्धा दया मतिः ॥ श्रुतिर्मेधा धृतिर्ह्रीः श्रीर्विद्या विबुधवन्दिता ॥ ७१ ॥ अनसूया घृणा नीतिर्निर्वृतिः कामधुक्करा ॥ प्रतिज्ञा संततिर्भूतिर्द्यौः प्रज्ञा विश्वमानिनी ॥ ७२ ॥ स्मृतिर्वाग्विश्वजननी पश्यंती मध्यमा समा ॥ संध्या मेधा प्रभा भीमा सर्वाकारा सरस्वती ॥ ७३ ॥

कांक्षा माया महामाया मोहिनी माधवप्रिया ॥ सौम्याभोगा महाभोगा भोगिनी भोगदायिनी ॥ ७४ ॥ सुधौतकनकप्रख्या सुवर्णकम
लासना ॥ हिरण्यगर्भा सुश्रोणी हारिणी रमणी रमा ॥ ७५ ॥ चन्द्रा हिरण्मयी ज्योत्स्ना रम्या शोभा शुभावहा ॥ त्रैलोक्यमण्डना
नारी नरेश्वरवरार्चिता ॥ ७६ ॥ त्रैलोक्यसुंदरी रामा महाविभववाहिनी ॥ पद्मस्था पद्मनिलया पद्ममालाविभूषिता ॥ ७७ ॥ पद्म
युग्मधरा कांता दिव्याभरणभूषिता ॥ विचित्ररत्नमुकुटा विचित्राम्बरभूषणा ॥ ७८ ॥ विचित्रमाल्यगंधाढ्या विचित्रायुधवाहना ॥
महानारायणी देवी वैष्णवी वीरवंदिता ॥ ७९ ॥ कालसंकर्षिणी घोरा तत्त्वसंकर्षिणी कला ॥ जगत्सम्पूरणी विश्वा महाविभवभूषणा ॥
॥ ८० ॥ वारुणी वरदा व्याख्या घण्टाकर्णविराजिता ॥ नृसिंही भैरवी ब्राह्मी भास्करी व्योमचारिणी ॥ ८१ ॥ ऐन्द्री कामधनुः
सृष्टिः कामयोनिर्महाप्रभा ॥ दृष्टा काम्या विश्वशक्तिर्बीजगत्यात्मदर्शना ॥ ८२ ॥ गरुडारूढहृदया चान्द्री श्रीर्मधुरानना ॥ महोग्र
रूपा वाराही नारसिंही हतासुरा ॥ ८३ ॥ युगांतहुतभुग्ज्वाला कराला पिंगला कला ॥ त्रैलोक्यभूषणा भीमा श्यामा त्रैलोक्य
मोहिनी ॥ ८४ ॥ महोत्कटा महारक्ता महाचण्डा महासना ॥ शंखिनी लेखिनी स्वस्था लिखिता खेचरेश्वरी ॥ ८५ ॥ भद्रकाली
चैकवीरा कौमारी भवमालिनी ॥ कल्याणी कामधुग्ज्वालामुखी चोत्पलमालिका ॥ ८६ ॥ बालिका धनदा सूर्या हृदयो
त्पलमालिका ॥ अजिता वर्षिणी रीतिर्भरुण्डा गरुडासना ॥ ८७ ॥ वैश्वानरी महामाया महाकाली विभीषणा ॥ महा
मंदारविभवा शिवानन्दा रतिप्रिया ॥ ८८ ॥ उद्रीतिः पद्ममाला च धर्मवेगा विभावनी ॥ सत्क्रिया देवसेना च हिरण्यरज
ताश्रया ॥ ८९ ॥ सहसावर्तमाना च हस्तिनादप्रबोधिनी ॥ हिरण्यपद्मवर्णा च हरिभद्रा सुदुर्द्धरा ॥ ९० ॥ सूर्या हिरण्य
प्रकटसदृशी हेममालिनी ॥ पद्मानना नित्यपुष्टा देवमाताऽमृतोद्भवा ॥ ९१ ॥ महाधना च या शृङ्गी कार्दमी कम्बुकंधरा ॥ आदित्य
वर्णा चन्द्राभा गंधद्वारा दुरासदा ॥ ९२ ॥ वरार्चिता वरारोहा वरेण्या विष्णुवल्लभा ॥ कल्याणी वरदा वामा वामेशी विन्ध्यवासिनी
॥ ९३ ॥ योगनिद्रा योगरता देवकी कामरूपिणी ॥ कंसविद्राविणी दुर्गा कौमारी कौशिकी क्षमा ॥ ९४ ॥

कात्यायनी कालरात्रिर्निशितृप्ता सुदुर्जया ॥ विरूपाक्षी विशालाक्षी भक्तानां परिरक्षिणी ॥ ९५ ॥ बहुरूपा स्वरूपा च विरूपा रूप
वर्जिता ॥ घण्टानिनादबहुला जीमूतध्वानिनिःस्वना ॥ ९६ ॥ महादेवेन्द्रमथिनी भ्रुकुटीकुटिलानना ॥ सत्योपयाचिता चका कौवेरि
ब्रह्मचारिणी ॥ ९७ ॥ आर्या यशोदासुतदा धर्मकामार्थमोक्षदा ॥ दारिद्र्यदुःखशमनी घोरदुर्गार्तिनाशिनी ॥ ९८ ॥ भक्तार्ति
शमनी भव्या भवभर्गापहारिणी ॥ क्षीराब्धितनया पद्मा कमला धरणीधरा ॥ ९९ ॥ रुक्मिणी रोहिणी सीता सत्यभामा यशस्विनी ॥
प्रज्ञाधाराऽमितप्रज्ञा वेदमाता यशोवती ॥ १०० ॥ समाधिर्भावना मैत्री करुणा भक्तवत्सला ॥ अंतर्वेदी दक्षिणा च ब्रह्मचर्य्यपरा गतिः॥
॥ १०१ ॥ दीक्षा वीक्षा परीक्षा च समीक्षा वीरवत्सला ॥ अम्बिका सुरभिः सिद्धा सिद्धविद्याधरार्चिता ॥ १०२ ॥ सुदीप्ता लेलि
हाना च कराला विश्वपूरका ॥ विश्वसंहारिणी दीप्तिस्तापनी ताण्डवप्रिया ॥ १०३ ॥ उद्भवा विरजा राज्ञी तापनी विन्दु
मालिनी ॥ क्षीरधारासुप्रभावा लोकमाता सुवर्चसा ॥ १०४ ॥ हव्यगर्भा चाज्यगर्भा जुह्वतो यज्ञसम्भवा ॥ आप्यायनी पावनी
च दहनी दहनाश्रया ॥ १०५ ॥ मातृका माधवी मुच्या मोक्षलक्ष्मीर्महर्द्धिदा ॥ सर्वकामप्रदा भद्रा सुभद्रा सर्वमंगला ॥ १०६ ॥
श्वेता सुशुक्लवसना शुक्लमाल्यानुलेपना ॥ हंसा हीनकरी हंसी हृद्या हृत्कमलालया ॥ १०७ ॥ सितातपत्रा सुश्रोणी पद्मपत्रायते
क्षणा ॥ सावित्री सत्यसङ्कल्पा कामदा कामकामिनी ॥ १०८ ॥ दर्शनीया दृशा दृश्या स्पृश्या सेव्या वराङ्गना ॥ भोगप्रिया
भोगवती भोगीन्द्रशयनासना ॥ १०९ ॥ आर्द्रा पुष्करिणी पुण्या पावनी पापसूदनी ॥ श्रीमती च शुभाकारा परमैश्वर्यभूतिदा
॥ ११० ॥ अचिंत्यानंतविभवा भवभावविभावनी ॥ निश्रेणिः सर्वदेहस्था सर्वभूतनमस्कृता ॥ १११ ॥ बला बलाधिका देवी
गौतमी गोकुलालया ॥ तोषिणी पूर्णचन्द्राभा एकानन्दा शतानना ॥ ११२ ॥ उद्याननगरद्वारहर्म्योपवनवासिनी ॥ कूष्माण्डी
दारुणा चण्डा किराती नन्दनालया ॥ ११३ ॥ कालायना कालगम्या भयदा भयनाशिनी ॥ सौदामिनी मेघरवा दैत्यदानव
मर्दिनी ॥ ११४ ॥ जगन्माताभयकरी भूतधात्री सुदुर्लभा ॥ काश्यपी शुभदाना च वनमाला शुभा वरा ॥ ११५ ॥ धन्या धन्ये

श्वरी धन्या रत्नदा वसुवर्द्धिनी ॥ गांधर्वी रेवती गङ्गा शकुनी विमलानना ॥ ११६ ॥ इडा शांतिकरी चैव तामसी कमलालया ॥
आज्यपा वज्रकौमारी सोमपा कुसुमाश्रया ॥११७॥ जगत्प्रिया च सरथा दुर्जया खगवाहना ॥ मनोभवा कामचारा सिद्धचारणसेविता
॥ ११८ ॥ व्योमलक्ष्मीर्महालक्ष्मीस्तेजोलक्ष्मीः सुजाज्वला ॥ रसलक्ष्मीर्जगद्योनिर्गंधलक्ष्मीर्वनाश्रया ॥ ११९ ॥ श्रवणा श्रावणा
नेत्रा रसनाघ्राणचारिणी ॥ विरिञ्चिमाता विभवा वरवारिजवाहना ॥ १२० ॥ वीर्य्या वीरेश्वरी वंद्या विशोका वसुवर्द्धिनी ॥ अनाहता
कुण्डलिनी नलिनी वनवासिनी ॥ १२१ ॥ गांधारिणीन्द्रनामिता सुरेन्द्रनमिता सती ॥ सर्वमंगलमांगल्या सर्वकामसमृद्धिदा ॥ १२२ ॥
सर्वानन्दा महानन्दा सत्कीर्तिः सिद्धसेविता ॥ सिनीवाली कुहू राका अमा चानुमतिर्द्युतिः ॥ १२३ ॥ अरुंधती वसुमती भार्गवी वास्तु
देवता ॥ मयूरी वज्रवेताली वज्रहस्ता वरानना ॥ १२४ ॥ अनघा धरणिर्धीरा धमनी मणिभूषणा ॥ राजश्रीरूपसहिता ब्रह्मश्री
र्ब्रह्मवन्दिता ॥ १२५ ॥ जयश्रीर्जयदा ज्ञेया सर्गश्रीः स्वर्गतिः सताम् ॥ सुपुष्पा पुष्पनिलया फलश्रीर्निष्कलप्रिया ॥ १२६ ॥ धनु
र्लक्ष्मीस्त्वमिलिता परक्रोधनिवारिणी ॥ कद्रूर्द्धनायुः कपिला सुरसा सुरमोहिनी ॥ १२७ ॥ महाश्वेता महानीला महामूर्तिर्विषापहा ॥
सुप्रभा ज्वालिनी दीप्तिस्तृप्तिर्व्याभिप्रभाकरी ॥१२८॥ तेजोवती पद्मबोधा मदलेखारुणावती ॥ रत्ना रत्नावली भूता शतधामा शतापहा॥
॥ १२९ ॥ त्रिगुणा घोषिणी रक्ष्या नर्दिनी घोषवर्जिता ॥ साध्याऽदितिदितिर्देवी मृगवाहा मृगांकगा ॥ १३० ॥ चित्रनीलोत्पल
गता वृषरत्नाकराश्रया ॥ हिरण्यरजतद्वन्द्वा शंखभद्रासनस्थिता ॥ १३१ ॥ गोमूत्रगोमयक्षीरदधिसर्पिर्जलाश्रया ॥ मरीचिश्चीर
वसना पूर्णा चन्द्रार्कविष्टरा ॥ १३२ ॥ सुसूक्ष्मा निर्वृतिः स्थूला निवृत्तारातिरेव च ॥ मरीचिज्वालिनी धूम्रा हव्यवाहा हिरण्यदा ॥
॥ १३३ ॥ दायिनी कालिनी सिद्धिः शोषिणी संप्रबोधिनी ॥ भास्वरा संहतिस्तीक्ष्णा प्रचण्डज्वलनोज्ज्वला ॥ १३४ ॥ सांगा
प्रचण्डा दीप्ता च वैद्युतिः सुमहाद्युतिः ॥ कपिला नीररक्ता च सुषुम्ना विस्फुलिङ्गिनी ॥ १३५ ॥ अर्चिष्मती रिपुहरा दीर्घा धूमा
वली जरा ॥ सम्पूर्णमण्डला पूषा स्रंसिनी सुमनोहरा ॥ १३६ ॥ जया पुष्टिकरी च्छाया मानसा हृदयोज्ज्वला ॥ सुवर्णकारिणी श्रेष्ठा

मृतसंजीवनी रणे ॥ १३७ ॥ विशल्यकरणी शुभ्रा संधिनी परमौषधिः ॥ ब्राह्मिष्ठा ब्रह्मसहिता ऐन्दवी रत्नसम्भवा ॥ १३८ ॥ विद्यु
त्प्रभा बिन्दुमती त्रिस्वभावगुणाम्बिका ॥ नित्योदिता नित्यहृष्टा नित्यकामकरीषिणी ॥ १३९ ॥ पद्मांका वज्रचिह्ना च वक्रदण्डा
विभासिनी ॥ विदेहपूजिता कन्या माया विजयवाहिनी ॥ १४० ॥ मानिनी मंगला मान्या मानिनी मानदायिनो ॥ विश्वेश्वरी
गणवती मण्डला मण्डलेश्वरी ॥ १४१ ॥ हरिप्रिया भौमसुता मनोज्ञा मतिदायिनी ॥ प्रत्यंगिरा सोमगुप्ता मनोभिज्ञा वदन्मतिः ॥
॥ १४२ ॥ यशोधरा रत्नमाला कृष्णा त्रैलोक्यबंधिनी ॥ अमृता धारिणी हर्षा विनता वल्लकी शची ॥ १४३ ॥ संकुला भामिनी
मिश्रा कादम्बर्यमृता प्रभा ॥ आगता निर्गता वज्रा सुहिता सहिताऽक्षता ॥ १४४ ॥ सर्वार्थसाधनकरी धातुर्द्धारणिकामला ॥ करुणा
धारसम्भूता कमलाक्षी शशिप्रिया ॥ १४५ ॥ सौम्यरूपा महादीप्ता महाज्वाला विकासिनी ॥ माला कांचनमाला च सद्वज्रा
कनकप्रभा ॥ १४६ ॥ प्रक्रियापरमा योक्त्री क्षोभिका च सुखोदया ॥ विजृम्भणा च वज्राख्या शृंखला कमलेक्षणा ॥ १४७ ॥
जयंकरी मधुमती हरिता शशिनी शिवा ॥ मूलप्रकृतिरीशानी योगमाता मनोजवा ॥ १४८ ॥ धर्मोदया भानुमती सर्वाभासा सुखा
वहा ॥ धुरंधरा च बाला च धर्मसेव्या तथागता ॥ १४९ ॥ सुकुमारा सौम्यमुखी सौम्यसम्बोधनोत्तमा ॥ सुमुखी सर्वतोभद्रा गुह्य
शक्तिर्गुहालया ॥ १५० ॥ हलायुधा च कावीरा सर्वशास्त्रसुधारिणी ॥ व्योमशक्तिर्महादेहा व्योमगा मधुमन्मयी ॥ १५१ ॥ गंगा
वितस्ता यमुना चन्द्रभागा सरस्वती ॥ तिलोत्तमोर्वशी रम्भा स्वामिनी सुरसुन्दरी ॥ १५२ ॥ बाणप्रहरणा बाला बिम्बोष्ठी चारु
हासिनी ॥ ककुद्मिनी चारुपृष्ठा दृष्टादृष्टफलप्रदा ॥ १५३ ॥ काम्याचरी च काम्या च कामाचारविहारिणी ॥ हिमशैलेन्द्रसंकाशा
गजेन्द्रवरवाहना ॥ १५४ ॥ अशेषसुखसौभाग्यसम्पदां योनिरुत्तमा ॥ सर्वोत्कृष्टा सर्वमयी सर्वा सर्वेश्वरप्रिया ॥ १५५ ॥
सर्वाङ्गयोनिः साऽव्यक्ता सम्प्रधानेश्वरेश्वरी ॥ विष्णुवक्षःस्थलगता किमतः परमुच्यते ॥ १५६ ॥ परा निर्महिमा देवी हरिवक्षःस्थला
श्रया ॥ सा देवी पापहंत्री च सान्निध्यं कुरुतान्मम ॥ १५७ ॥ इति नाम्नां सहस्रं तु लक्ष्म्याः प्रोक्तं शुभावहम् ॥ परावरेण भेदेन

मुख्यगौणेन भागतः ॥ १५८ ॥ यश्चैतत्कीर्तयेन्नित्यं शृणुयाद्वापि पद्मज ॥ शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः ॥ १५९ ॥
श्रीनिवासं समभ्यर्च्य पुष्पधूपानुलेपनैः ॥ भोगैश्च मधपर्काद्यैर्यथाशक्ति जगद्गुरुम् ॥ १६० ॥ तत्पार्श्वस्थां श्रियं देवीं संपूज्य श्रीधर
प्रियाम् ॥ ततो नामसहस्रेण तोषयेत्परमेश्वरीम् ॥ १६१ ॥ नानारत्नावलीस्तोत्रमिदं यः सततं पठेत् ॥ प्रसादाभिमुखी लक्ष्मीः सर्वं तस्मै
प्रयच्छति ॥ १६२ ॥ यस्या लक्ष्म्याश्च सम्भूताः शक्तयो विश्वगाः सदा ॥ कारणत्वं न तिष्ठंति जगत्यस्मिंश्चराचरे ॥ १६३ ॥
तस्मात्प्रीता जगन्माता श्रीर्यस्याच्युतवल्लभा ॥ सुप्रीताः शक्तयस्तस्य सिद्धिमिष्टां दिशंति हि ॥ १६४ ॥ एक एव जगत्स्वामी शक्ति
मानच्युतः प्रभुः ॥ तदंशशक्तिमंतोऽन्ये ब्रह्मेशानादयो यथा ॥ १६५ ॥ तथैवैका परा शक्तिः श्रीस्तस्य करुणाश्रया ॥ ज्ञानादिषाड्गुण्य
मयी या प्रोक्ता प्रकृतिः परा ॥ १६६ ॥ एकैकशक्तिः श्रीस्तस्या द्वितीयात्मनि वर्त्तते ॥ परा परेशी सर्वेशी सर्वाकारा सनातनी
॥ १६७ ॥ अनंतनामधेया च शक्तिचक्रस्य नायिका ॥ जगच्चराचरमिदं सर्वं व्याप्य व्यवस्थिता ॥ १६८ ॥ तस्मादेकैव परमा
श्रीर्ज्ञेया विश्वरूपिणी ॥ सौम्या सौम्येन रूपेण संस्थिता नटजीववत् ॥ १६९ ॥ यो यो जगति पुंभावः स विष्णुरिति निश्चयः ॥ या या तु
नारीभावस्था तत्र लक्ष्मीर्व्यवस्थिता ॥ १७० ॥ प्रकृतेः पुरुषाच्चान्यस्तृतीयो नैव विद्यते ॥ अथ किं बहुनोक्तेन नरनारीमयो हरिः
॥ १७१ ॥ अनेकभेदभिन्नस्तु क्रियते परमेश्वरः ॥ महाविभूतिं दयितां ये स्तुवंत्यच्युतप्रियाम् ॥ १७२ ॥ ते प्राप्नुवंति परमां लक्ष्मीं
संशुद्धचेतसः ॥ पद्मयोनिरिदं प्राप्य पठन्स्तोत्रमिदं क्रमात् ॥ १७३ ॥ दिव्यमष्टगुणैश्वर्यं तत्प्रसादाच्च लब्धवान् ॥ सकामानांच फलदा
मकामानांच मोक्षदाम् ॥१७४॥ पुस्तकाख्यां भयत्रात्रीं सितवस्त्रां त्रिलोचनाम् ॥ महापद्मनिषण्णां तां लक्ष्मीमजरतां नमः ॥ १७५ ॥
करयुगलगृहीतं पूर्णकुंभं दधाना क्वचिदमलगतस्था शंखपद्माक्षपाणिः ॥ क्वचिदपि दयिताङ्गे चामरव्यग्रहस्ता क्वचिदपि सृणिपाशं
बिभ्रती हेमकांतिः ॥ १७६ ॥ इति पद्मपुराणे काश्मीरवर्णने हिरण्यगर्भहृदये सर्वकामप्रदायकं पुरुषोत्तमप्रोक्तं लक्ष्मीसहस्रनामस्तोत्रं
समाप्तम् ॥ अथ लक्ष्मीहृदयस्तोत्रप्रारंभः ॥ आद्यादिश्रीमहालक्ष्मीहृदयमालामंत्रस्य भार्गव ऋषिः।आद्यादिश्रीमहालक्ष्मीर्देवता । अनुष्टु

वादीनि नानाछन्दांसि । श्रीं बीजम् । ह्रीं शक्तिः । ऐं कीलकम् । आद्यादिमहालक्ष्मीप्रसादसिद्ध्यर्थं पाठे विनियोगः ॥ ॐ भार्गवऋषये नमः शिरसि १ । ॐ अनुष्टुवादिनानाच्छन्दोभ्यो नमो मुखे २ । ॐ आद्यादिश्रीमहालक्ष्म्यै देवतायै नमो हृदये ३ । ॐ श्रीं बीजाय नमो गुह्ये ४ । ह्रीं शक्तये नमः पादयोः ५ । ॐ ऐं कीलकाय नमो नाभौ ६ । ॐ विनियोगाय नमः सर्वांगे ७ ॥ इति ऋष्यादि न्यासः ॥ ॐ श्रीं अंगुष्ठाभ्यां नमः १ । ॐ ह्रीं तर्जनीभ्यां नमः २ । ॐ ऐं मध्यमाभ्यां नमः ३ । ॐ श्रीं अनामिकाभ्यां नमः ४ । ॐ ह्रीं कनिष्ठिकाभ्यां नमः ५ । ॐ ऐं करतलकरपृष्ठाभ्यां नमः६॥इति करन्यासः॥ ॐ श्रीं हृदयाय नमः १ । ॐह्रीं शिरसे स्वाहा २ । ॐ ऐं शिखायै वषट् ३ । श्रीं कवचाय हुम् ४ । ॐ ह्रीं नेत्रत्रयाय वौषट् ५ । ॐ ऐं अस्त्राय फट् ६ । ॐ श्रीं ह्रीं ऐं इति दिग्बन्धः ॥ इति हृदयादि न्यासः॥अथ ध्यानम्–हस्तद्वयेन कमले धारयंतीं स्वलीलया ॥ हारनूपुरसंयुक्तां लक्ष्मीं देवीं विचिंतये॥१॥इति ध्यात्वा संपूज्य–ॐ शंख चक्रगदाहस्ते शुभ्रवर्णे सुवासिनि ॥ मम देहि वरं लक्ष्मि सर्वसिद्धिप्रदायिनि ॥ २ ॥ इति संप्रार्थ्य । 'ॐ श्रीं ह्रीं ऐं महालक्ष्म्यै कमल धारिण्यै सिंहवाहिन्यै स्वाहा ॥' इति मंत्रं जपित्वा पुनः पूर्ववद्धृदयादिषडंगन्यासं कृत्वा स्तोत्रं पठेत् । तथाच–वन्दे लक्ष्मीं परशिवमयीं शुद्धजाम्बूनदाभां तेजोरूपां कनकवसनां सर्वभूषोज्ज्वलांगीम् ॥ बीजापूरं कनककलशं हेमपद्मं दधानामाद्यां शक्तिं सकलजननीं विष्णु वामांकसंस्थाम् ॥ १ ॥ श्रीमत्सौभाग्यजननीं स्तौमि लक्ष्मीं सनातनीम् ॥ सर्वकामफलावाप्तिसाधनैकसुखावहाम् ॥ २ ॥ स्मरामि नित्यं देवेशि त्वया प्रेरितमानसः ॥ त्वदाज्ञां शिरसा धृत्वा भजामि परमेश्वरीम् ॥ ३ ॥ समस्तसंपत्सुखदां महाश्रियं समस्तसौभाग्य करीं महाश्रियम् ॥ समस्तकल्याणकरीं महाश्रियं भजाम्यहं ज्ञानकरीं महाश्रियम् ॥ ४ ॥ विज्ञानसम्पत्सुखदां सनातनीं विचित्र वाग्भूतिकरीं मनोहराम् ॥ अनंतसामोदसुखप्रदायिनीं नमाम्यहं भूतिकरीं हरिप्रियाम् ॥ ५ ॥ समस्तभूतांतरसंस्थिता त्वं समस्तभोक्त्री श्वरि विश्वरूपे ॥ तन्नास्ति यत्त्वद्व्यतिरिक्तवस्तु त्वत्पादपद्मं प्रणमाम्यहं श्रीः ॥ ६ ॥ दारिद्र्यदुःखौघतमोपहंत्री त्वत्पादपद्मं मयि सन्नि धत्स्व ॥ दीनार्तिविच्छेदनहेतुभूतैः कृपाकटाक्षैरभिषिञ्च मां श्रीः ॥ ७ ॥ अम्ब प्रसीद करुणासुधयार्द्रदृष्ट्या मां त्वत्कृपाद्रविणगेहमिमं

कुरुष्व ॥ आलोकय प्रणतहृद्गतशोकहंत्री त्वत्पादपद्मयुगलं प्रणमाम्यहं श्रीः ॥ ८ ॥ शांत्यै नमोऽस्तु शरणागतरक्षणायै कांत्यै नमोऽस्तु कमनीयगुणाश्रयायै ॥ क्षांत्यै नमोऽस्तु दुरितक्षयकारणायै दात्र्यै नमोऽस्तु धनधान्यसमृद्धिदायै ॥ ९ ॥ शक्त्यै नमोऽस्तु शशिशेखरसंस्तुतायै रत्यै नमोऽस्तु रजनीकरसोदरायै ॥ भक्त्यै नमोऽस्तु भवसागरतारकायै मत्यै नमोऽस्तु मधुसूदनवल्लभायै ॥ १० ॥ लक्ष्म्यै नमोऽस्तु शुभलक्षणलक्षितायै सिद्ध्यै नमोऽस्तु शिवसिद्धसुपूजितायै ॥ धृत्यै नमोऽस्त्वमितदुर्गतिभञ्जनायै गत्यै नमोऽस्तु वरसद्गतिदायिकायै ॥ ११ ॥ देव्यै नमोऽस्तु दिवि देवगणार्चितायै भूत्यै नमोऽस्तु भवनार्तिविनाशनायै ॥ धात्र्यै नमोऽस्तु धरणीधरवल्लभायै पुष्ट्यै नमोऽस्तु पुरुषोत्तमवल्लभायै ॥ १२ ॥ सुतीव्रदारिद्र्यविदुःखहंत्र्यै नमोऽस्तु ते सर्वभयापहंत्र्यै ॥ श्रीविष्णुवक्षःस्थलसंस्थितायै नमो नमः सर्वविभूतिदायै ॥ १३ ॥ जयतु जयतु लक्ष्मीर्लक्षणालंकृतांगी जयतु जयतु पद्मा पद्मसद्माभिवन्द्या॥ जयतु जयतु विद्या विष्णुवामांकसंस्था जयतु जयतु सम्यक् सर्वसम्पत्करी श्रीः॥१४॥जयतु जयतु देवी देवसंघाभिपूज्या जयतु जयतु भद्रा भार्गवी भाग्यरूपा॥ जयतु जयतु नित्या निर्मलज्ञानवेद्या जयतु जयतु सत्या सर्वभूतांतरस्था॥१५॥ जयतु जयतु रम्या रत्नगर्भांतरस्था जयतु जयतु शुद्धा शुद्धजाम्बूनदाभा ॥ जयतु जयतु कांता कांतिमद्भासितांगी जयतु जयतु शांता शीघ्रमागच्छ सौम्ये ॥ १६ ॥ यस्याः कलायाः कमलोद्भवाद्या रुद्राश्च शक्रप्रमुखाश्च देवाः ॥ जीवंति सर्वा अपि शक्तयस्ताः प्रभुत्वमाप्ताः परमायुषस्ते ॥ १७ ॥ लिलेख निटिले विधिर्मम लिपिं विसृज्यांतरं त्वया विलिखितव्यमेतदिति तत्फलप्राप्तये ॥ तदंतरफले स्फुटं कमलवासिनीश्रीरमां समर्पय समुद्रिकां सकलभाग्यसंसूचिकाम् ॥ १८ ॥ कलया ते यथा देवि जीवंति सचराचराः ॥ तथा सम्पत्करे लक्ष्मि सर्वदा सम्प्रसीद मे ॥ १९ ॥ यथा विष्णुर्ध्रुवे नित्यं स्वकलां संन्यवेशयत् ॥ तथैव स्वकलां लक्ष्मि मयि सम्यक् समर्पय ॥ २० ॥ सर्वसौख्यप्रदे देवि भक्तानामभयप्रदे ॥ अचलां कुरु यत्नेन कलां मयि निवेशिताम् ॥ २१ ॥ मुदास्तां मद्भाले परमपदलक्ष्मीः स्फुटकला सदा वैकुण्ठश्रीर्निवसतु कला मे नयनयोः ॥ वसेत्सत्ये लोके मम वचसि लक्ष्मीवरकला श्रियः श्वेतद्वीपे निवसतु कला मे स्वकरयोः ॥ २२ ॥ तावन्नित्यं ममांगेषु

क्षीराब्धौ श्रीकला वसेत् ॥ सूर्याचन्द्रमसौ यावद्यावल्लक्ष्मीपतिः श्रियाः ॥ २३ ॥ सर्वमंगलसम्पूर्णा सर्वैश्वर्य्यसमन्विता ॥ आद्यादिश्री महालक्ष्मि त्वत्कला मयि तिष्ठतु ॥ २४ ॥ अज्ञानतिमिरं हंतुं शुद्धज्ञानप्रकाशिका ॥ सर्वैश्वर्यप्रदा मेऽस्तु त्वत्कला मयि संस्थिता ॥ २५ ॥ अलक्ष्मीं हरतु क्षिप्रं तमः सूर्यप्रभा यथा ॥ वितनोतु मम श्रेयस्त्वकला मयि संस्थिता ॥ २६ ॥ ऐश्वर्यमंगलोत्पत्तिस्त्वत्कलायां निधीयते ॥ मयि तस्मात्कृतार्थोऽस्मि पात्रमस्मि स्थितेस्तव ॥ २७ ॥ भवदावेशभाग्यार्हो भाग्यवानस्मि भार्गवि ॥ त्वत्प्रसादात्पवित्रोऽहं लोकमातर्नमोऽस्तु ते ॥ २८ ॥ पुनासि मां त्वं कलयैव यस्मादतः समागच्छ ममाग्रतस्त्वम् ॥ परं पदं श्रीर्भव सुप्रसन्ना मय्यच्युतेन प्रविशादिलक्ष्मि ॥ २९ ॥ श्रीवैकुण्ठस्थिते लक्ष्मि समागच्छ ममाग्रतः ॥ नारायणेन सह मां कृपादृष्ट्याऽवलोकय ॥ ३० ॥ सत्यलोकस्थिते लक्ष्मि त्वं ममागच्छ सन्निधिम् ॥ वासुदेवेन सहिता प्रसीद वरदा भव ॥ ३१ ॥ श्वेतद्वीपस्थिते लक्ष्मि शीघ्रमागच्छ सुव्रते ॥ विष्णुना सहिते देवि जगन्मातः प्रसीद मे ॥ ३२ ॥ क्षीराम्बुधिस्थिते लक्ष्मि समागच्छ समाधवा ॥ त्वत्कृपादृष्टिसुधया सततं मां विलोकय ॥ ३३ ॥ रत्नगर्भस्थिते लक्ष्मि परिपूर्णे हिरण्मये ॥ समागच्छ समागच्छ स्थित्वाऽऽशु पुरतो मम ॥ ३४ ॥ स्थिरा भव महालक्ष्मि निश्चला भव निर्मले ॥ प्रसन्ने कमले देवि प्रसन्नहृदया भव ॥ ३५ ॥ श्रीधरे श्रीमहाभूते त्वदंतःस्थं महानिधिम् ॥ शीघ्रमुद्धृत्य परतः प्रदर्शय समर्पय ॥ ३६ ॥वसुंधरे श्रीवसुधे वसुदोग्ध्रि कृपामये ॥ त्वत्कुक्षिगतसर्वस्वं शीघ्रं मे संप्रदर्शय ॥ ॥ ६७ ॥ विष्णुप्रिये रत्नगर्भे समस्तफलदे शिवे ॥ त्वद्गर्भगतहेमादीन् संप्रदर्शय दर्शय ॥ ३८ ॥ रसातलगते लक्ष्मि शीघ्रमागच्छ मे पुरः ॥ न जाने परमं रूपं मातर्मे संप्रदर्शय ॥ ३९ ॥ आविर्भव मनोवेगाच्छीघ्रमागच्छ मे पुरः ॥ मा वत्स भैरिहेत्युक्त्वा कामं गौरिव रक्ष माम् ॥ ४० ॥ देवि शीघ्रं समागच्छ धरणीगर्भसंस्थिते ॥ मातस्त्वद्भृत्यभृत्योऽहं मृगये त्वां कुतूहलात् ॥ ४१ ॥ उत्तिष्ठ जागृहि त्वं मे समुत्तिष्ठ सुजागृहि ॥ अक्षयान्हेमकलशान् सुवर्णेन सुपूरितान् ॥ ४२ ॥ निक्षेपान्मे समाकृष्य समुद्धृत्य ममाग्रतः ॥ समुन्नतानना भूत्वा समाधेहि धरांतरात् ॥ ४३ ॥ मत्सन्निधिं समागच्छ मदाहितकृपारसात् ॥ प्रसीद श्रेयसां दोग्ध्रि लक्ष्मि मे नयना

ग्रतः ॥ ४४ ॥ अत्रोपविश लक्ष्मि त्वं स्थिरा भव हिरण्मये ॥ सुस्थिरा भव संप्रीत्या प्रसीद वरदा भव ॥ ४५ ॥ आनीय त्वं तथा देवि निधीन्मे सम्प्रदर्शय ॥ अद्य क्षणेन सहसा दत्त्वा संरक्ष मां सदा ॥ ४६ ॥ मयि तिष्ठ तथा नित्यं यथेन्द्रादिषु तिष्ठसि ॥ अभयं कुरु मे देवि महालक्ष्मि नमोऽस्तु ते ॥ ४७ ॥ समागच्छ महालक्ष्मि शुद्धजाम्बूनदप्रभे ॥ प्रसीद पुरतः स्थित्वा प्रणतं मां विलोकय ॥ ४८ ॥ भुवं गता भासि लक्ष्मि यत्र यत्र हिरण्मयी ॥ तत्र तत्र स्थिता त्वं मे तव रूपं प्रदर्शय ॥ ४९ ॥ क्रीडते बहुधा भूमौ परिपूर्णहिरण्मये ॥ मम मूर्द्धनि ते हस्तमविलम्बितमर्पय ॥ ५० ॥ फलद्भाग्योदये लक्ष्मि समस्तपुरवासिनि ॥ प्रसीद मे महालक्ष्मि परिपूर्णमनोरथे ॥ ५१ ॥ अयोध्यादिषु सर्वेषु नगरेषु समास्थिते ॥ वैभवैर्विविधैर्युक्ता समागच्छ बलान्विते ॥ ५२ ॥ समागच्छ समागच्छ ममाग्रे भव सुस्थिरा ॥ करुणारसनिष्पन्दनेत्रद्वयविलासिनी ॥ ५३ ॥ सन्निधत्स्व महालक्ष्मि त्वत्पाणिं मम मस्तके ॥ करुणासुधया मां त्वमभिषिञ्च स्थिरीकुरु ॥ ५४ ॥ सर्वराजगृहे लक्ष्मि समागच्छ मुदान्विते ॥ स्थित्वाशु पुरतो मेऽद्य प्रसादेनाभयं कुरु ॥ ॥ ५५ ॥ सादरं मस्तके हस्तं मम त्वं कृपयार्पय ॥ सर्वराजगृहे लक्ष्मि त्वत्कला मयि तिष्ठतु ॥ ५६ ॥ आद्यादिश्रीमहालक्ष्मि विष्णुवामांकसंस्थिते ॥ प्रत्यक्षं कुरु मे रूपं रक्ष मां शरणागतम् ॥ ५७ ॥ प्रसीद मे महालक्ष्मि सुप्रसीद महाशिवे ॥ अचला भव संप्रीत्या सुस्थिरा भव मद्गृहे ॥ ५८ ॥ यावत्तिष्ठंति देवाश्च यावत्त्वन्नाम तिष्ठति ॥ यावद्विष्णुश्च यावत्त्वं तावत्कुरु कृपां मयि ॥ ५९ ॥ चान्द्री कला यथा शुक्ले वर्द्धते सा दिने दिने ॥ तथा दया ते मय्येव वर्द्धतामभिवर्द्धताम् ॥ ६० ॥ यथा वैकुण्ठनगरे यथा वै क्षीरसागरे ॥ तथा मद्भवने तिष्ठ स्थिरा श्रीविष्णुना सह ॥ ६१ ॥ योगिनां हृदये नित्यं यथा तिष्ठसि विष्णुना ॥ तथा मद्भवने तिष्ठ स्थिरा श्रीविष्णुना सह ॥ ६२ ॥ नारायणस्य हृदये भवती यथास्ते नारायणोऽपि तव हृत्कमले यथाऽऽस्ते ॥ नारायणस्त्वमपि नित्यमुभौ तथैव तौ तिष्ठतां हृदि ममापि दयावति श्रीः ॥ ६३ ॥ विज्ञानवृद्धिं हृदये कुरु श्रीः सौभाग्यवृद्धिं कुरु मे गृहे श्रीः ॥ दयासुवृद्धिं कुरुतां मयि श्रीः सुवर्णवृद्धिं कुरु मे गृहे श्रीः ॥ ६४ ॥ न मां त्यजेथाः श्रितकल्पवल्लि सद्भक्तचिंतामणिकामधेनो ॥ विश्वस्य मातर्भव

सुप्रसन्ना गृहे कलत्रेषु च पुत्रवर्गे ॥ ६५ ॥ आद्यादिमाये त्वमजाण्डबीज त्वमेव साकारनिराकृतिस्त्वम् ॥ त्वया धृताश्चाब्जभवाण्ड
सङ्घाश्चित्रं चरित्रं तव देवि विष्णोः ॥ ६६ ॥ ब्रह्मरुद्रादयो देवा वेदाश्चापि न शक्नुयुः ॥ महिमानं तव स्तोतुं मन्दोऽहं शक्नुयां कथम्
॥ ६७ ॥ अम्ब त्वद्वत्सवाक्यानि सूक्तासूक्तानि यानि च ॥ तानि स्वीकुरु सर्वज्ञे दयालुत्वेन सादरम् ॥ ६८ ॥ भवतीं शरणं
गत्वा कृतार्थाः स्युः पुरातनाः ॥ इति सञ्चिन्त्य मनसा त्वामहं शरणं व्रजे ॥ ६९ ॥ अनंता नित्यसुखिनस्त्वद्भक्तास्त्वत्परायणाः ॥
इति वेदप्रमाणाद्धि देवि त्वां शरणं व्रजे ॥ ७० ॥ तव प्रतिज्ञा मद्भक्ता न नश्यंतीत्यपि क्वचित् ॥ इति संचिन्त्य संचिन्त्य प्राणान्सं
धारयाम्यम् ॥ ७१ ॥ त्वदधीनस्त्वहं मातस्त्वत्कृपा मयि विद्यते ॥ यावत्सम्पूर्णकामः स्यात्तावद्देहि दयानिधे ॥ ७२ ॥ क्षणमात्रं
न शक्नोमि जीवितुं त्वत्कृपां विना ॥ न जीवंतीह जलजा जलं त्यक्त्वा जलग्रहाः ॥ ७३ ॥ यथा हि पुत्रवात्सल्याज्जननी प्रस्नुत
स्तनी ॥ वत्सं त्वरितमागत्य संप्रीणयति वत्सला ॥ ७४ ॥ यदि स्यां तव पुत्रोऽहं माता त्वं यदि मामकी ॥ दयापयोधरस्तन्यसुधाभि
रभिषिञ्च माम् ॥ ७५ ॥ मृग्यो न गुणलेशोऽपि मयि दोषैकमन्दिरे ॥ पांसूनां वृष्टिबिन्दूनां दोषाणां च न मे मितिः ॥ ७६ ॥
पापिनामहमेवाग्र्यो दयालूनां त्वमग्रणीः ॥ दयनीयो मदन्योऽस्ति तव कोऽत्र जगत्त्रये ॥ ७७ ॥ विधिनाहं न सृष्टश्चेन्न स्या
त्तव दयालुता ॥ आमयो वा न सृष्टश्चेदौषधस्य वृथोदयः ॥ ७८ ॥ कृपा मदग्रजा किं ते अहं किं वा तदग्रजः ॥
विचार्य्य देहि मे वित्तं तव देवि दयानिधे ॥ ७९ ॥ माता पिता त्वं गुरुसद्गतिः श्रीस्त्वमेव संजीवनहेतुभूता ॥ अन्यन्न
मन्ये जगदेकनाथे त्वमेव सर्वं मम देवि सत्ये ॥ ८० ॥ आद्यादिलक्ष्मीर्भव सुप्रसन्ना विशुद्धविज्ञानसुखैकदोग्ध्री ॥ अज्ञान
हंत्री त्रिगुणातिरिक्ता प्रज्ञाननेत्री भव सुप्रसन्ना ॥ ८१ ॥ अशेषवाग्जाड्यमलापहंत्री नवं नवं स्पष्टसुवाक्प्रदायिनी ॥ ममेह जिह्वा
ग्रसुरङ्गनर्त्तकी भव प्रसन्ना वदने च मे श्रीः ॥ ८२ ॥ समस्तसम्पत्सुविराजमाना समस्ततेजश्चयभासमाना ॥ विष्णुप्रिये त्वं भव
दीप्यमाना वाग्देवता मे नयने प्रसन्ना ॥ ८३ ॥ सर्वप्रदर्शे सकलार्थदे त्वं प्रभासुलावण्यदयाप्रदोग्ध्री ॥ सुवर्णदे त्वं सुमुखी भव श्री

हिरण्मयी मे नयने प्रसन्ना ॥ ८४ ॥ सर्वार्थदा सर्वजगत्प्रसूतिः सर्वेश्वरी सर्वभयापहंत्री ॥ सर्वोन्नता त्वं सुमुखी भव श्रीर्हिरण्मयी मे नयने प्रसन्ना ॥८५॥ समस्तविघ्नौघविनाशकारिणी समस्तभक्तोद्धरणे विचक्षणा ॥ अनंतसौभाग्यसुखप्रदायिनी हिरण्मयी मे नयने प्रसन्ना ॥ ८६ ॥ देवि प्रसीद दयनीयतमाय मह्यं देवाधिनाथभवदेवगणाधिवन्द्ये ॥ मातस्तथैव भव सन्निहिता दृशोर्मे पत्या समं मम मुखे भव सुप्रसन्ना ॥ ८७ ॥ मा वत्स भैरभयदानकरोऽर्पितस्ते मौलौ ममेति मम दीनदयानुकम्पे ॥ मातः समर्पय मुदा करुणा कटाक्षं मांगल्यबीजमिह नः सृज जन्म मातः ॥ ८८ ॥ कटाक्ष इह कामधुक्तव मनस्तु चिंतामणिः करः सुरतरुः सदा नवनिधिस्त्वमेवेन्दिरे ॥ भवे तव दयारसो मम रसायनं चान्वहं मुखं तव कलानिधिर्विविधवाञ्छितार्थप्रदम् ॥ ८९ ॥ यथा रसस्पर्शनतोऽयसोऽपि सुवर्णता स्यात्कमले तथा ते ॥ कटाक्षसंस्पर्शनतो जनानाममंगलानामपि मंगलत्वम् ॥ ९० ॥ देहीति नास्तीति वचःप्रवेशाद्भीतो रमे त्वां शरणं प्रपद्ये ॥ अतः सदाऽस्मिन्नभयप्रदा त्वं सहैव पत्या मयि सन्निधेहि ॥ ९१ ॥ कल्पद्रुमेण मणिना सहिता सुरम्या श्रीस्ते कला मयि रसेन रसायनेन ॥ आस्तां यतो मम शिरःकरदृष्टिपादस्पृष्टाः सुवर्णवपुषः स्थिरजंगमाः स्युः ॥ ९२ ॥ आद्यादिविष्णोः स्थिरधर्मपत्नी त्वमेव पत्या मयि सन्निधेहि ॥ आद्यादिलक्ष्मि त्वदनुग्रहेण पदे पदे मे निधिदर्शनं स्यात् ॥ ९३ ॥ आद्यादिलक्ष्मीहृदयं पठेद्यः स राज्यलक्ष्मीमचलां तनोति ॥ महादरिद्रोऽपि भवेद्धनाढ्यस्तदन्वये श्रीः स्थिरतां प्रयाति ॥ ९४ ॥ अस्य स्मरणमात्रेण तुष्टा स्याद्विष्णुवल्लभा ॥ तस्याभीष्टं ददात्याशु तं पालयति पुत्रवत् ॥ ९५ ॥ इदं रहस्यं हृदयं सर्वकामफलप्रदम् ॥ जपः पञ्चसहस्रं तु पुरश्चरणमुच्यते ॥ ९६ ॥ त्रिकालमेककालं वा नरो भक्तिसमन्वितः ॥ यः पठेच्छृणुयाद्वापि स याति परमां श्रियम् ॥ ९७ ॥ महालक्ष्मीं समुद्दिश्य निशि भार्गववासरे ॥ इदं श्रीहृदयं जप्त्वा पंचवारं धनी भवेत् ॥ ९८ ॥ अनेन हृदयेनान्नं गर्भिण्या अभिमंत्रितम् ॥ ददाति तत्कुले पुत्रो जायते श्रीपतिः स्वयम् ॥ ९९ ॥ नरेण वाऽथवा नार्या लक्ष्मीहृदयमंत्रिते ॥ जले पीते च तद्वंशे मन्दभाग्यो न

जायते ॥ १०० ॥ य आश्विने मासि च शुक्लपक्षे रमोत्सवे सन्निहिते सुभक्त्या ॥ पठेत्तथैकोत्तरवारवृद्ध्या लभेत्स सौवर्णमयीं सुवृ
ष्टिम् ॥ १०१ ॥ य एकभक्तोऽन्वहमेकवर्षं विशुद्धधीः सप्ततिवारजापी ॥ स मन्दभाग्योऽपि रमाकटाक्षाद्भवेत्सहस्राक्षशताधिकश्रीः ॥
॥ १०२ ॥ श्रीशांघ्रिभक्तिं हरिदासदास्यं प्रसन्नमंत्रार्थदृढैकनिष्ठाम् ॥ गुरोः स्मृतिं निर्मलबोधबुद्धिं प्रदेहि मातः परमं पदं श्रियम् ॥१०३॥
पृथ्वीपतित्वं पुरुषोत्तमत्वं विभूतिवासं विविधार्थसिद्धिम् ॥ सम्पूर्णकीर्तिं बहुवर्षभोगं प्रदेहि मे लक्ष्मि पुनः पुनस्त्वम् ॥ १०४ ॥ वादा
र्थसिद्धिं जनवश्यतां च वयःस्थिरत्वं ललनासुभोगम् ॥ पौत्रादिलब्धिं सकलार्थसिद्धिं भवे भवे भार्गवि मे प्रयच्छ ॥ १०५ ॥ अथ
शिरोबीजम् ॥ ॐ यँहँकँलँप्रँश्रीम् ॥ १०६ ॥ ध्यायेल्लक्ष्मीं प्रहसितमुखीं कोटिबालार्कभासं विद्युद्वर्णाम्बरवरधरां भूषणाढ्यां सुशोभाम् ॥
बीजापूरं सरसिजयुगं बिभ्रतीं स्वर्णपात्रं भर्त्रा युक्तां मुहुरभयदा मह्यमप्यच्युतश्रीः ॥ १०७ ॥ गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं
जपम् ॥ सिद्धिर्भवतु मे देवि त्वत्प्रसादान्मयि स्थिरा ॥ १०८ ॥ इति श्रीअथर्वणरहस्ये लक्ष्मीहृदयस्तोत्रं सम्पूर्णम् ॥ अथ लक्ष्मी
सूक्तप्रारंभः ॥ ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ १ ॥ तां म आवह जातवेदो
लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं विन्देयं गामश्वं पूरुषानहम् ॥ २ ॥ अश्वपूर्वां रथमध्यां हस्तिनादप्रमोदिनीम् । श्रियंदेवी मुप
ह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥ कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीम् । पद्मे स्थितां पद्मवर्णां तामिहोपह्वये
श्रियम् ॥ ४ ॥ चन्द्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् । तां पद्मनेमिं शरणमहं प्रपद्ये अलक्ष्मीर्मे नश्यतां त्वां वृणो
मि ॥ ५ ॥ आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः । तस्य फलानि तपसा नुदंतु मायांतरायाश्च बाह्या अलक्ष्मीः
॥ ६ ॥ उपैतु मां देवसखः कीर्तिश्च मणिना सह । प्रादुर्भूतः सुराष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातु मे ॥ ७ ॥ क्षुत्पिपासामला ज्येष्ठा अल
क्ष्मीर्नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वान्निर्णुद मे गृहात् ॥ ८ ॥ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां
तामिहोपह्वये श्रियम् ॥ ९ ॥ मनसः काममाकूतिं वाचः सत्यमशीमहि । पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ॥ कर्द

मेन प्रजा भूता मयि सम्भ्रम कर्दम । श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥ आपः सृजंतु स्निग्धानि चिक्लीत वस मे गृहे। निच देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥ आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् । सूर्य्यां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ १३ ॥ आर्द्रां यःकरिणीं यष्टिं पिंगलां पद्ममालिनीम् । चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥ १४ ॥ तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् । यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्विन्देयं पुरुषानहम् ॥ १५ ॥ यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् । श्रियः पंचदशर्चं च श्रीकामः सततं जपेत् ॥ १६ ॥ इति श्रीसूक्तम् ॥ इति श्रीमंत्रमहार्णवे मध्यखण्डे लक्ष्मीतंत्रे त्रयोदशस्तरंगः ॥ १३ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ श्रीगणेशाय नमः ॥ अथ कुमीरांतत्रप्रारंभः ॥ रुद्रयामलोत्तरखण्डीयषष्ठपटले ॥ अथ वर्षभेदेन कुमारीभेदः । एकवर्षा भवेत्संध्या
द्विवर्षा च सरस्वती ॥ त्रिवर्षा च त्रिधामूर्तिश्चतुर्वर्षा च कालिका ॥ १ ॥ सुभगा पंचवर्षा तु षड्वर्षा च भवेदुमा ॥ सप्तभिर्मालिनी
साक्षादष्टवर्षा तु कुब्जिका ॥ २ ॥ नवभिः कालसंदर्भा दशभिश्चापराजिता ॥ एकादशे तु रुद्राणी द्वादशाब्दे तु भैरवी ॥ ३ ॥
त्रयोदशे महालक्ष्मीर्द्विसप्ता पीठनायिका ॥ क्षेत्रज्ञा पंचदशभिः षोडशे चाम्बिका मता ॥ ४ ॥ एवं क्रमेण संगृह्य यावत्पुष्पं न जायते ॥
प्रतिपदादिपूर्णांतं वृद्धिभेदेन पूजयेत् ॥ ५ ॥ विश्वसारे तु–अष्टवर्षा तु सा कन्या भवेद्गौरी वरानने ॥ नववर्षा रोहिणी सा दश
वर्षा तु कन्यका ॥ ६ ॥ अत ऊर्द्ध्वं महामाया भवेत्सैव रजस्वला ॥ आरभ्य द्वादशाब्दाच्च यावद्विंशतिसंख्यकम् ॥ ७ ॥ सुकुमारी
च सा प्रोक्ता सर्वतंत्रसमन्विता ॥ यानपाषाणधातूनां तेजोरूपेण संस्थिता ॥ ८ ॥ जीवजंतुषु देवेशि किं वक्तव्यमतः परम् ॥ यत्र
नास्ति महामाया तत्र किंचिन्न विद्यते ॥ ९ ॥ कुब्जिकातंत्रे सप्तपटले तु विशेषः–पञ्चमाब्दात्समारभ्य याद्द्वादशवार्षिकी ॥ कुमारी
सा भवेद्देवी निजरूपप्रकाशिनी ॥ १० ॥ षड्वर्षां च समारभ्य यावच्च नववार्षिकी ॥ तावच्चैव महेशानि साधकाभीष्टसिद्धये ॥ ११ ॥
अष्टवर्षां समारभ्य यावत्त्रयोदशाब्दिकी ॥ कुलजां तां विजानीयात्तत्र पूजां समाचरेत् ॥ १२ ॥ दशवर्षां समारभ्य यावत्षोडशवार्षिकी ॥
युवतीं तां विजानीयाद्देवतां तां विचिंतयेत् ॥ १३ ॥ यामले तु विशेषः–द्वितीयवत्सरादूर्ध्वं यावत्स्यादष्टमाब्दकम् ॥ तावज्जप्त्वा पूज
यित्वा कन्यां सुन्दरमोहिनीम् ॥ १४ ॥ अथ कुमारीणां वर्णभेदो यथा रुद्रयामले उत्तरखण्डे सप्तमपटले–नटीकन्यां हीनकन्यां तथा
कापालिकन्यकाम् ॥ रजकस्यापि कन्यां च तथा नापितकन्यकाम् ॥ १५ ॥ गोपालकन्यकां चैव ब्राह्मणस्यापि कन्यकाम् ॥ शूद्र
कन्यां वैश्यकन्यां तथा वैश्यस्य कन्यकाम् ॥ १६ ॥ चण्डालकन्यकां वापि यत्र कुत्राश्रमे स्थिताम् ॥ सुहृद्वर्गस्य कन्यां च समानीय
प्रयत्नतः ॥ १७ ॥ योगिनीतंत्रे–तस्मात्तां पूजयेद्बालां सर्वजातिसमुद्भवाम् ॥ जातिभेदो न कर्तव्यः कुमारीपूजने शिवे ॥ १८ ॥

१ बृहन्नीलतंत्रेऽपि–एकवर्षेत्यादि सर्वमेवमेव केवलं 'त्रिसप्ता नायिका स्मृता' इति भेदः ॥

जातिभेदान्महेशानि नरकान्तर्निवर्तते ॥ विचिकित्सापरो मंत्री ध्रुवं स पातकी भवेत् ॥ १९ ॥ देवीबुद्ध्या महाभक्तस्तस्मात्तां परि
पूजयेत् ॥ सर्वविद्यास्वरूपा हि कुमारी नात्र संशयः ॥ २० ॥ यदि भाग्यवशाद्देवि वेश्याकुलसमुद्भवाम् ॥ कुमारीं लभते कांते सर्व
स्वेनापि साधकः ॥ २१ ॥ यत्नतः पूजयेत्तां तु स्वर्णरौप्यादिभिर्मुदा ॥ तदा तस्य महासिद्धिर्जायते नात्र संशयः ॥ २२ ॥ अथ
कुमारीदानक्रमफलम् ॥ विवाहयेत्स्वयं कन्यां ब्रह्महत्या विनश्यति ॥ यो यश्च पुण्यकाले तु कन्यादानं समापयेत् ॥ २३ ॥ भुक्ति
मुक्तिफलं तस्य सौभाग्यं सर्वसम्पदः ॥ रुद्रलोके वसेन्नित्यं त्रिनेत्रो भगवान्हरः ॥ २४ ॥ तीर्थकोटिसहस्राणि अश्वमेधशतानि च ॥
तत्फलं लभते मर्त्यो यस्तु कन्यां विवाहयेत् ॥ २५ ॥ वालुकाः सागरे ज्ञेयास्तावदब्दसहस्रकम् ॥ एकैकं कुलमुद्धृत्य रुद्रलोके मही
यते ॥ २६ ॥ तत्तदिष्टदेवतायाः प्रीतये तुष्टये सुधीः ॥ कन्यादानं समाहृत्य मुक्तिमाप्नोति भैरव ॥ २७ ॥ तत्तज्जातीयकन्याया
स्तत्तद्बुद्ध्या च साधकः ॥ विभाव्य शिवरूपत्वं संप्रदानीयकन्यके ॥ २८ ॥ पूर्णरूपं शिवं ध्यात्वा वरं सर्वाङ्गसुन्दरम् ॥
तेजोमयं यशःकांतं कालभैरवरूपिणम् ॥ २९ ॥ बटुकेशं महादेवं वरयेत्साधकाग्रणीः ॥ बालारूपां च त्रैलोक्यसुन्दरीं वर
वर्णिनीम् ॥ ३० ॥ नानालंकारनम्राङ्गीं भद्रविद्याप्रकाशिनीम् ॥ चारुहास्यां महानन्दहृदयां शुभदां शुभाम् ॥ ३१ ॥
ध्यात्वा द्वादशपत्राब्जे पूर्णचन्द्रनिभाननाम् ॥ संप्रदानं समानीय तत्तन्मंत्रेण दापयेत् ॥ ३२ ॥ ॥ अथ कुमारीपूजाप्रयोगः ॥
पूजादिनात्पूर्वदिने गंधपुष्पाक्षतादिभिर्मूलेन 'भगवति कुमारि पूजार्थं त्वं मया निमंत्रिताऽसि मां कृतार्थय' इति निमंत्र्य प्रातराहूय
प्रदक्षिणीकृत्योद्वर्तनाद्यैः स्नापयित्वा गंधतैलेन शरीरं संस्कुर्यात् ॥ केशान् परिष्कृत्य ललाटे सिंदूरं नयनयोः कज्जलं सर्वाङ्गे
चन्दनं दत्त्वा वस्त्रालंकारैराभूष्य पादौ प्रक्षाल्य अष्टदलपीठोपरि समावेश्य तांबूलेन मुखं संशोध्य देशकालौ स्मृत्वाऽमुकफलप्राप्तये
ऽमुककर्मण्यमुकदेव्याः प्रीतये कुमारीणां पूजनं करिष्ये ॥ इति संकल्प्य न्यासान् कुर्यात् ॥ तथा च—ॐ क्रां कुलकुमारिके हृदयाय
नमः १ । ॐ क्रीं कुलकुमारिके शिरसे स्वाहा २ । ॐ क्लूं कुलकुमारिके शिखायै वषट् ३ । ॐ क्रैं कुलकुमारिके कवचाय

हुम् ४ । ॐ क्लौं कुलकुमारिके नेत्रत्रयाय वौषट् ५। ॐ क्लः कुलकुमारिके अस्त्राय फट् ६॥ इति हृदयादिषडंगन्यासः ॥ एवमेव करन्यासं कुर्यात् ॥ इति न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम्–ॐ शंखकुन्देन्दुधवलां द्विभुजां वरदाभयाम् ॥ चन्द्रमध्यमहांभोज हावभावविराजिताम् ॥ १ ॥ बालरूपां च त्रैलोक्यसुन्दरीं वरवर्णिनीम् ॥ नानालंकारनम्रांगीं भद्रविद्याप्रकाशिनीम् ॥ २ ॥ चारु हास्यां महानन्दहृदयां शुभदां शुभाम् ॥ ३ ॥ एवं ध्यात्वाऽऽत्मशिरसि करं दत्त्वा मानसोपचारैः संपूज्य गंधादिपूजनं कुर्यात् ॥ तथा च–ऐं ह्रीं श्रीं हूं ह्लौः संध्यायै कुमार्य्यै नमः ॥ एवं पूर्वबीजान्युच्चार्य्य सरस्वत्यै कुमार्य्यै नम इत्यादिवत्सरानुक्रमेण चतुर्थ्यंतेन नाम्ना आसनादिभिः षोडशभिरुपचारैः संपूजयेत् ॥ ऐं ह्रीं श्रीं हूं ह्लौः कुलकुमारिकायै नमः । जलं समर्पयामि ॥ १ ॥ इदं पाद्यमेवमिदमर्घ्य मिदमाचमनीयमिदमनुलेपनमेतेऽक्षता एतानि पुष्पाणि एष धूप एष दीप इदं नैवेद्यमिदं ताम्बूलमिति पूजयित्वा षडंगन्यासविधिना षडं गानि पूजयेत् ॥ तथा च तत्र क्रमस्तु कुमार्य्या हृदयं दक्षिणहस्तेन धृत्वा महातेजोमयं शुक्लवर्णं विभाव्य–ऐं ह्रीं श्रीं हूं ह्लौः कुल कुमारिके हृदयाय नमः । हृदयश्रीपादुकां पूजयामि । इति सर्वत्र १। शिरः शुक्लवर्णं सर्व्वमयं विभाव्य–हैं ह्रीं श्रीं ऐं कुलकुमा रिके शिरसे स्वाहा । शिरः श्रीपा ० २ । शिखां नीलाञ्जनप्रभां विभाव्य–श्रीं कुलकुमारिके शिखायै वषट् । शिखाश्रीपा० ३ । कवचं प्रथमारुणसंकाशं सुतेजस्कं विभाव्य–ऐं कुलकुमारिके कवचाय हुं । कवचश्रीपा० ४। ततो नेत्रत्रयं सर्वबीजमयं महाप्रभं रक्तवर्णं कोटिजपापुष्पोज्ज्वलं विभाव्य–ऐं कुलकुमारिके नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ५। ह्रीं कुलकुमारिके अस्त्राय फट् । अस्त्रश्रीपा० ६ । ॥ इति षडंगानि पूजयित्वा षोडशनामभिः षोडशवारं पूजयेत् ॥ तथा च– ॐ ऐं संध्यायै नमः १ । ॐ ऐं सरस्वत्यै नमः २ । ॐ ऐं त्रिमूर्त्यै नमः ३ । ॐ ऐं कालिकायै नमः ४ । ॐ ऐं सुभगायै नमः ५ । ॐ ऐं उमायै नमः ६ । ॐ ऐं मालिन्यै नमः ७ । ॐ ऐं कुब्जिकायै नमः ८ । ॐ ऐं कालसंकर्षिण्यै नमः ९ । ॐ ऐं अपराजितायै नमः १० । ॐ ऐं रुद्राण्यै नमः ११ । ॐ ऐं भैरव्यै नमः १२ । ॐ ऐं महालक्ष्म्यै नमः १३ । ॐ ऐं पीठनायिकायै नमः १४ । ॐ ऐं क्षेत्रज्ञायै नमः १५ । ॐ ऐं चर्चिकायै

नमः १६ ॥ इति संपूज्य नवनामभिः पूजयेत् ॥ तथाच–ॐ ह्रीं कौमार्य्यै नमः १। ॐ ह्रीं त्रिपुरायै नमः २। ॐ ह्रीं कल्याण्यै नमः ३। ॐ ह्रीं रोहिण्यै नमः ४। ॐ ह्रीं कामिन्यै नमः ५ । ॐ ह्रीं चण्डिकायै नमः ६ । ॐ ह्रीं शांकर्य्यै नमः ७। ॐ ह्रीं दुर्गायै नमः ८ । ॐ ह्रीं सुभद्रायै नमः ९। इति नामभिः संपूज्य 'ॐ ह्रीं हंसः कुलकुमारिकायै नमः पुष्पांजलिं समर्पयामि' इति पुष्पांजलित्रयं दत्त्वा तत्रांगे स्वेष्टदेवीमावाह्य संपूज्य प्रदक्षिणीकृत्य प्रणमेत् ॥ तथा च–ॐ जगत्पूज्ये जगद्वन्द्ये सर्वशक्तिस्वरूपिणि ॥ पूजां गृहाण कौमारि जगन्मातर्नमोऽस्तु ते ॥ १ ॥ त्रिपुरां त्रिगुणां धात्रीं ज्ञानमार्गस्वरूपिणीम् ॥ त्रैलोक्यवंदितां देवीं त्रिमूर्त्त पूजयाम्यहम् ॥ २ ॥ कालात्मिकां कालभीतां कारुण्यहृदयां शिवाम् ॥ कारुण्यजननीं नित्यां कल्याणीं पूजयाम्यहम् ॥ ३ ॥ अणिमादिगुणोपेतामकारादिस्वरात्मिकाम् ॥ शक्तिभेदात्मिकां लक्ष्मीं रोहिणीं पजयाम्यहम् ॥ ४ ॥ कलाधारां कलारूपां कालचण्डस्वरूपिणीम् ॥ कामदां करुणाधारां कामिनीं पूजयाम्यहम् ॥ ५ ॥ चण्डधारां चण्डमायां चण्डमुण्डविनाशिनीम् ॥ प्रणमामि च देवेशीं चण्डिकां पूजयाम्यहम् ॥ ६ ॥ सुखानंदकरीं शांतां सर्वदेवनमस्कृताम् ॥ सर्वभूतात्मिकां देवीं शांकरीं पूजयाम्यहम् ॥ ७ ॥ दुर्गमे दुस्तरे चैव दुःखत्रयविनाशिनीम् ॥ पूजयामि सदा भक्त्या दुर्गां दुर्गे नमाम्यहम् ॥ ८ ॥ सुंदरीं स्वर्णवर्णाभां सुखसौभाग्यदायिनीम् ॥ सुभद्रजननीं देवीं सुभद्रां प्रणमाम्यहम् ॥ ९ ॥ इति प्रणम्य ततस्तस्याः कुण्डविले सपरिवारं बालभैरवं ध्यात्वा 'ॐ कुलकुमारिके सपरिवारबालभैरवाय नमः' इति गंधपुष्पाभ्यां संपूजयेत् ॥ ततः 'ऐं ह्रीं श्रीं क्लीं हूँ ह्लौः कुलकुमारिके नमः स्वाहा' इति कुमारीमूलमंत्रं स्वीयमंत्रं वा यथाशक्ति जपित्वा प्राणायामं कृत्वा जपं समर्प्य स्तवकवचादिकं पठित्वाष्टांगं पञ्चांगं वा प्रणम्य दक्षिणां दद्यात् ॥ अस्य पुरश्चरणं लक्षजपः । तत्तद्दशांशेन होमतर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ तथा च–अथ वक्ष्ये महादेव्याः कुमार्या जपहोमगम् ॥ लक्षसंख्याजपं कृत्वा मायां वा वाग्भवं मनुम् ॥ १ ॥ कालीबीजं वापि नाथ अथवा कामबीजकम् ॥ सदाशिवेन पुटितं बिन्दुचन्द्रविभूषितम् ॥ २ ॥ अथवा प्रणवेनापि पुटितं त्रिदशेश्वरम् ॥ तद्दशांशेन जुहुयाद्घृताक्तैर्बिल्वपत्रकैः ॥ ३ ॥

अथवा श्वेतपुष्पैश्च कुन्दपुष्पैर्महाफलम् ॥ एवं क्रमेण जुहुयात्करवीरप्रसूनकैः ॥ ४ ॥ घृताक्तैः केवलैर्वापि चन्दनागुरुमिश्रितैः ॥
हविष्याशी दिवा भागे रात्रौ पूजापरो भवेत् ॥ ५ ॥ निजपूजामशेषैस्तु कुलद्रव्यैः प्रपूजयेत् ॥ रविसंख्यं जपेत्तत्र परमानंदरूपधृक्
॥ ६ ॥ जपांते जुहुयान्मंत्री मदुक्तद्रव्यसंयुतैः ॥ ततः प्राणात्मकं वायुं शोधयित्वा पुनः पुनः ॥ ७ ॥ प्राणायामत्रयं कृत्वा चाष्टाङ्गैः
प्रणमेन्मुदा ॥ प्रणामसमये नाथ स्तोत्रमेतत्पठेद्यदि ॥ ८ ॥ कवचं च तथा पठ्यं कुमारीणामथापि वा ॥ निजदेव्या महास्तोत्रं
पीठांगं कवचं ततः ॥ ९ ॥ कुमारीणां महादेव सहस्रं नाम साष्टकम् ॥ पठित्वा सिद्धिमाप्नोति नात्र कार्या विचारणा ॥ १० ॥ तद
शक्तौ स्वदेव्यास्तु सहस्रनाम मंगलम् ॥ अष्टोत्तरं पठेन्नाथ सिद्ध्याकांक्षी न संशयः ॥ ११ ॥ तासां स्तोत्रं शुभं नाथ शृण सर्वत्र
मंगलम् ॥ अकस्मात्सिद्धिमाप्नोति पठित्वा साधकोत्तमः ॥ १२ ॥ अग्रे संस्थाप्य ताः सर्वा रत्नकोटिसुशीतलाः ॥ ततः स्तोत्रं पठेद्धी
मान् समाहितमना वशी ॥ १३ ॥ महादिव्याचाररतो वीरभावोल्बणोऽपि वा ॥ एवं क्रमेण प्रपठेद्भक्तिभावपरायणः ॥ १४ ॥ महा
विद्यामहासेवाभक्तिश्रद्धाप्लुतार्पितः । महाज्ञानी भवेत्क्षिप्रं वांछासिद्धिमवाप्नुयात् ॥ १५ ॥ कुब्जिकातंत्रे—अन्नं वस्त्रं तथा नीरं कुमार्य्यै
यो ददाति हि ॥ अन्नं मेरुसमं देव जलं च सागरोपमम् ॥ १६ ॥ वस्त्रैः कोटिसहस्राब्दशिवलोके महीयते ॥ पूजोपकरणानीह कुमार्य्यै
यो ददाति हि ॥ संतुष्टा देवता तस्य पुत्रत्वे सानुकल्पते ॥ १७ ॥ योगिनीतंत्रे पूर्वखण्डे सप्तदशपटले—कुमारीपूजनफलं वक्तुं ना
र्हामि सुन्दरि ॥ जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि ॥ १८ ॥ यामलेऽपि—कुमारी पूज्यते यत्र स देशः क्षितिपावनः ॥ महापुण्य
तमो भूयात्समंतात्क्रोशपंचकम् ॥ १९ ॥ महापर्वसु सर्वेषु विशेषाच्च पवित्रके ॥ महानवम्यां देवेशि कुमारीं च प्रपूजयेत् ॥ २० ॥
तस्मात्षोडशपर्यंतं युवतीति प्रचक्षते ॥ तत्र भावप्रकाशः स्यात्स भावः परमो युतः ॥ २१ ॥ रक्षितव्याः प्रयत्नेन अक्षतास्ताः
प्रकाशयेत् ॥ महापूजादिकं कृत्वा वस्त्रालंकारभोजनैः ॥ २२ ॥ पूजयेन्मंदभाग्योऽपि लभते जयमंगलम् ॥ अन्येषां कथने नाथ
प्रयोजनमहाफलम् ॥ २३ ॥ विधिना पूजयेद्यस्तु दिव्यवीरपशुस्थितः ॥ भावत्रये महासौख्यं दिव्यकर्म्मणि सत्फलम् ॥ २४ ॥

दिव्यभावस्थितः साक्षात्तंत्रमंत्रफलं लभेत् ॥ कुमारीपूजनादेव कुमारीभोजनादिभिः ॥ २५ ॥ एकद्वित्र्यादिबीजानां फलदा नात्र संशयः ॥ ताभ्यः पुष्पं फलं दत्त्वा अनुलेपादिकं तथा ॥ २६ ॥ बालप्रियं च नैवेद्यं दत्त्वा तद्भावभावितः ॥ मृदा तदंगमात्मानं बाल भावविचेष्टितम् ॥ २७ ॥ अतिप्रियकथालापक्रीडाकौतूहलान्वितः ॥ यथार्थं तत्प्रियं तंत्रं कृत्वा सिद्धीश्वरो भवेत् ॥ २८ ॥ कन्या सर्वसमृद्धिः स्यात्कन्या सर्वं परं तपः ॥ होमो मंत्रार्चनं नित्यक्रिया कौलिकसत्क्रिया ॥ २९ ॥ नानाफलमहाधर्म्मः कुमारी पूजनं विना ॥ तत्तत्कर्म्मफलं नाथ प्राप्नोति साधकोत्तमः ॥ ३० ॥ फलं कोटिगुणं वीरः कुमारीपूजया लभेत् ॥ कुसुमाञ्जलिपूर्णं च कन्यायै कुलपण्डितः ॥ ३१ ॥ ददाति यदि तत्पुष्पं कोटिमेरुहिरण्यवत् ॥ तद्दानजं महापुण्यं क्षणादेव समालभेत् ॥ ३२ ॥ कुमारी भोजिता येन त्रैलोक्यं तेन भोजितम् ॥ कुमारीपूजनं कुर्यात्सर्वकर्मफलाप्तये ॥ ३३ ॥ पूजयेत्परमानन्दैरात्मध्यानपरायणः ॥ मम पूजां यः करोति प्रत्यहं शुद्धभक्तितः ॥ ३४ ॥ तस्य वश्यं कुमारीणां पूजनं भोजनं रवेः ॥ तेजोरूपं विधोश्चाग्नेः सर्वभावैः प्रकाशते ॥ ३५ ॥ तत्पूजनात्तदालापाद्भोजनादपि तच्छुभात् ॥ मम प्रीतिर्भवेत्साक्षाद्देवता गुप्तसंस्थिता ॥ ३६ ॥ बालभैरवदेवस्य कामिनी वदकस्य च ॥ पुत्रस्य सर्वलोकैस्तु पूजितस्य महौजसः ॥ ३७ ॥ पूजाभिर्विविधैर्द्रव्यैः कुमारी देवपूजिता ॥ कुमारी देवता प्रोक्ता सर्वतो जगदीश्वरी ॥ ३८ ॥ पूजार्थं सर्वलोकस्य समानीय सुरेश्वरीम् ॥ पूजयंति महादेवीं गुप्तभावनिवासिनीम् ॥ ३९ ॥ सदा भोजन वाञ्छाढ्या मान्या संतुष्टहासिनी ॥ वृथा न रौति सा देवी कुमारी देवनायिका ॥ ४० ॥ सरस्वतीस्वरूपा सा पूज्यते सर्वनायकैः ॥ शिव भक्तैर्विष्णुभक्तैस्तथान्यदेवपूजिताः ॥ ४१ ॥ सर्वलोकैः पूजिता सा चावश्यं पूज्यते बुधैः ॥ पूजया लभते पुत्रान्पूजया लभते श्रियम् ॥ ४२ ॥ पूजया धनमाप्नोति पूजया लभते महीम् ॥ पूजया लभते लक्ष्मीं सरस्वतीं महौजसम् ॥ ४३ ॥ महाविद्याः प्रसीदंति सर्वे देवा न संशयः ॥ कालभैरवब्रह्मेन्द्रब्राह्मणा ब्रह्मवेदिनः ॥ ४४ ॥ रुद्रश्च देववर्गाश्च वैष्णवा ब्रह्मरूपिणः ॥ अवताराश्च द्विभुजा वैष्णवा मनुशोभिताः ॥ ४५ ॥ अन्ये दिक्पालदेवाश्च चराचरगुरुस्तथा ॥ नानाविद्याश्रिताः सर्वे दानवाः कूटशालिनः ॥ ४६ ॥ उप

सर्गस्थिता ये ये ते ते तुष्टा न संशयः ॥ यद्यहं शुद्धरूपा हि अन्यलोके च का कथा ॥ ४७ ॥ कुमारीपूजनं कृत्वा त्रैलोक्यं वशमानयेत् ॥ महाकांतिर्भवेत्क्षिप्रं सर्वपुण्यफलप्रदम् ॥ ४८ ॥ तत्तन्मंत्रसमुल्लेखात्क्षणात्पुण्यायुतं लभेत् ॥ मंत्रेण पुटितं कृत्वा जप्त्वा सिद्धीश्वरो भवेत् ॥ ४९ ॥ यद्यत्प्रकारमुद्दिश्य वदामि सुरसुन्दरि ॥ तत्तत्कार्यमवश्यं च भिन्नबुद्धिं न कारयेत् ॥ ५० ॥ बृहन्नीलतंत्रे–महाभयातिदुर्भिक्षाद्युत्पातास्तु कुलेश्वरि ॥ दुःस्वप्नभयमृत्युश्च ये चान्ये च समुद्भवाः ॥ ५१ ॥ कुमारीपूजनादेव न ते च प्रभवंति हि ॥ नित्यं क्रमेण देवेशि पूजयेद्विधिपूर्वकम् ॥ ५२ ॥ घ्नंति विघ्नान्पूजिताश्च भयं शत्रून्महोत्कटान् ॥ ग्रहा रोगाः क्षयं यांति भूतवेतालपन्नगाः ॥ ५३ ॥ तंत्रांतरेऽपि–शृणुनाथ कुलार्थं मे कुमारीपूजने मनुम् ॥ महाविद्यामहामंत्रं सिद्धमंत्रं न संशयः ॥ ५४ ॥ एतन्मंत्रप्रभावेण जीवन्मुक्तो भवेत्सुधीः ॥ अन्ते देवीपदं याति सत्यमानन्दभैरव ॥ ५५ ॥ ऐहिका सुखसंपत्तिर्मधुमत्याः प्रसादतः ॥ अवश्यं प्राप्नुयान्मर्त्यो विश्रामं कुरु शंकर ॥ ५६ ॥ वाग्भवेन वपुःक्षोभं मायाबीजे गुणाष्टकम् ॥ श्रियो बीजे श्रियो लाभो मायाबीजे रिपुक्षयः ॥ ५७ ॥ भैरवेण तु बीजेन खेचरत्वं सुरादिभिः ॥ कुमारिका ह्यहं नाथ सदा त्वं हि कुमारकः ॥ ५८ ॥ शतमष्टोत्तरं वापि एकां वा परिपूजयेत् ॥ पूजिताः परिपूज्यंते ह्याविघ्नंस्त्यवमानिताः ॥ ५९ ॥ कुमारी योगिनी साक्षात्कुमारी परदेवता ॥ असुरा दुष्टनागाश्च ये ये दुष्टग्रहा अपि ॥ ६० ॥ भूतवेतालगंधर्वा डाकिनीयक्षराक्षसाः ॥ याश्चान्या देवताः सर्वा भूर्भुवःस्वश्च भैरवाः ॥ ६१ ॥ पृथिव्यादीनि सर्वाणि ब्रह्माण्डं सचराचरम् ॥ ब्रह्मा विष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ॥ ६२ ॥ संतुष्टाः सर्वतुष्टाश्च यस्तु कन्यां प्रपूजयेत् ॥ विधियुक्तां कुमारीं तु भोजयेच्चैव भैरव ॥ ६३ ॥ पाद्यार्घ्यं च तथा धूपं कुंकुमं चंदनं शुभम् ॥ भक्तिभावेन संपूज्य कुमारीभ्यो निवेदयेत् ॥ ६४ ॥ इति कुमारीपटलं समाप्तम् ॥ अथ कुमारीकवचप्रारंभः ॥ अथातः संप्रक्ष्यामि कुमारीकवचं शुभम् ॥ त्रैलोक्यमंगलं नाम महापातकनाशनम् ॥ १ ॥ पठनाद्धारणाल्लोका महासिद्धाः प्रभाकरः ॥ शक्रो देवाधिपः श्रीमान्देवाचार्यो बृहस्पतिः ॥ २ ॥ सम्यक्तेजोमयो वह्निर्धर्मराजो भयानकः ॥ वरुणो देवपूज्यो हि जलानामधिपः स्वयम् ॥

॥ ३ ॥ सर्वहर्ता महावायुः कुमारः कुञ्जरेश्वरः ॥ धनाधिपः प्रियः शंभोः सर्वे देवा दिगीश्वराः ॥ ४ ॥ स एकः प्रभुरेकात्मा सर्वेशो निर्मलोदयः ॥ एतत्कवचपाठेन सर्वे भूपा धनाधिपाः ॥ ५ ॥ प्रणवो मे शिरः पातु माया संध्यात्मिका सती ॥ ललाटोर्ध्वं महामाया पातुमे श्रीसरस्वती ॥ ६ ॥ कामाख्या बटुकेशानी त्रिमूर्तिर्भालमेव तु ॥ चामुण्डा बीजरूपा च वदनं कालिका मम ॥ ७ ॥ पातु मां सूर्य्यगा नित्यं तथा नेत्रद्वयं मम ॥ कर्णयुग्मं कामबीजस्वरूपोमा तपस्विनी ॥ ८ ॥ रसनाग्रं तथा पातु वाग्देवी मालिनी मम ॥ तमोवस्था कामरूपा दंताग्रं कुब्जिका मम ॥ ९ ॥ देवी प्रणवरूपा सा पातु नित्यं शिरो मम ॥ ओष्ठाधरौ शक्तिबीजात्मिका स्वाहास्वरूपिणी ॥ १० ॥ गलदेशं महारौद्री पातु मे चापराजिता ॥ क्षौं बीजं मे सदा कण्ठं रुद्राणी स्वाहयान्विता ॥ ११ ॥ हृदयं षोडशी विद्या पातु षोडशसुस्वरा ॥ द्वौ बाहू पातु सर्वत्र महालक्ष्मीः प्रधानिका ॥ १२ ॥ सर्वमंत्रस्वरूपा मे चोदरं पीठ नायिका ॥ पार्श्वयुग्मं तथा पातु हृद्देवी वाग्भवात्मिका ॥ १३ ॥ कैशोरी कटिदेशं मे मायाबीजस्वरूपिणी ॥ जंघायुग्मं जयंती मे योगिनी कुल्लुकावृता ॥ १४ ॥ सर्वाङ्गमम्बिका देवी पातु मंत्रार्थगामिनी ॥ केशाग्रं कमला देवी नासाग्रं नरमोहिनी ॥ १५ ॥ चुबुकं चण्डिका देवी कुमारी पातु मे सदा ॥ हृदयं ललिता देवी पृष्ठं पर्वतवासिनी ॥ १६ ॥ त्रिशक्तिः षोडशी देवी लिंगं गुह्यं सदा वतु ॥ श्मशाने चाम्बिका देवी गंगा गर्भे च भैरवी ॥ १७ ॥ शून्यागारं पंचमुद्रा मंत्रयंत्रप्रकाशिनी ॥ चतुष्पथे सदा पातु मामेव वज्रधारिणी ॥ १८ ॥ शवासनगता चण्डा मुण्डमालाविभूषिता ॥ पातु मामेव लिंगे च ईश्वरी शक्तिरूपिणी ॥ १९ ॥ वने पातु महाबाला महारण्ये रणप्रिया ॥ महाजले तडागे च शत्रुमध्ये सरस्वती ॥ २० ॥ महाकाशपथे पृथ्वी पातु मां शीतला सदा॥ रणमध्ये राजलक्ष्मीः कुमारी कुलकामिनी ॥ २१ ॥ अर्द्धनारीश्वरी पातु मम पादतलं मही ॥ नवलक्षमहाविद्या कुमारीरूपधारिणी ॥ २२ ॥ कोटिसूर्यप्रतीकाशा चन्द्रकोटिसुशीतला ॥ पातु मां वरदा वाणी बटुकेश्वरकामिनी ॥ २३ ॥ इति ते कथितं नाथ कवचं परमाद्भुतम् ॥ कुमार्याः कुलदायिन्याः पंचतत्त्वार्थपारगम् ॥ २४ ॥ यो जपेत्पंचतत्त्वेन स्तोत्रेण कवचेन

च ॥ आकाशगामिनी सिद्धिर्भवेत्तस्य न संशयः ॥ २५ ॥ वज्रदेहो भवेत्क्षिप्रं कवचस्य प्रसादतः ॥ सर्वसिद्धीश्वरो योगी ज्ञानी भवति यः पठेत् ॥ २६ ॥ विवादे व्यवहारे च संग्रामे कुलमण्डले ॥ महापथे श्मशाने च योग सिद्ध्युद्भवेषु च ॥ २७ ॥ पठित्वा फलमाप्नोति सत्यं सत्यं कुलेश्वर ॥ वशीकरणमेतद्धि सर्वत्र जयदं शुभम् ॥ २८ ॥ पुण्यव्रती पठेन्नित्यं यतिः श्रीमान्भवेद्ध्रुवम् ॥ सिद्धविद्याकुमारी च ददाति सिद्धिमुत्तमाम् ॥ २९ ॥ पठेद्यः शृणुयाद्वापि स भवेत्कल्प पादपः ॥ भुक्तिं मुक्तिं तुष्टिपुष्टी राजलक्ष्मीं सुसंपदम् ॥ ३० ॥ प्राप्नोति साधकश्रेष्ठो धारयित्वा भवेज्जयी ॥ असाध्यं साधये द्विद्वान्पठित्वा कवचं शुभम् ॥ ३१ ॥ कुलीनानां महासौख्यं धर्मार्थकाममोक्षदम् ॥ योगिनां दिवसे नित्यं कुमारीं पूजये न्निशि ॥ ३२ ॥ उपचारविशेषेण त्रैलोक्यं वशमानयेत् ॥ पललेनाशनेनापि मत्स्येन मुद्रया सह ॥ ३३ ॥ नानाभक्ष्येण भोज्येन गंधद्रव्येण साधकः ॥ माल्येन स्वर्णरजतालंकारेण सुचेलकैः ॥ ३४ ॥ पूजयित्वा जपित्वा च तर्पयित्वा वराननाम् ॥ यज्ञदानतप स्याभिः प्रयोगेण महेश्वर ॥ ३५ ॥ स्तुत्वा कुमारीकवचं यः पठेदेव भावतः ॥ तस्य सिद्धिर्भवेत्क्षिप्रं राजराजेश्वरो भवेत् ॥ ३६ ॥ वांछाफलमवाप्नोति यद्यन्मनसि वर्त्तते ॥ भूर्जपत्रे लिखित्वा यः कवचं धारयेद्यदि ॥ ३७ ॥ शनिमङ्गलवारे च नवम्यामष्टमीदिने ॥ चतुर्दश्यां पौर्णमास्यां कृष्णपक्षे विशेषतः ॥ ३८ ॥ लिखित्वा धारयेद्विद्वानुत्तराभिमुखो भवेत् ॥ महापातकयुक्तोऽपि मुक्तः स्यात्सर्व पातकैः ॥ ३९ ॥ योषिद्वामभुजे धृत्वा सर्वकल्याणमालभेत् ॥ बहुपुत्रान्विता कांता सर्वसम्पत्तिसंयुता ॥ ४० ॥ तथैव पुरुषश्रेष्ठो दक्षिणे धारयेद्भुजे ॥ इहैव दिव्यदेहः स्यात्पंचाननसमप्रभः ॥ ४१ ॥ शिवलोके परं याति वायुवेगो निरामयः ॥ सूर्यमण्डलमाभेद्य परं मोक्षमवाप्नुयात् ॥ ४२ ॥ लोकानामतिसौख्यदं भयहरं श्रीपादभक्तिप्रदं मोक्षार्थं कवचं शुभं प्रपठतामानन्दसिंधूद्भवम् ॥ पंथानं कलिकालघोरकलुषध्वंसैकहेतुं जयं ये लोकाः प्रपठंति धर्ममतुलं मोक्षं व्रजंति क्षणात् ॥ ४३ ॥ इति रुद्रयामले उत्तरतंत्रे महातंत्रोद्दीपने कुमार्य्युपचर्य्याविन्यासे कुमारीकवचोल्लासे सिद्धमंत्रप्रकरणे भावनिर्णयकुमारीकवचं समाप्तम् ॥ अथ कुमारीस्तोत्रप्रारंभः ॥

भैरव उवाच ॥ देवेन्द्रादय इन्दुकोटिकिरणां वाराणसीवासिनीं विद्यां वाग्भवकामिनीं त्रिनयनां सूक्ष्मत्रियागामिनीम् ॥ चण्डोद्वेगनिकृन्तनीं त्रिजगतां धात्रीं कुमारीं वरां मूलांभोरुहवासिनीं शशिमुखीं संपजयंति श्रियम् ॥ १ ॥ भाव्यां देवगणैः शिवेन्द्रयतिभिर्मोक्षार्थिभिर्बालिकां संध्यां नित्यगुणोदयां द्विजगणश्रेष्ठोदयांशारुहाम् ॥ शुक्लाभां परमेश्वरीं शुभकरीं भद्रां विशालाननां गायत्रीं गणमातरं दिनपतिं कृष्णां च वृद्धां भजे ॥ २ ॥ बालां बालकपूजितां गुणयुतां विद्यावतां मोक्षदां धात्रीं शुक्लसरस्वतीं नरवरां वाग्वादिनीं चण्डिकाम् ॥ स्वाधिष्ठानहरप्रियां प्रियकरीं वेदांतविद्याप्रदां नित्यं मोक्षहिताय योगवपुषां चैतन्यरूपां भजे ॥ ३ ॥ नानारत्नसमूहनिर्मितगृहे पूज्यां सुरैर्बालिकां वन्दे नन्दनकानने मनसि सिद्धांतैकबीजानने ॥ अर्थं देहि निरर्थकाय वपुषे हित्वा कुमारीं कलां मह्यं मातृकुमारिके त्रिविधया मूर्त्या च तेजोमयी ॥ ४ ॥ हालाहालकरालिकां कुरुपथोल्लासैः कराब्जोद्वहां नासामोदकरालिनीं हि भजतां कामातिरिक्तप्रदाम् ॥ बालोऽहं बटुकेश्वरस्य चरणांभोजाश्रितोऽहं सदा हि त्वां बालकुमारिके शिरसि शुक्लांभोरुहे संभजे ॥ ५ ॥ सूर्याह्लादवलाकिनीं कलिमहापापार्दितापापहां तेजोगां भुवि सूर्यगां भयहरां तेजोमयीं कालिकाम् ॥ वन्दे हृत्कमले सदा रविदले बालेन्द्रविद्यां सतीं साक्षात्सिद्धिकरीं कुमारि विमले त्वामाद्यरूपेश्वरीम् ॥ ६ ॥ नित्यं श्रीकुलकामिनीं कुलवतीं कौलामुनामम्बिकां नानायोगविलासिनीं सुरमणीं नित्यां तपस्यान्विताम् ॥ वेदान्तार्थविशेषदेशवसना भाषाविशेषस्थितां वंदे पर्वतराजराजतनयां कालप्रिये त्वामहम् ॥ ७ ॥ कौमारीं कुलमालिनीं रिपुगणक्षोभाग्निसंदायिनीं रक्ताभानयनां शुभां परममार्गां मुक्तिसंज्ञाप्रदाम् ॥ भार्यां भोगवतीं पतिं त्रिभुवनेष्वामोदपञ्चाननां पञ्चास्यप्रियकामिनीं भयहरां सर्पादिहारां भजे ॥ ८ ॥ चन्द्रास्यां चरणद्वयां भुजमहाशोभाविनोदीं नदीं मोहादिक्षयकारिणीं वरकरां श्रीकुब्जिकां सुन्दरीम् ॥ ये नित्यं परिपूजयंति सहसा राजेन्द्रचूडामणिं संपत्तिं धनमायुषं त्रिजगतां व्याप्येश्वरत्वं जगुः ॥ ९ ॥ योगीशं भुवनेश्वरं प्रियकरं श्रीकालसंदर्भया शोभासागरगामिनं सुरतरुं वांछाफलोद्दीपनम् ॥ लोकानामघनाशनाय शिवया श्रीसंज्ञया विद्यया धर्म्मप्राणसदैवतं प्रणमतां कल्पद्रुमं भावये ॥ १० ॥ विद्यान्तामपराजितां मदनगामामोदमत्ता

ननां हृत्पद्मस्थितपादुकां कुलकलां कात्यायनीं भैरवीम् ॥ ये ये पुण्यधियो भजंति परमानन्दाब्धिमध्ये मुदा सर्वाच्छादिततेजसाऽभयकरीं
मोक्षाय सत्कीर्तये ॥ ११ ॥ रुद्राणीं प्रणमामि पद्मवदनां कोटयर्कतेजोमयीं नानालंकृतभूषणां कुलभुजामानन्दसंदायिनीम् ॥ श्री
मायां कमलान्वितां हृदि गतां संतानबीजक्रियां वन्देवाग्भवरूपिणींकुलवधूं हूंकारबीजोद्भवाम् ॥ १२ ॥ नमामि वरभैरवीं क्षितितलाघ
कालानलां मृणालकुसुमारुणां भुवनदोषसंशोधिनीम्॥ जगत्त्रयहरां परां हरति या च योगेश्वरीममापदमहर्निशं सकलभोगदां तामहम्
॥ १३ ॥ साम्राज्यं प्रददाति या भगवती विद्या महालक्षणा साक्षादष्टसमृद्धिदा भुवि महालक्ष्मीः कुलक्षोभहा ॥ स्वाधिष्ठानसुपङ्कजे
विलसितां विष्णोरनंतश्रियं वन्दे राजपदप्रदां शुभकरीं कौलेश्वरीं सर्वदा ॥ १४ ॥ पीठानामधिपाधिपामसुरहां विद्यां शुभां नायिकां
सर्वालंकरणान्वितां त्रिजगतां क्षोभापहां वारुणीम् ॥ वन्दे पीठगनायिकां त्रिभुवनच्छायाभिराच्छादितां सर्वेषां हितकारिणीं जयवतामा
नन्दरूपेश्वरीम् ॥ १५ ॥ क्षेत्रज्ञां मदविह्वलां कुलवतीं सिद्धप्रियां प्रेयसीं शंभोः श्रीवटुकेश्वरस्य महतामानन्दसंचारिणीम् ॥ साक्षादा
त्मपरोद्गमां निजमनःक्षोभापहां शाकिनीं वाक्यार्थप्रकटामहं रजतभां वन्दे महाभैरवीम् ॥ १६ ॥ सुपूर्णविधुवन्मुखीं कमलमध्यसंभा
विनीं शिरोदशशते दलेऽमृतमहाब्धिधाराधराम् ॥ प्रणामफलदायिनीं सकलराजवश्यां गुणां नमामि परमाम्बिकां विषयपाशसंहारि
णीम् ॥ १७ ॥ साक्षादहं त्रिभुवनेऽमृतपूर्णदेहां संध्यादिदेविकललः कुलपण्डितेन्द्राम् ॥ तन्नो भजे सुरवरे वरकालिके त्वां सिद्धानले
प्रतिदिनं प्रणमामि भक्त्या ॥ भक्तिं धनं जयपदं यदि देहि दास्यं तस्मिन्महामधुमतीलघुगेहभार्य्याम् ॥ १८ ॥ एतत्स्तोत्रप्रसादेन
कवितावाक्पतिर्भवेत् ॥ महासिद्धीश्वरो दिव्यो वीरभावपरायणः ॥ १९ ॥ सर्वत्र जयमाप्नोति स हि स्याद्धरवल्लभः ॥ वाचामीशो
भवेत्क्षिप्रं कामरूपी भवेन्नरः ॥ २० ॥ पशुरेव महावीरो दिव्यो भवति निश्चितम् ॥ क्रमशोऽप्यष्टसिद्धिः स्याद्वाग्मी भवति निश्चितम्
॥ २१ ॥ सर्वविद्याः प्रसीदंति तष्टाः सर्वदिगीश्वराः ॥ वह्निः शीतलतां याति जलस्तंभं स कारयेत् ॥ २२ ॥ धनवान्पुत्रवान्राजा
इहलोके भवेन्नरः ॥ स संचरति वैकुण्ठे कलासे शिवसन्निधौ ॥ २३ ॥ मुक्त एव महादेव यो नित्यं सर्वदा पठेत् ॥ महाविद्यापदां

भोजं स हि पश्यति निश्चितम् ॥ २४ ॥ इति कुमारीस्तोत्रं समाप्तम् ॥ अथ कमारीसहस्रनामस्तोत्रप्रारंभः ॥ आनंदभैरव उवाच ॥ अस्याः श्रीकुमार्याः सहस्रनामस्तोत्रस्य बटुकभैरव ऋषिः अनुष्टुप्छन्दः । कुमारी देवता । सर्वमंत्रसिद्धिसमृद्धये विनियोगः॥ॐ कुमारी कौशिकी काली कुरुकुल्ला कुलेश्वरी ॥ कनकाभा काञ्चनाभा कमला कालकामिनी ॥ १ ॥ कपालिनी कालरूपा कौमारी कुल वालिका ॥ कांता कुमारकांता च कारणा करिगामिनी ॥ २ ॥ कंधकांता कौलकांता कृतकर्मफलप्रदा ॥ कार्याकार्य्यप्रवक्त्री च कंसहंत्री कुरुक्षया ॥ ३ ॥ कृष्णकांता कालरात्रिः कर्णेषुधारशीकरा ॥ कामहा कपिला काला कालिका कुरु कामिनी ॥ ४ ॥ कुरुक्षेत्रप्रिया कोला कुंती कामातुरातुरा ॥ कलंजभक्षा कैकेयी काकपुच्छध्वजा कला ॥ ५ ॥ कमला कामलक्ष्मीश्च कमलाननकामिनी ॥ कामधेनुस्वरूपा च कामहा कामवर्द्धिनी ॥ ६ ॥ कामदा कामपूज्या च कामातीता कला वती ॥ कौमारी कारणाढ्या च कैशोरी कुशलाकुला ॥ ७ ॥ कम्बुग्रीवा कृष्णनिभा कागराजप्रिया कृतिः ॥ कङ्कणालंकृता कङ्का केवला काकिनी करा ॥ ८ ॥ किरातिनी काकभक्षा करालवदना कुशा ॥ केशिनी केशिहा केशा केशीष्टा च कविप्रिया ॥ ९ ॥ कविनाथस्वरूपा च कटुवाणी कटुस्थिता । कोटरा कोटराक्षी च करनाटकवासिनी ॥ १० ॥ कटकस्था काष्ठसंस्था कंदर्पा केतकी प्रिया ॥ केलिप्रिया कंबलस्था कालदैत्यविनाशिनी ॥ ११ ॥ केतकीपुष्पशाभाढ्या कर्पूरपूर्णजिह्विका ॥ कर्पूरकरका काला कैलास गिरिवासिनी ॥ १२ ॥ कुशासनस्था कादम्बा कुंजरेशी कुलानना ॥ खर्वा खड्गधरा खड्गाखिलहाखिलवृद्धिदा ॥ १३ ॥ खंजना खररूपा च खाराम्लतिक्तमध्यगा ॥ खेलना खेटककरा खरवाक्या खरोत्कटा ॥ १४ ॥ खद्योतचञ्चला खेला खद्योता खगवाहिनी ॥ खेटकस्था खला खस्था खेचरी खेचरप्रिया ॥ १५ ॥ खचरा खचरप्रेमा खलाढया खचरानना ॥ खेचरेशी खरोग्रा च खेचरप्रिय भाषिणी ॥ १६ ॥ खर्जूरासवसंवर्ता खर्जूरफलभोगिनी ॥ खातमध्यस्थिता खाता खाताम्बुपरिपूजिनी ॥ १७ ॥ खातिः खातजलानंदा खलना खञ्जनागतिः॥ खल्वा खरतरा खारी खारोद्वेगनिकृंतनी ॥ १८ ॥ गगनस्था च गीता च गंभीरनादिनी गया ॥ गंगा गभीरा गौरी

च गणनाथप्रिया गतिः ॥ १९ ॥ गुरुभक्ता ग्लानिहीना गेहिनी गोपिनी गिरा ॥ गोगणस्था गाणपत्या गिरिजा गिरिपूजिता ॥ २० ॥
गिरिकांता गणस्था च गिरिकन्या गणेश्वरी ॥ गाधिराजसुता ग्रीवा गुर्वी गुरुश्च शाङ्करी ॥ २१ ॥ गन्धर्वयामिनीगीता गायत्री
गुणदा गुणा ॥ गुग्गलस्था गुरोः पूज्या गीतानंदप्रकाशिनी ॥ २२ ॥ गयासुरप्रिया गेहा गवाक्षजालमध्यगा ॥ गुरुकन्या गुरोः पत्नी
गहना गुरुनादिनी ॥ २३ ॥ गुल्फवायुस्थिता गुल्फगर्दभा गर्दभप्रिया ॥ गुह्या गुह्यगणस्था च गरिमा गैरिका गुदा ॥ २४ ॥ गुदो
र्द्धस्था च गलिता गणिका गोलका गणा ॥ गान्धर्वी गाननगरी गन्धर्वगणपूजिता ॥ २५ ॥ घोरनादा घोरमुखी घोरा घर्मनिवा
रिणी ॥ घनदा घनवर्णा च घनवाहनवाहना ॥ २६ ॥ घर्घरध्वनिचपला घोटा घटपटी घटी ॥ घटिता घटना घोणा घनरूपा घने
श्वरी ॥ २७ ॥ घुष्यातीता घर्घरा च घोराननविमोहिनी ॥ घोरनेत्रा घनरुचा घोरभैरवकन्यका ॥ २८ ॥ घाता घातकरा घात्या
घ्राणा घ्राणगवासिनी ॥ घोरान्धकारसंस्था च घसना घस्वरा घरा ॥ २९ ॥ घोटकस्था घोटका च घोटकेश्वरवाहना ॥ घननीलमणि
श्यामा घर्घरेश्वरकामिनी ॥ ३० ॥ ङकारकूटसम्पन्ना ङकारचक्रगामिनी ॥ ङकारी ङसशा चैव ङीयनीता ङकारिणी ॥ ३१ ॥
चन्द्रमण्डलमध्यस्था चतुरा चारुहासिनी ॥ चारुचन्द्रमुखी चैव चलाङ्गसुगतिप्रिया ॥ ३२ ॥ चंचला चपला चण्डी चेकिताना चरु
स्थिता ॥ चलिता चालना चार्वी चारुभ्रमरनादिनी ॥ ३३ ॥ चोरहा चन्द्रनिलया चान्द्री चक्रपुरस्थिता ॥ चक्रकीला चक्ररूपा
चक्रस्था चक्रसिद्धिदा ॥ ३४ ॥ चक्रिणी चक्रहस्ता च चक्रनाथकुलप्रिया ॥ चक्राभेद्या चक्रकुला चक्रमण्डलशोभिता ॥ ३५ ॥
चक्रेश्वरप्रिया चैला चैलाजिनकुशोत्तरा ॥ चतुर्वेदस्थिता चण्डा चन्द्रकोटिसुशीतला ॥ ३६ ॥ चतुर्गुणा चन्द्रवर्णा चातुरी चतुरप्रिया ॥
चक्षुष्या चक्षुर्वसतिश्चलका चलनप्रिया ॥ ३७ ॥ चार्वंगी चन्द्रनिलया चलदम्बुजलोचना ॥ चर्वरीशा चारुमुखी चारुदंता चर ॥ ९६४ ॥
स्थिता ॥ ३८ ॥ चषकस्थासवा चेता चेतःस्था चैत्रपूजिता ॥ चाक्षुषी चन्द्रमालिनी चन्द्रहासमणिप्रभा ॥ ३९ ॥ छत्रस्था छत्र
रूपा च छत्रच्छायावनस्थिता ॥ छलज्ञा छेश्वरी छाया छायाछिन्नशवा छला ॥ ४० ॥ छत्राचरणशोभाढ्या छात्रिणां छत्रधारिणी ॥

छिन्नातीता छिन्नमस्ता छिन्नकेशा छलोद्भवा ॥ ४१ ॥ छलहा छलदा छाला छिन्ना छन्नजनप्रिया ॥ छलाछला छंभवती छंभसम्बनिवासिनी ॥ ४२ ॥ छद्मगन्धा छदा छन्ना छद्मकेशा छकारिका ॥ छागलारक्तभक्षा च छागलामोदरक्तपा ॥ ४३ ॥ छगलण्डेशकन्या च छगलण्डकुमारिका ॥ छविका छुरिकाकारा छुरिकारिविनाशिनी ॥ ४४ ॥ छिन्ननासा छिन्नहासा छोललोला छलोदरी ॥ छलोद्वेगा छागरीजमाला छागवरप्रदा ॥ ४५ ॥ जटिला जठरश्रीदा जरा यज्ञप्रिया जया ॥ यंत्रस्था जीवजा जीवा जयदा जीवयोगदा ॥ ४६ ॥ जयिनी जमलस्था च जामलोद्भवनायिका ॥ जामलप्रियकन्या च जामलेशी जवाप्रिया ॥ ४७ ॥ जवाकोटिसमप्रख्या जपापुष्पप्रिया जना ॥ जलस्था जागरिमया जरातीता जलस्थिता ॥ ४८ ॥ जीवहा जीवकन्या च जनार्दनकुमारिका ॥ जातुका जलपूज्या च जगन्नाथादिकामिनी ॥ ४९ ॥ जीर्णांगी जीर्णहीना च जीमूतात्यंतशोभिता ॥ जामदा जमदा जृंभा जृंभणांतादिधारिणी ॥ ५० ॥ जयिनी जारजप्रीता जगदानन्दवर्द्धिनी ॥ यमलार्जुनदर्पघ्नी यमलार्जुनभञ्जिनी ॥ ५१ ॥ जय त्रिजगदानन्दा जामलोल्लाससिद्धिदा ॥ जयमाला जापसिद्धिर्जपयज्ञप्रकाशिनी ॥ ५२ ॥ जाम्बुवती जाम्बुवतः कन्यका जलजा जया ॥ जवहंत्री जगद्वुद्धिर्जगत्कर्त्री जगद्गतिः ॥ ५३ ॥ जीवनी जीवनी जाया जगन्माता जनेश्वरी ॥ झंझना झंकमध्यस्था झणत्कारस्वरूपिणी ॥ ५४ ॥ झणज्झणद्वह्निरूपा झनना झल्लरीश्वरी ॥ झटिताक्षा झरा झंझा झर्झराधरकन्यका ॥ ५५ ॥ झणत्कारी झना झन्ता झंकारमालया वृता ॥ झंकारी झर्झरी झिल्ली झल्लेश्वरनिवासिनी ॥ ५६ ॥ ञकारी ञकिराती च ञकारबीजमालिनी ॥ ञनमोऽन्ता ञकारान्ता ञलारपरमेश्वरी ॥ ५७ ॥ ञान्तबीजपुत्रकरा ञेकनेत्रैककामिनी ॥ ञेकनेत्रा ञस्वरूपा ञजहा ञहरी तकी ॥ ५८ ॥ टुण्टुनी टंकहस्ता च टान्तवर्गा टलावती ॥ टपला टालवालाख्या टङ्कारध्वनिरूपिणी ॥ ५९ ॥ टलाती टाक्षरातीता टित्कारादिकुमारिका ॥ टांकास्त्रधारिणी टाना टामोटार्णलभाषिणी ॥ ६० ॥ टंकारीविधना टाका टका टकविमोहिनी ॥ टंकारधरनामाहा टिवी खेचरनादिनी ॥ ६१ ॥ ठठंकारी ठाठरूपा ठकारबीजकारणा ॥ डमरुप्रियवाद्या च डामरस्था डरीजिका ॥

॥ ६२ ॥ डान्तवर्गा डमरुका डरस्था डोरडामरा ॥ डगरार्द्धा डलातीता डदारुकेश्वरी डुता ॥ ६३ ॥ ढार्द्धनारीश्वरा ढामा ढक्कारी ढलना ढला ॥ ढकस्था ढेश्वरसुता ढेमनाभावढोनना ॥ ६४ ॥ णोमाकांतेश्वरी णांतवर्गस्था णतुनावती ॥ णनोमालंककल्याणी णाक्षवी णाक्षबीजिका ॥ ६५ ॥ तुलसीतंतुसूक्ष्माख्या तारल्या तैलगंधिका ॥ तपस्या तापससुता तारिणी तरुणी तला ॥ ६६ ॥ तंत्रस्था तारकब्रह्मस्वरूपा तंतुमध्यगा ॥ तालभक्षा त्रिधामूर्तिस्तारका तैलभक्षिका ॥ ६७ ॥ तारोत्राता तमाला च तकारा तिंतिडीप्रिया ॥ तपस्या तालसंदर्भा तर्जयंती कुमारिका ॥ ६८ ॥ तोकाचारा तलोद्वेगा तक्षका तक्षकप्रिया ॥ तक्षकालंकृता तोषा तावद्रूपा तलप्रिया ॥ ६९ ॥ तलास्त्रधारिणी तापा तपसां फलदायिनी ॥ तल्वल्वप्रहरालीता तलारिगणनाशिनी ॥ ७० ॥ तुला तौली तोलका च तलस्था तलपालिका ॥ तरुणा तत्त्वबुद्धिस्था तत्त्वप्रधारिणी तपा ॥ ७१ ॥ तंत्रप्रकाशकरणी तंत्रार्थदायिनी तथा ॥ तुषारकिरणाङ्गी च चतुर्धावासवप्रभा ॥ ७२ ॥ तैलमार्गाभिसूता च तंत्रसिद्धिफलप्रदा ॥ ताम्रवर्णा ताम्रकेशा ताम्रपात्रप्रिया तमा ॥ ७३ ॥ तमोगुणप्रिया तोला तक्षकारिनिवारिणी ॥ तोषयुक्ता तमायावी तमषोडेश्वरप्रिया ॥ ७४ ॥ तुलना तुल्यरुचिरा तुल्यबुद्धिस्त्रिधामतिः ॥ तक्षभक्षा तालसिद्धिस्त्रस्तरथा त्रस्तगामिनी ॥ ७५ ॥ तलया तैलभा ताली तंत्रगोपनतत्परा ॥ तंत्रमंत्रप्रकाशा च त्रसरेणुस्वरूपिणी ॥ ७६ ॥ त्रिंशदर्शप्रिया तुष्टा तुष्टिस्तुष्टजनप्रिया ॥ थाकारकूटदण्डीशा थदण्डीशप्रियाथत्रा ॥ ७७ ॥ थकाराक्षररूढाङ्गी थांतवर्गार्थकारिका ॥ थांता थमीश्वरी थाका थकारबीजमालिनी ॥ ७८ ॥ दक्षदामप्रिया दोषा दोषजालवनाश्रिता ॥ दशा दशनघोरा च देवी दासप्रिया दया ॥ ७९ ॥ दैत्यहंत्री परा दैत्या दैत्यानां मर्दिनी दिशा ॥ दांता दांतप्रिया दामा दामंता दीर्घकेशिका ॥ ८० ॥ दशना रक्तवर्णा च दरीगृहनिवासिनी ॥ देवमाता दुर्लभा च दीर्घाङ्गी दासकन्यका ॥ ८१ ॥ दशनश्रीर्दीर्घनेत्रा दीर्घनासा च दोषहा ॥ दमयंती दलस्था च द्वेषहंत्री दशास्थिता ॥ ८२ ॥ देशेषिका दिशिगता दशनास्त्रविनाशिनी ॥ दारिद्र्यहा दरिद्रस्था दरिद्रधनदायिनी ॥ ८३ ॥ दंतुरा देशभाषा च दशस्था देशनायिका ॥ द्वेषरूपा द्वेषहंत्री द्वेषारिगणमोहिनी

॥ ८४ ॥ दामोदरस्थाननादा दलानां बलदायिनी ॥ दिग्दर्शनस्थानदर्शदर्शनप्रियवादिनी ॥ ८५ ॥ दामोदरप्रिया दांता दामोदर कलेवरा ॥ द्रविणी द्राविणी दाशा दक्षकन्या दला दृढा ॥ ८६ ॥ दृढासना दासशक्तिर्द्वन्द्वयुद्धप्रकाशिनी ॥ दधिप्रिया दधिस्था च दधिमंगलकारिणी ॥ ८७ ॥ दर्पहा दर्पदा दर्पा दर्भपुण्यप्रिया दधिः ॥ दर्भस्था द्रुपदसुता द्रौपदी द्रुपदप्रिया ॥ ८८ ॥ धर्मचिंता धनाध्यक्षा धनेश्वरवरप्रदा ॥ धनहा धनदा धन्वी धनुर्हस्ता धनुःप्रिया ॥ ८९ ॥ धरणिर्वीर्य्यरूपा च धनस्था धनमोहिनी ॥ धीरा धीरप्रियाधारा धराधरणतत्परा ॥ ९० ॥ धान्यदा धान्यबीजा च धर्माधर्मस्वरूपिणी ॥ धाराधरस्था धन्या च धर्मपुञ्जनिवासिनी ॥ ९१ ॥ धनाढ्यप्रियकन्या च धन्यलोकैश्च सेविता ॥ धर्मार्थकाममोक्षाङ्गी धर्मार्थकाममोक्षदा ॥ ९२ ॥ धराधरा धुरीणा च धवला धवलामुखी ॥ धरा च धामरूपा च ध्रुवा ध्रौव्या ध्रुवप्रिया ॥ ९३ ॥ धनेशी धारणाख्या च धर्मनिन्दाविनाशिनी ॥ धर्म तेजोमयी धर्म्या धैर्याग्रगर्भमोहिनी ॥ ९४ ॥ धारणा धौतवसना धत्तूरफलभोगिनी ॥ नारायणी नरेन्द्रस्था नारायणकलेवरा ॥ ९५ ॥ नरनारायणप्रीता धर्मनिन्दाविमोहिता ॥ नित्या नापितकन्या च नयनस्था नरप्रिया ॥ ९६ ॥ नाम्नी नामप्रिया नारा नारायणसुता नरा ॥ नवीननायकप्रीता नव्या नवफलप्रिया ॥ ९७ ॥ नवीनकुसुमप्रीता नवीनानां ध्वजानुता ॥ नारी निम्नस्थिता निन्दा नन्दिनी नन्दकारिका ॥ ९८ ॥ नवपुष्पमहाप्रीता नवपुष्पसुगंधिका ॥ नन्दनस्था नन्दकन्या नन्दमोक्षप्रदायिनी ॥ ९९ ॥ नमिता नमभेदा च नाम्नार्तवनमोहिनी ॥ नवबुद्धिप्रियानेका नाकस्था नागकन्यका ॥ १०० ॥ निन्दाहीना नवोल्लासा नाकस्थान प्रदायिनी ॥ निंबचक्षुस्थिता निंबा नानक्षेक्षनिवासिनी ॥ १०१ ॥ नाड्यातीता नीलवर्णा नीलपर्णा सरस्वती ॥ नभस्था नायकप्रीता नायकप्रियकामिनी ॥ २०२ ॥ नववर्णा निराहारा निरीहाणां रजःप्रिया ॥ निम्ननाभिप्रभाकारा नरेन्द्रहस्तपूजिता ॥ १०३ ॥ नलस्थिता नलप्रीता नलराजकुमारिका ॥ परेश्वरी परानन्दा परापरविभेदिका ॥ १०४ ॥ परमा परचक्रस्था पार्वती पर्वतप्रिया ॥ पारमेशी पर्व नानापुष्पमाल्यप्रियापरा ॥ १०५ ॥ परा प्रिया प्रीतिदात्री प्रीता प्रथमकामिनी ॥ प्रथमा प्रथमप्रीता पुष्पगंध

प्रिया परा ॥ १०६ ॥ पैष्टीपानरता पीना पीनस्तनसुशोभना ॥ परमानरता पुंसां पाशहस्ता पशुप्रिया ॥ १०७ ॥ पललानन्द रसिका पलालधूमरूपिणी ॥ पलाशपुष्पसङ्काशा पलाशपुष्पमालिनी ॥ १०८ ॥ प्रेमभूता पद्ममुखी पद्मरागसुमानिनी ॥ पद्म माला पापहरा पतिप्रेमाविलासिनी ॥ १०९ ॥ पञ्चाननमनोहारी पञ्चवक्त्रप्रकाशिनी ॥ फलमूलाशना फाली फलदा फाल्गुन प्रिया ॥ ११० ॥ फलनाथप्रिया फल्त्री फल्वकन्या फलोन्मुखी ॥ फेत्कारीतंत्रमुख्या च फेत्कारगणपूजिता ॥ १११ ॥ फेरवी फेरवसुता फलभोगोद्भवा फला ॥ फलप्रिया फलाशक्ता फाल्गुनानन्ददायिनी ॥ ११२ ॥ फालभोगोत्तरा फेला फाल्लम्भोज निवासिनी ॥ वासुदेवग्रहस्था च वासवी वीरपूजिता ॥ ११३ ॥ विषभक्षा बुधसुधा ब्लुंकारी ब्लुवरप्रदा ॥ बृही बृहस्पतिर्वाचा वाचस्पतिवरप्रदा ॥ ११४ ॥ वेदाचारी वेद्यपरा वसुवक्रास्थिता विभा ॥ बोधज्ञा वौषडाख्या च वंशीवदनपूजिता ॥ ११५ ॥ वज्र कांता वक्रगतिर्बदरीवंशवर्द्धिनी ॥ भारती भवरश्रीदा भवपत्नी भवात्मजा ॥ ११६ ॥ भवानी भाविनी भीमा भिषक्भाव्यातुरि स्थिता ॥ भूर्भुवःस्वःस्वरूपा च भूशार्ता भेकनादिनी ॥ ११७ ॥ भीतिर्भङ्गप्रिया भंगा भंगहा भंगहारिणी॥ भर्त्री भगवती भाग्या भगी रथनमस्कृता ॥ ११८ ॥ भगमाला भूतनाथेश्वरी भार्गवपूजिता ॥ भृगुवंशा भीतिहरा भूमिर्भुजगहारिणी ॥ ११९ ॥ भालचन्द्रा भल्वबाला भवभूतिविभूतिदा ॥ भवरस्था मत्तगतिर्मदमत्ता मदप्रिया ॥ १२० ॥ मदिराष्टादशभुजा मदिरामत्तगामिनी ॥ मदिरा सिद्धिदा मध्या मदान्तगतिसिद्धिदा ॥ १२१ ॥ मीनभक्षा मीनरूपा मुद्रा मुद्गप्रिया गतिः ॥ मुशला मुक्तिदा मूर्ता मूकीकरणतत्परा ॥ १२२ ॥ मूषार्ता मृगतृष्णा च मेषभक्षणतत्परा ॥ मैथुनानन्दसिद्धिश्च मैथुनानलसिद्धिदा ॥ १२३ ॥ महालक्ष्मीर्भैरवी च महे न्द्रपीठनायिका ॥ मनःस्था माधवी मुख्या महादेवमनोरमा ॥ १२४ ॥ यशोदा याचना यास्या यमराजप्रिया यमा ॥ यशोराशिविभू षांगी यतिप्रेमकलावती ॥ २२५ ॥ रमणी रामपत्नी च रिपुहा रीतिमध्यगा ॥ रुद्राणी रूपदा रूपा रूपसुन्दरधारिणी ॥ १२६ ॥ रेतःस्था रेतसंप्रीता रेतःस्थाननिवासिनी ॥ रैन्द्रा देवसुतारेदा रिपुवर्गांतकप्रिया ॥ १२७ ॥ रोमावलीन्द्रजननी रोमकूपजगत्पतिः ॥

रौप्यवर्णा रौद्रवर्णा रौप्यालङ्कारभूषणा ॥ १२८ ॥ रंगणा रंगरागस्था रगवह्निकुलेश्वरी ॥ लक्ष्मीर्लांगललीला च लांगली कुलकामिनी ॥ १२९ ॥ लिपिरूपा लीढपादा लतातंतुस्वरूपिणी ॥ लिम्पती लेलिहा लोला लोमराप्रियसिद्धिदा ॥ १३० ॥ लौकिकी लोकसिद्धिर्हि लंकानाथकुमारिका ॥ लक्ष्मीहीना लक्षणा च लप्रिया लार्णमध्यगा ॥ १३१ ॥ विवसा वसनावेशा विवस्वत्कुल कन्यका ॥ वातस्था वातरूपा च वेत्रमध्यनिवासिनी ॥ १३२ ॥ श्मशानभूमिमध्यस्था श्मशानसाधनप्रिया ॥ शवस्था परसिद्धार्था शववक्षसि शोभिता ॥ १३३ ॥ शरणागतपाल्या च शिवकन्या शिवप्रिया ॥ षट्चक्रभेदिनी षोढान्यासजालदृढानना ॥ १३४ ॥ संध्या सरस्वती सुन्या सूर्यगा शारदा सती ॥ हरिप्रिया हरा हाला लावण्यस्था क्षमा क्षुधा ॥ १३५ ॥ क्षेत्रज्ञा सिद्धिदात्री च अम्बिका चापराजिता ॥ आद्या इन्द्रप्रिया ईशा उमा ऊढा ऋतुप्रिया ॥ १३६ ॥ सुतुण्डा स्वरबीजांता हरिवेशादिसिद्धिदा ॥ एकादशीव्रतस्था च ह्यैन्द्री ह्यौषधिसिद्धिदा ॥ १३७ ॥ औपकारी अंशरूपा अस्त्रबीजप्रकाशिनी ॥ इत्येतत्कामुकीनाथ कुमारीणां सुमंगलम् ॥ १३८ ॥ त्रैलोक्यफलदं नित्यमष्टोत्तरसहस्रकम् ॥ महास्तोत्रं धर्मसारं धनधान्यसुतप्रदम् ॥ १३९ ॥ सर्व विद्याफलोल्लासं भक्तिमान् यः पठेत्सुधीः ॥ स सर्वदा दिवारात्रौ संभवेन्मुक्तिमार्गगः ॥ १४० ॥ सर्वत्र जयमाप्नोति वीराणां वल्लभो भवेत् ॥ सर्वे देवा वशं यांति वशीभूताश्च मानवाः ॥ १४१ ॥ ब्रह्माण्डं ये च शंसंति ते तुष्टा नात्र संशयः ॥ ये वसंति च भूलोके देवतुल्यपराक्रमाः ॥ १४२ ॥ ते सर्वे भृत्यतुल्याश्च सत्यं सत्यं कुलेश्वर ॥ अकस्मात्सिद्धिमाप्नोति होमेन यजनेन च ॥ १४३ ॥ जाप्येन कवचाद्येन महास्तोत्रार्थपाठतः ॥ विना यज्ञैर्विना दानैर्विना जप्यैर्लभेत्फलम् ॥ १४४ ॥ यः पठेत्स्तोत्रकं नाम चाष्टोत्तरसहस्रकम् ॥ तस्य शांतिर्भवेत्क्षिप्रं कन्यास्तोत्रं पठेत्ततः ॥ १४५ ॥ वारत्रयप्रपाठेन राजानं वशमानयेत् ॥ एकवारं पठेन्मंत्री धर्मकामार्थमोक्षभाक् ॥ १४६ ॥ त्रिदिनं प्रपठेद्विद्वान्यदि पुत्रं समिच्छति ॥ वारत्रयक्रमेणैव वारैकक्रमतोऽपि वा ॥ १४७ ॥ पठित्वा धनरत्नानामधिपः सर्ववित्तमः ॥ त्रिजगन्मोहयेन्मंत्री वत्सरार्द्धप्रपाठतः ॥ १४८ ॥ वत्सरं व्याप्य यदि वा भक्तिभावेन यः

पठेत् ॥ चिरजीवी खेचरत्वं प्राप्य योगी भवेन्नरः ॥ १४९ ॥ महाह्वस्थितं वर्णं पश्यति स्थिरमानसः ॥ महिलामण्डले स्थित्वा शक्तियुक्तः पठेत्सुधीः ॥ १५० ॥ स भवेत्साधकश्रेष्ठः क्षीरी कल्पद्रुमो भवेत् ॥ सर्वदा यः पठेन्नाथ भावोद्गतकलेवरः ॥ १५१ ॥ दर्शनात्स्तंभनं कर्तुं क्षमो भवति साधकः ॥ जलादिस्तंभने शक्तो वह्निस्तंभादिसिद्धिभाक् ॥ १५२ ॥ वायुवेगी महावाग्ग्मी वेदज्ञो भवति ध्रुवम् ॥ कविनाथो महाविद्यो बंधकः पण्डितो भवेत् ॥ १५३ ॥ सर्वदेशाधिपो भूत्वा देवपुत्रः स्वयं भवेत् ॥ कांतिं श्रियं यशो बुद्धिं प्राप्नोति चलवान् पतिः ॥ १५४ ॥ अष्टसिद्धियुतो नाथ यः पठेदर्थसिद्धये ॥ उटजेऽरण्यमध्ये च पर्वते घोरकानने ॥ १५५ ॥ वने वा प्रेतभूमौ च शरोपरि महारणे ॥ ग्रामभंगे गृहे वाऽपि शून्यागारे नदीतटे ॥ १५६ ॥ गंगागर्भे महापीठे योनि पीठे गुरोर्गृहे ॥ धर्मक्षेत्रे देवगृहे कन्यागारे कुलालये ॥ १५७ ॥ प्रांतरे गोष्ठमध्ये वा राजादिभयहीनके ॥ निर्भयादिस्वदेशेषु शिव लिङ्गालयेऽथवा ॥ १५८ ॥ भुगते चैकलिंगे वा ग्राम्यदेशे शिवाकुले ॥ अश्वत्थमूले बिल्वे वा कुलवृक्षसमीपतः ॥ १५९ ॥ अन्येषु सिद्धिदेशेषु कुलरूपश्च साधकः ॥ दिव्यो वा वीरभावस्थः पृष्ट्वा कन्याः कुलाकुलौ ॥ १६० ॥ कुलद्रव्यैश्च विविधैः सिद्धि द्रव्यैश्च साधकः ॥ मांसीरसेन जुहुयान्मदाक्तकरसेन च ॥ १६१ ॥ हुतशेषं कुलद्रव्यं ताभ्यो दद्यात्सुसिद्धये ॥ तासामुच्छिष्टमानीय जुहुयाद्वक्त्रपङ्कजे ॥ १६२ ॥ घृणालज्जाविनिर्मुक्तः साधकः स्थिरमानसः ॥ पिबेन्मांसरसं मंत्री सदानन्दो महाबली ॥ १६३ ॥ महामांसाष्टकं ताभ्यो मदिराकुंभपूरितम् ॥ तारमायारमावह्निजायामंत्रं पठेत्सुधीः ॥ १६४ ॥ नैवेद्यविधिदानेन पठित्वा स्तोत्रमंग लम् ॥ स्वयं प्रसादं भुक्त्वा हि सर्वविद्याधिपो भवेत् ॥ १६५ ॥ सूकरस्योष्ठमांसेन पीनमीनेन मुद्रया ॥ महाशवघटेनापि दत्त्वा पठति यो नरः ॥ १६६ ॥ ध्रुवं स सर्वगामी स्याद्विना होमेन पूजया ॥ रुद्ररूपी भवेन्नित्यं महाकालात्मको भवेत् ॥ १६७ ॥ सर्वपुण्यफलं नाथ कुलात्प्राप्नोति साधकः ॥ क्षीराब्धिरत्नकोशेशो विपद्गामी च योगिराट् ॥ १६८ ॥ भक्त्या नाथ दयासिंधु निष्कामत्वं लभेद्ध्रुवम् ॥ महाशत्रुपातने च महाशत्रुभये तथा ॥ १६९ ॥ वारैकपाठमात्रेण शत्रूणां वधमानयेत् ॥

शत्रून् संहरते क्षिप्रमंधकारं यथा रविः ॥ १७० ॥ उच्चाटने मारणे च भवेद् घोरतरे नये ॥ पठनाद्धारणान्मर्त्यो देवा वा राक्षसादयः ॥ १७१ ॥ प्राप्नुवंत्यंजसा शांतिं कुमारीनामपाठतः ॥ पुरुषो दक्षिणे बाहौ नारी वामकरे तथा ॥ १७२ ॥ धृत्वा पुत्रादिसंपत्तिं लभते नात्र संशयः ॥ न पूजा न जपः स्नानं पुरश्चर्याविधिश्च न ॥ १७३ ॥ अकस्मात्सिद्धिमाप्नोति सहस्रनामपाठतः ॥ सर्वयज्ञफलं नाथ प्राप्नोति साधकः क्षणात् ॥ १७४ ॥ मंत्रार्थं मंत्रचैतन्यं योनिमुद्रास्वरूपकम् ॥ कोटिवर्षशतेनापि फलं वक्तुं न शक्यते ॥ १७५ ॥ ममाज्ञया मोक्षमुपैति साधको गजांतकं नाथ सहस्रनाम ॥ पठेन्मनुष्यो यदि भक्तिभावतस्तदादि सर्वत्र फलोदयं लभेत् ॥ १७६ ॥ मोक्षं सत्फलभोगिनां स्तववरं सारं परानन्ददं ये नित्यं हि मुदा पठंति सफलं सार्थं च चिंताकुलाः ॥ तेषां वै प्रभवेद्धि कीर्तिकमला श्रीरामतुल्यो जयी कंदर्पायुततुल्यरूपगुणवान् क्रोधे तु रुद्रोपमः ॥ १७७ ॥ इति श्रीरुद्रयामले उत्तरतंत्रे महातंत्रोद्दीपने कुमारीसहस्रनामस्तोत्रं समाप्तम् ॥

॥ अथ कुमारीतर्पणात्मकस्तोत्रप्रारंभः ॥ श्रृणु नाथ प्रवक्ष्यामि कुमारीतर्पणादिकम् ॥ यासां तर्पणमात्रेण कुलसिद्धिर्भवेद्ध्रुवम् ॥ १ ॥ कुलबालां मूलपद्मस्थितां कामविहारिणीम् ॥ शतधा मूलमंत्रेण तर्पयामि सुतुष्टये ॥ २ ॥ मूलपंकजयोगांगीं कुमारीं श्रीसरस्वतीम् ॥ तर्पयामि कुलद्रव्यैस्तव सन्तोषहेतवे ॥ ३ ॥ चारुमूलाधारपद्मे षड्दलांतःप्रकाशिनीम् ॥ श्रीबीजेन तर्पयामि भोगमोक्षाय केवलम् ॥ ४ ॥ स्वाधिष्ठानकुलोल्लासविष्णुसंकेतगामिनीम् ॥ कालिकां निजबीजेन तर्पयामि कुलामृतैः ॥ ५ ॥ स्वाधिष्ठानाख्यपद्मस्थां महातेजोमयीं शिवाम् ॥ सूर्याणां शीर्षमधुना तर्पयामि कुलेश्वरीम् ॥ ६ ॥ मणिपूराब्जमध्येषु मनोहरकलेवराम् ॥ उमादेवीं तर्पयामि मायाबीजेन पार्वतीम् ॥ ७ ॥ मणिपूरांभोजमध्ये त्रैलोक्यपरिपूजिताम् ॥ मानिनीं मलचित्तस्य सद्बुद्धयै तर्पयाम्यहम् ॥ ८ ॥ मणिपूरस्थितां रौद्रीं परमानंदवार्द्धिनीम् ॥ आकाशगामिनीं देवीं कुब्जिकां तर्पयाम्यहम् ॥ ९ ॥ तर्पयामि महादेवीं मंत्रसाधनतत्पराम् ॥ योगिनीं कालसंदर्भां तर्पयामि कुलाननाम् ॥ १० ॥ शक्तिमंत्रप्रदां रौद्रीं लोलजिह्वासमाकुलाम् ॥ अपराजितां महादेवीं तर्प

यामि कुलेश्वरीम् ॥ ११ ॥ महाकौलप्रियां सिद्धां रुद्रलोकसुखप्रदाम् ॥ रुद्राणीं रुद्रकिरणां तर्पयामि मधुप्रियान् ॥ १२ ॥ षोडश स्वरसंसिद्धिं महारौरवनाशिनीम् ॥ महामद्यपानाचित्तां भैरवीं प्रणमाम्यहम् ॥ १३ ॥ त्रैलोक्यवरदां देवीं श्रीबीजमालया वृताम् ॥ महलक्ष्मीं भवैश्वर्यां तर्पयाम्यहमम्बिके ॥ १४ ॥ लोकानां हितकर्त्रीं च हिताहितजनप्रियाम् ॥ तर्पयामि रमाबीजपीठाद्यां पीठ नायिकाम् ॥ १५ ॥ जयंतीं वेदवेदांगमातरं सूर्यमातरम् ॥ तर्पयामि सुधाभिश्च क्षेत्रज्ञां मायया वृताम् ॥ १६ ॥ तर्पयामि कुलानन्दपारगां परमाननाम् ॥ तर्पयाम्याम्बिकां देवीं मायालक्ष्मीं हृदि स्थिताम् ॥ १७ ॥ सर्वासां चरणद्वयाम्बुजतलं चैतन्य विद्यावलां सौख्यार्थं शुभषोडशस्वरयुतां श्रीषोडशींमङ्गलाम्॥आनन्दार्णवपद्मरागखचिते सिंहासने शोभितां त्वां नित्यं परितर्पयामि सकले श्वेताब्जमध्यासने॥१८॥ ये नित्यं परिनिष्ठितं च सकलस्तोत्राङ्गसंतर्पणं विद्यादाननिदानमोक्षपरमं मायामयं यांति ते ॥ नो संति क्षिति मण्डलेश्वरि गणाः सर्वे विपत्कारका राजानं वशयंति योगसकलं नित्या भवंति क्षणात् ॥१९॥ तर्पणात्मकमोक्षाख्यं पठते यदि मानुषः ॥ अष्टैश्वर्ययुतो भूत्वा वत्सरान्मां प्रपश्यति ॥ २० ॥ महायोगी भवेन्नाथ मासादभ्यासतः प्रभो ॥ त्रैलोक्यं क्षोभयेत्क्षिप्रं वाञ्छाफलमवाप्नु यात् ॥ २१ ॥ यः पठेदेकभावेन स तर्पणफलं लभेत् ॥ पूजाफलमवाप्नोति कुमारीस्तोत्रपाठतः ॥ २२ ॥ यो न कुर्यात्कुमार्यर्चां स्तोत्रं च नित्यमंगलम् ॥ स भवेत्पशुकल्पोऽत्र मृत्युस्तस्य पदे पदे॥२३॥ इति रुद्रयामले उत्तरखण्डे महातंत्रोद्दीपने कुमार्युपचर्याविन्यासे सिद्धमंत्र प्रकरणे दिव्यभावनिर्णये भैरवीसंवादे कुमारीतर्पणात्मकस्तोत्रं समाप्तम्॥इति श्रीमंत्रमहार्णवे मध्यखण्डे कुमारीतंत्रे चतुर्दशस्तरंगः॥१४॥


॥ श्रीगणेशाय नमः ॥ अथ कालिन्दीतंत्रप्रारंभः ॥ गर्गाचार्यसंहितायां माधुर्यखण्डे—श्रीनारद उवाच ॥ व्रजेशो हि पुराधीशो गोपो नन्दो धनी महान्॥तद्गृहं मंगलो गत्वा कुटुंबभरणाक्षमः ॥ अदात्सहस्रशस्तस्मै पोषणार्थं स्वकन्यकाः ॥१॥ जाता मत्स्यवरात्तास्तु समुद्रे गोपकन्यकाः॥ तथाऽन्याश्चात्रिवाचापि पृथिव्या दोहनान्नृप ॥ २ ॥ बर्हिष्मतीपुरंध्र्यो या जाता जातिस्मराः पराः ॥ तथान्याप्सरसोऽभूव न्वरान्नारायणस्य च ॥ ३ ॥ तथा सुतलवासिन्यो वामनस्य वरात्स्त्रियः ॥ तथा नागेन्द्रकन्याश्च जाताः शेषवरात्परात् ॥ ४॥ ताभ्यो दुर्वा

सता दत्तं कृष्णापंचांगमद्भुतम्॥ तेन सम्पूज्य यमुनां वव्रिरे श्रीपतिं वरम् ॥५॥ एकदा श्रीहरिस्ताभिर्वृन्दारण्ये मनोहरे ॥ यमुनानिकटे दिव्ये पुंस्कोकिलमधुव्रते ॥ ६ ॥ मधुपध्वनिसंयुक्ते कजत्कोकिलसागरे ॥ मधुमासे मन्दवायौ वसंतलतिकावृते ॥७॥ दोलोत्सवं समारेभे हरिर्मदनमोहनः ॥ कदम्बवृक्षे रहसि कल्पवृक्षमनोहरे ॥ ८ ॥ कालिन्दीजलकल्लोलकोलाहलसमाकुले ॥ सद्दोलाखेलनं चक्रुस्ता गोप्यः प्रेमविह्वलाः ॥ ९ ॥ राधया कीर्तिसुधया चंद्रकोटिप्रकाशया ॥ रेजे वृन्दावने कृष्णो यथा रत्या रतीश्वरः ॥ १० ॥ एवं प्राप्ताश्च याः सर्वाः श्रीकृष्णं नन्दनन्दनम् ॥ परिपूर्णतमं साक्षात्तासां किं वर्ण्यते तपः ॥११॥ नागेन्द्रकन्यकाः सर्वाश्चैत्रमासे मनोहरे ॥ बलभद्रं हरिं प्राप्ताः कृष्णातीरे तु ताः शुभाः ॥ १२ ॥ इदं मया ते कथितं गोपीनां चरितं शुभम् ॥ सर्वपापहरं पुण्यं किं भूयः श्रोतुमिच्छसि ॥ १३ ॥ बहुलाश्व उवाच ॥ यमुनायाश्च पंचांगं दत्तं दुर्वाससा मुने ॥ गोपीभ्यो येन गोविन्दः प्राप्तस्तद् ब्रूहि मां प्रभो ॥ १४ ॥ श्रीनारद उवाच ॥ अत्रैवोदाहरंतीममितिहासं पुरातनम् ॥ यस्य श्रवणमात्रेण पापहानिः परा भवेत् ॥ १५ ॥ अयोध्याधिपतिः श्रीमान्मान्धाता राजसत्तमः ॥ मृगयां विचरन् प्राप्तः सौभरेराश्रमं शुभम् ॥ १६ ॥ वृन्दावने स्थितं साक्षात्कृष्णातीरे मनोहरे ॥ नत्वा जामातरं राजा सौभरिं प्राह मानदः ॥ १७ ॥ मान्धातोवाच ॥ भगवन्सर्ववित्साक्षात्त्वं परावरवित्तमः ॥ लोकानां तमसांधानां दिव्यसूर्य्य इवापरः ॥ १८ ॥ इह लोके भवेद्राज्यं सर्वसिद्धिसमन्वितम् ॥ अमुत्र कृष्णसारूप्यं येन स्यात्तद्वदाशु मे ॥ १९ ॥ सौभरिरुवाच ॥ यमुनायाश्च पंचांगं वदिष्यामि तवाग्रतः॥सर्वसिद्धिकरं शश्वत्कृष्णसारूप्यकारणम् ॥ २० ॥ यावत्सूर्य्य उदेति स्म यावच्च प्रतितिष्ठति ॥ तावद्राज्यप्रदं चात्र श्रीकृष्णवशकारकम् ॥ २१ ॥ कवचं च स्तवं नाम्नः सहस्रं पटलं तथा ॥ पद्धतिं सूर्यवंशेन्द्रे पंचांगानि विदुर्बुधाः ॥ २२ ॥ तत्रादौ यमुनापटलप्रारंभः ॥ मान्धातोवाच ॥ कृष्णायाः पटलं पुण्यं कामदं पद्धतिं तथा ॥ वद मां मुनिशार्दूल त्वं साक्षाज्ज्ञानशेवधिः ॥ १ ॥ सौभरिरुवाच ॥ पटलं पद्धतिं वक्ष्ये यमुनाया महामते ॥ कृत्वा श्रुत्वाऽथ जप्त्वा वा जीवन्मुक्तो भवेन्नरः ॥ २ ॥ मंत्रो यथा—ॐ ह्रीं श्रीं क्लीं कालिन्दीदेव्यै नमः ॥ इत्येकादशाक्षरो मंत्रः । अस्य विधानम्—ॐ अस्य श्रीकालिन्दीमंत्रस्य सौभरि

ऋषिः । अनुष्टुप्छंदः । श्रीयमना देवता । ह्रीं बीजम् । श्रीं शक्तिः । क्लीं कीलकम् । श्रीकलिन्दनन्दिनीप्रसादसिद्ध्यर्थे जपे विनियोगः॥ॐ सौभरि ऋषये नमः शिरसि १ । अनुष्टुप्छंदसे नमो मुखे २ । श्रीयमुनादेवतायै नमो हृदि ३ । ह्रींबीजाय नमो गुह्ये ४ । श्रीं शक्तये नमः पादयोः ५ । क्लीं कीलकाय नमो नाभौ ६ । विनियोगाय नमः सर्वांगे ७ ॥ इति ऋष्यादिन्यासः ॥ ॐ अंगुष्ठाभ्यां नमः १ । ह्रीं तर्जनीभ्यां नमः २ । श्रीं मध्यमाभ्यां नमः ३ । क्लीं अनामिकाभ्यां नमः ४ । कालिन्दीदेव्यै कनिष्ठिकाभ्यां नमः ५ । नमः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ हृदयाय नमः १ । ह्रीं शिरसे स्वाहा २ । श्रीं शिखायै वषट् ३ । क्लीं कवचाय हुम् ४ । कालिन्दीदेव्यै नेत्रत्रयाय वौषट् ५ । नमः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम्— ॐ श्यामामंभोजनेत्रां सघनघनरुचिं रत्नमञ्जीरकूजत्कांचीकेयूरयुक्तां कनकमणिमये बिभ्रतीं कुण्डले द्वे ॥ भ्राजच्छ्रीनीलवस्त्रां स्फुरदमलचलद्धारभारां मनोज्ञां ध्याये मार्तण्डपुत्रीं तनुकिरणचयोद्दीप्तदीपाभिरामाम् ॥१॥ इति ध्यायेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमण्डले मण्डूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति पीठदेवताः संपूज्य मध्ये देवीसिंहासनं स्थापयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रपत्रं ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां चाग्न्युत्तारणमंत्रोच्चारपूर्वकं दत्त्वा स्वच्छवस्त्रेण संप्रोञ्छ्य देव्यष्टगंधेन कर्णिकाषोडशदलभूपुरात्मकं यंत्रं लिखित्वा 'ॐ नमो भगवत्यै कलिंदनंदिन्यै सूर्यकन्यकायै यमभगिन्यै श्रीकृष्णप्रियायै यूथीभूतायै पद्मपीठायै नमः' इति मंत्रेण पुष्पाद्यासनं दत्त्वा सिंहासनोपरि संस्थाप्य प्रतिष्ठां च कुर्यात् । ततः कर्णिकामध्ये श्रीकृष्णेन सह कालिंदीं ध्यात्वा 'ॐ नमो भगवत्यै कलिंदनंदिन्यै सूर्यकन्यकायै यमभगिन्यै श्रीकृष्णप्रियायै यूथीभूतायै स्वाहा' इति मंत्रेणावाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तथा च—पुष्पांजलिमादाय मूलमुच्चार्य—ॐ संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि यमुने परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं दद्यात् ॥ इत्याज्ञां गृहीत्वा आवरणपूजामारभेत ॥ तथा च—पूज्यपूजकयोरंतरालं प्राची । तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण षोडशदलेषु । ॐ जाह्नव्यै

नमः । जाह्नवीश्रीपादुकां पूजयामि तर्पयामि नमः १ । इति सर्वत्र । ॐ विरजायै नमः । विरजाश्रीपा० २ । ॐ कृष्णायै नमः । कृष्णाश्रीपा० ३ । ॐ चन्द्रभागायै नमः । चन्द्रभागाश्रीपा० ४ । ॐ सरस्वत्यै नमः । सरस्वतीश्रीपा० ५ । ॐ गोमत्यै नमः । गोमतीश्रीपा० ६ । ॐ कौशिक्यै नमः । कौशिकीश्रीपा० ७ । ॐ वेण्यै नमः । वेणीश्रीपा० ८ । ॐ सिंधवे नमः । सिंधुश्रीपा० ९ । ॐ गोदावर्य्यै नमः । गोदावरीश्रीपा० १० । ॐ वेदस्मृत्यै नमः । वेदस्मृतिश्रीपा० ११ । ॐ वेत्रवत्यै नमः । वेत्रवतीश्रीपा० १२ । ॐ शतद्रै नमः । शतद्रुश्रीपा० १३ । ॐ सरय्वै नमः । सरयूश्रीपा० १४ । ॐ ऋषिकुल्यायै नमः । ऋषिकुल्याश्रीपा० १५ । ॐ ककुद्मत्यै नमः । ककुद्मतीश्रीपा० १६ ॥ इति षोडशदेवताः पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमच्चार्य–ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्वा विशेषार्घाद्बिंदुं निक्षिप्य पूजितास्तर्पिताः संतु इति वदेत ॥ इति प्रथमावरणम् ॥ १ ॥ ततः भूपराभ्यंतरे चतुर्दिक्षु पर्वादिक्रमेण ॐ वृन्दावनाय नमः । वृंदावनश्रीपा० १ । ॐ गोवर्द्धनाय नमः । गोवर्द्धनश्रीपा० २ । ॐ वृन्दायै नमः । वृन्दाश्रीपा० ३ । ॐ तुलस्यै नमः । तुलसीश्रीपा० ४ । इति चतुरः पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥

यमुनापूजनयन्त्रम् ।



ततो भूपुराद्बहिः पूर्वादिक्रमेण ॐ लं इन्द्राय नमः १। ॐ रं अग्नये नमः २। ॐ मं यमाय नमः ३। ॐ क्षं निर्ऋतये नमः ४। ॐ वं वरुणाय नमः ५। ॐ यं वायवे नमः ६। ॐ कुं कुबेराय नमः ७। ॐ हं ईशानाय नमः ८। इन्द्रेशानयोर्मध्ये ॐ आं ब्रह्मणे नमः ९। वरुणनिर्ऋतिमध्ये ॐ ह्रीं अनंताय नमं १०॥ इतिः दशदिक्पालान् पूजयेत्॥ तत्तत्समीपे ॐ वं वज्राय नमः १। ॐ शं शक्तये नमः २। ॐ दं दंडाय नमः ३। ॐ खं खड्गाय नमः ४। ॐ पां पाशाय नमः ५। ॐ अं अंकुशाय नमः ६। ॐ गं गदायै नमः ७। ॐ त्रिं त्रिशूलाय नमः ८। ७ पं पद्माय नमः ९। ॐ चं चक्राय नमः १०॥ इत्यस्त्राणि पूजयेत्॥ इत्यावरणपूजां धूपादिनमस्कारांतं सम्पूज्य जपं कुर्यात्॥ अस्य पुरश्चरणमेकादशलक्षजपः। तत्तद्दशांशेन होमतर्पणमार्जनब्राह्मणभोजनानि कुर्यात्। एवं कृते मंत्रः सिद्धो भवति। मनस ईप्सितं ददाति। तथाच—जप्त्वैकादशलक्षाणि मंत्रसिद्धिर्भवेद्भुवि। जनैः प्रार्थ्याश्च ये कामाः सर्वे प्राप्याः स्वतश्च ते॥ १॥ यावत्सम्पूर्णतां याति पुरश्चरणमेव हि॥ तावद्भवेद्ब्रह्मचारी जपेन्मौनव्रती द्विजः॥ २॥ यवभोजी भूमिशायी पत्रभुग्जितमानसः॥ कामं क्रोधं तथा लोभं मोहं द्वेषं विसृज्य सः॥ ३॥ भक्त्या परमया राजन् वर्तमानस्तु देशिकः॥ ब्राह्मे मुहूर्त उत्थाय ध्यात्वा देवीं कलिंदजाम्॥ ४॥ अरुणोदयवेलायां नद्यां स्नानं समाचरेत्॥ मध्यह्ने चापि संध्यायां संध्यावन्दनतत्परः॥ ५॥ समाप्ते नियमे राजन् कालिंदीतीरमास्थितः॥ दशलक्षं ब्राह्मणानां सपुत्राणां महात्मनाम्॥ ६॥ पूजयित्वा गंधपुष्पैर्दत्त्वा तेभ्यः सुभोजनम्॥ वस्त्रभूषणसौवर्णपात्राणि प्रस्फुरंति च॥ ७॥ दक्षिणाश्च शुभा दद्यात्ततः सिद्धिर्भवेत्खलु॥ कुरु त्वं नियमं सर्वं किं भूयः श्रोतुमिच्छति॥ ८॥ इत्येकादशाक्षरयमुनामंत्रपटलं समाप्तम्॥ अथ यमुनाकवचप्रारंभः॥ मान्धातोवाच॥ यमुनायाः कृष्णराज्ञाः कवचं सर्वतोऽमलम्॥ देहि मह्यं महाभाग धारयिष्याम्यहं सदा॥ १॥ सौभरिरुवाच॥ यमुनायाश्च कवचं सर्वरक्षाकरं नृणाम्॥ चतुष्पदार्थदं साक्षाच्छृणु राजन्महामते॥ २॥ कृष्णां चतुर्भुजां श्यामां पुण्डरीकदलेक्षणाम्॥ रथस्थां सुन्दरीं ध्यात्वा धारयेत्कवचं ततः॥ ३॥ स्नातः पूर्वमुखो मौनी कृतसंध्यः कुशासने॥ कुशैर्बद्धशिखो विप्रः

पठेद्व स्वस्तिकासनः ॥ ४ ॥ यमना मे शिरः पातु कृष्णा नेत्रद्वयं सदा ॥ श्यामा भ्रूभंगदेशं च नासिकां नाकवासिनी ॥ ५ ॥
कपोलौ पातु मे साक्षात्परमानन्दरूपिणी ॥ कृष्णवामांससंभूता पातु कर्णद्वयं मम ॥ ६ ॥ अधरौ पातु कालिन्दी चिबुकं सूर्यकन्यका ॥
यमस्वसा कंधरां च हृदयं मे महानदी ॥ ७ ॥ कृष्णप्रिया पातु पृष्ठं तटिनी मे भुजद्वयम् ॥ श्रोणीतटं च सुश्रोणी कटिं मे
चारुदर्शना ॥ ८ ॥ ऊरुद्वयं तु रंभोरूर्जानुनी अधिमेदिनी ॥ गुल्फौ रासेश्वरी पातु पादौ पापापहारिणी ॥ ९ ॥ अंतर्बहिरधश्चोर्ध्वं
दिशासु विदिशासु च ॥ समंतात्पातु जगतः परिपूर्णतमप्रिया ॥ १० ॥ इदं श्रीयमुनायाश्च कवचं परमाद्भुतम् ॥ दशवारं पठेद्भक्त्या
निर्धनो धनवान् भवेत् ॥ ११ ॥ त्रिभिर्मासैः पठेद्धीमान् ब्रह्मचारी मिताशनः ॥ सर्वराज्याधिपत्यं च प्राप्नोति नात्र संशयः ॥ १२ ॥
दशोत्तरशतं नित्यं त्रिमासावधि भक्तितः ॥ यः पठेत्प्रयतो भूत्वा तस्य किं किं न जायते ॥ १३ ॥ यः पठेत्प्रातरुत्थाय सर्वतीर्थफलं
लभेत् ॥ अंते व्रजेत्परं धाम गोलोकं योगिदुर्लभम् ॥ १४ ॥ इति श्रीमद्गर्गाचार्यसंहितायां श्रीमाधुर्यखण्डे श्रीसौभरिमान्धातृसंवादे
श्रीयमुनाकवचं समाप्तम् ॥ अथ यमुनास्तवप्रारंभः ॥ मान्धातोवाच ॥ यमुनायाः स्तवं दिव्यं सर्वसिद्धिकरं परम् ॥ सौभरे मुनि
शार्दूल वद मां कृपयात्वरन् ॥ १ ॥ श्रीसौभरिरुवाच ॥ मार्तण्डकन्यकायास्तु स्तवं शृणु महामते ॥ सर्वसिद्धिकरं भूमौ चातुर्वर्ग्यफल
प्रदम् ॥ २ ॥ ॐ कृष्णवामांसभूतायै कृष्णायै सततं नमः ॥ नमः श्रीकृष्णरूपिण्यै कृष्णे तुभ्यं नमो नमः ॥ ३ ॥ यः पापपंकांबु
कलंककुत्सितः कामी कुधीः सत्सु कलिं करोति हि ॥ वृन्दावनं धाम ददाति तस्मै नदन्मिलिन्दारिकलिन्दनन्दिनी ॥ ४ ॥
कृष्णे साक्षात्कृष्णरूपा त्वमेव वेगावर्ते वर्तते मत्स्यरूपी ॥ ऊर्मावूर्मौ कूर्मरूपी सदा ते बिंदौबिंदौ भाति गोविंददेवः ॥ ५ ॥
वन्दे लीलावतीं त्वां सघनघननिभां कृष्णवामांसभूतां वेगं वै वैरजाख्यं सकलजलचयं खण्डयंतीं बलात्स्वात् ॥ छित्त्वा ब्रह्माण्ड
मारात्सुरनगरनगान् गंडशैलादिदुर्गान् भित्त्वा भूखण्डमध्ये तटिनि वृतवतीमूर्मिमालां प्रयांतीम् ॥ ६ ॥ दिव्यं को नामधेयं
श्रुतमथ यमुने दंडयत्यद्रितुल्यं पापव्यूहं त्वखंडं वसतु मम गिरां मंडलेऽनुक्षणं तत् ॥ दंडयांश्चाकार्यदण्डयान्सकृदपि वचसा

खंडितं यद्गृहीतं भ्रातुर्मार्तण्डसूनोररतिपरिदृढस्ते प्रचण्डोऽतिदंडः ॥ ७ ॥ रज्जुर्वा विषयांधकूपतरणे पापाखुवर्कीकरीवेण्यु
ष्णिक् च विराजमूर्तिशिरसो मालास्ति वा सुन्दरी ॥ धन्यं भाग्यमतःपरं भुवि नृणां यात्रादिकृद्दुर्लभा गोलोकेऽतिदुर्लभाति
सुभगा भात्यद्वितीया नदी ॥ ८ ॥ गोपीगोकुलगोपकेलिकलिते कालिन्दि कृष्णप्रभे त्वत्कूले जललोलगोलविचलत्कल्लोलकोला
हलः ॥ त्वत्कांतारकुतूहलालिकुलकृज्झंकारकेकाकुलः कूजत्कोकिलसंकुलो व्रजलतालंकारभृत्पातु माम् ॥ ९ ॥ भवंति जिह्वास्तनु
रोमतुल्या गिरो यदा भूसिकता इव स्युः ॥ तदप्यलं यांति न ते गुणांतं संतो महांतः किल शेषतुल्याः ॥ १० ॥ कलिन्दगिरिनन्दिनी
स्तवं उषस्ययं वा परः श्रुतंच यदि पाठितो भुवि तनोति सन्मंगलम् ॥ जनोऽपि यदि धारयेत्किल पठेच्च यो नित्यशः स याति परमं पदं
निजनिकुञ्जलीलावृतम् ॥ ११ ॥ इति श्रीमद्गर्गाचार्य्यसंहितायां श्रीमाधुर्यखण्डे श्रीसौभरिमान्धातृसंवादे श्रीयमुनास्तवराजः समाप्तः ॥
॥ अथ यमुनासहस्रनामस्तोत्रप्रारंभः ॥ मान्धातोवाच ॥ नाम्नां सहस्रं कृष्णायाः सर्वसिद्धिकरं परम् ॥ वद मां मुनिशार्दूल त्वं सर्वज्ञो
निरामयः ॥ १ ॥ सौभरिरुवाच ॥ नाम्नां सहस्रं कालिन्द्या मान्धातस्ते वदाम्यहम् ॥ सर्वसिद्धिकरं दिव्यं श्रीकृष्णवशकारकम् ॥ २ ॥ ॐ
अस्य श्रीकालिन्दीसहस्रनामस्तोत्रमंत्रस्य सौभरिर्ऋषिः । श्रीयमुना देवता । अनुष्टप्छंदः । मायाबीजमिति कीलकम् । रमाबीजमिति शक्तिः ।
श्रीकलिन्दनन्दिनीप्रसादसिद्ध्यर्थे पाठे विनियोगः ॥ अथ ध्यानम्—ॐ श्यामामंभोजनेत्रां सघनघनरुचिं रत्नमंजीरकूजत्कांचीकेयूर
युक्तां कनकमणिमये बिभ्रतीं कुण्डले द्वे ॥ भ्राजच्छ्रीनीलवस्त्रां स्फुरदमलचलद्धारभारां मनोज्ञां ध्यायेन्मार्तण्डपुत्रीं तनुकिरणचयोद्दीप्त
दीपाभिरामाम् ॥३॥ ॐ कालिन्दी यमुना कृष्णा कृष्णरूपा सनातनी ॥ कृष्णवामांससंभूता परमानन्दरूपिणी ॥ ४ ॥ गोलोकवासिनी श्यामा
वृन्दावनविनोदिनी ॥ राधासखी रासलीला रासमण्डलमण्डिता ॥ ५ ॥ निकुंजमाधवी वल्ली रङ्गवल्लीमनोहरा ॥ श्रीरासमण्डली भूता
यूथीभूता हरिप्रिया ॥ ६ ॥ गोलोकतटिनी दिव्या निकुंजतलवासिनी ॥ दीर्घोर्मिवेगगंभीरा पुष्पपल्लववासिनी ॥ ७ ॥ घनश्यामा
मेघमाला बलाका पद्ममालिनी ॥ परिपूर्णतमा पूर्णा पूर्णब्रह्मप्रिया परा ॥ ८ ॥ महावेगवती साक्षान्निकुंजद्वारनिर्गता ॥ महानदी

मन्दगतिर्विरजा वेगभेदिनी ॥ ९ ॥ अनेकब्रह्माण्डगता ब्रह्मद्रवसमाकुला ॥ गङ्गा मिश्रा निर्मलाभा निर्जला सरितां वरा ॥ १० ॥
रत्नबद्धोभयतटा हंसपद्मादिसंकुला ॥ नदी निर्मलपानीया सर्वब्रह्माण्डपावनी ॥ ११ ॥ वैकुण्ठपरिखीभूता परिखा पापहारिणी ॥
ब्रह्मलोकागता ब्राह्मी स्वर्गा स्वर्गनिवासिनी ॥ १२ ॥ उल्लसंती प्रोत्पतंती मेरुमालामहोज्ज्वला ॥ श्रीगंगांभःशिखरिणी
गण्डशैलविभेदिनी ॥ १३ ॥ देशान्पुनंती गच्छंती महती भूमिमध्यगा ॥ मार्तण्डतनुजा पुण्या कलिन्दगिरिनन्दिनी ॥ १४ ॥ यमस्वसा
मन्दहासा सुद्विजा रचिताम्बरा॥ नीलाम्बरा पद्ममुखी चरंती चारुदर्शना ॥ १५ ॥ रम्भोरूः पद्मनयना माधवी प्रमदोत्तमा ॥ तपश्चरंती
सुश्रोणी कूजन्नूपुरमेखला॥१६॥ जलस्थिता श्यामलांगी खाण्डवाभा विहारिणी॥गाण्डीविभाषिणी वन्या श्रीकृष्णाम्बरमिच्छती ॥१७॥
द्वारकागमना राज्ञी पट्टराज्ञी परंगता ॥ महाराज्ञी रत्नभूषा गोमतीतीरचारिणी ॥ १८ ॥ स्वकीया स्वसुखा स्वार्था स्वीयकार्यार्थ
साधिनी ॥ नवलांगाऽबला मुग्धा वरांगा वामलोचना ॥ १९ ॥ अज्ञातयौवनाऽदीना प्रभा कांतिर्द्युतिश्छविः ॥ सोमाभा परमा कीर्तिः
कुशला ज्ञातयौवना ॥ २० ॥ नवोढा मध्यगा मध्या प्रौढिः प्रौढा प्रगल्भका ॥ धीराऽधीरा धैर्यधरा ज्येष्ठा श्रेष्ठा कुलांगना
॥ २१ ॥ क्षणप्रभा चंचलार्चा विद्युत्सौदामिनी तडित् ॥ स्वाधीनपतिका लक्ष्मीः पुष्टा स्वाधीनभर्तृका ॥ २२॥ कलहांतरिता भीरुरिच्छा
प्रोत्कंठिताकुला ॥ कशिपुस्था दिव्यशय्या गोविन्दहृतमानसा ॥ २३ ॥ खण्डिताखण्डशोभाढ्या विप्रलब्धाभिसारिका ॥ विरहार्ता
विरहिणी नारी प्रोषितभर्तृका ॥ २४ ॥ मानिनी मानदा प्राज्ञा मन्दारवनवासिनी ॥ झङ्कारिणी झणत्कारी रणन्मंजीरनूपुरा ॥ २५ ॥
मेखला मेखलाकांची श्रीकांची कांचनामयी ॥ कंचुकी कंचुकमणिः श्रीकंठाढ्या महामणिः ॥ २६ ॥ श्रीहारिणी पद्महरा मुक्ता मुक्ता
फलार्चिता ॥ रत्नकंकणकेयूरा स्फुरदंगुलिभूषणा ॥ २७ ॥ दर्पणा दर्पणीभूता दुष्टदर्पविनाशिनी ॥ कंबुग्रीवा कंबुधरा ग्रैवेयकाविरा
जिता ॥ २८ ॥ ताटंकिनी दंतधरा हेमकुण्डलमण्डिता ॥ शिखाभूषा भालपुष्पा नासामौक्तिकशोभिता ॥ २९ ॥ मणिभूमिगता
देवी रैवताद्रिविहारिणी ॥ वृन्दावनगता वृन्दा वृन्दारण्यनिवासिनी ॥ ३० ॥ वृन्दावनलता माध्वी वृन्दारण्यविभूषणा ॥ सौन्दर्य

लहरी लक्ष्मीर्मधुरातीर्थवासिनी ॥ ३१ ॥ विश्रांतवासिनी काम्या रम्या गोकुलवासिनी ॥ रमणस्थलशोभाढ्या महावनमहानदी
॥ ३२ ॥ प्रणता प्रोन्नता पुष्टा भारती भारतार्चिता ॥ तीर्थराजगतिर्गोत्रा गंगासागरसंगमा ॥ ३३ ॥ सप्ताब्धिभेदिनी लोला सप्तद्वीप
गता बलात् ॥ लुठंती शैलभिद्यंती स्फुरंती वेगवत्तरा ॥ ३४ ॥ कांचनी कांचनीभूमिः कांचनीभूमिभाविता ॥ लोकदृष्टिर्लोकलीला
लोकालोकाचलार्चिता ॥ ३५ ॥ शैलोद्गता स्वर्गगता स्वर्गार्च्या स्वर्गपूजिता ॥ वृन्दावनवनाध्यक्षा रक्षा कक्षा तटी पटी ॥ ३६ ॥
असिकुण्डगता कच्छा स्वच्छन्दोच्छलिताद्रिजा ॥ कुहरस्था रयप्रस्था प्रस्था शांतेतरातुरा ॥ ३७ ॥ अंबुच्छटासीकराभा दर्दुरा
दर्दुरीधरा ॥ पापांकुशा पापसिंही पापद्रुमकुठारिणी ॥ ३८ ॥ पुण्यसंधा पुण्यकीर्तिः पुण्यदा पुण्यवर्द्धिनी ॥ मधोर्वननदीमुख्या तुला
तालवनस्थिता ॥ ३९ ॥ कुमुद्वननदी कुब्जा कुमुदांभोजवर्द्धिनी ॥ प्लवरूपा वेगवती सिंहसर्वादिवाहिनी ॥ ४० ॥ बहुली बहुदा बह्वी
बहुला वनवन्दिता ॥ राधा कुण्डकुलाराध्या कृष्णा कुण्डजलाश्रिता ॥ ४१ ॥ ललिता कुण्डगा घंटा विशाखा कुण्डमण्डिता ॥
गोविन्दकुण्डानिलया गोपकुंडतरंगिणी ॥ ४२ ॥ श्रीगंगा मानसी गंगा कुसुमांबरभाविनी ॥ गोवर्धिनी गोधनाढ्या मयूरी वरवर्णिनी
॥ ४३ ॥ सारसी नीलकंठाभा कूजत्कोकिलपोतकी ॥ गिरिराजप्रभूर्भूरिरातपत्रातपत्रिणी ॥ ४४ ॥ गोवर्द्धनांका गोदंती दिव्यौषधि
निधिः श्रुतिः ॥ पारदी पारदमयी नारदी शारदी भृतिः ॥ ४५ ॥ श्रीकृष्णचरणांकस्था कामा कामवनांचिता ॥ कामाटवी
नन्दिनी च नन्दग्राममहीधरा ॥ ४६ ॥ बृहत्सानुद्युतिः प्रोता नन्दीश्वरसमन्विता ॥ काकली कोकिलमयी भांडारकुशकौशला ॥
॥ ४७ ॥ लोहार्गलप्रदाकारा काश्मीरवसनावृता ॥ बार्हिषदी शोणपुरी शूरक्षेत्रपुराधिका ॥ ४८ ॥ नानाभरणशोभाढ्या नानावर्ण
समन्विता ॥ नानानारीकदम्बाढ्या नानावस्त्रविराजिता ॥ ४९ ॥ नानालोकगता वीचिर्नानाजलसमन्विता ॥ स्त्रीरत्नं रत्नानिलया
ललनारत्नरंजिनी ॥ ५० ॥ रंगिणी रंगभूमाढ्या रंगा रंगमहीरुहा ॥ राजविद्या राजगुह्या जगत्कीर्तिर्घनापहा ॥ ५१ ॥ बिलोल
घंटाकृष्णांगी कृष्णदेहसमुद्भवा ॥ नीलपंकजवर्णाभा नीलपंकजहारिणी ॥ ५२ ॥ नीलाभानीलपद्माढ्या नीलांभोरुहवासिनी ॥

नागवल्ली नागपुरी नागवल्लीदलार्चिता ॥ ५३ ॥ ताम्बूलचर्चिता चर्चा मकरन्दमनोहरा ॥ सकेसरा केसरिणी केशपाशाभिशोभिता ॥ ५४ ॥ कज्जलाभा कज्जलाक्ता कज्जलीकलितांजना ॥ अलक्तचरणा ताम्रा लालाताम्रकृतांबरा ॥ ५५ ॥ सिन्दूरिता लिप्तवाणी सुश्रीः श्रीखण्डमंडिता ॥ पाटीरपंकवसना जटामांसीरुचाम्बरा ॥ ५६ ॥ आगर्य्यगुरुगंधाक्ता तगराश्रितमारुता ॥ सुगंधितैलरुचिरा कुंतलालिः सुकुंतला ॥ ५७ ॥ शकुंतलाऽपांसुला च पातिव्रत्यपरायणा ॥ सूर्यकोटिप्रभा सर्यकन्या सूर्यसमुद्भवा ॥ ५८ ॥ कोटिसूर्यप्रतीकाशा सूर्यजा सूर्यनन्दिनी ॥ संज्ञा संज्ञासुता स्वेच्छा संज्ञामोदप्रदायिनी ॥ ५९ ॥ संज्ञापुत्री स्फुरच्छाया तपंती तापकारिणी ॥ सावर्ण्यानुभवा वेदी वडवा सौख्यदायिनी ॥ ६० ॥ शनैश्चरानुजा कीला चन्द्रवंशविवर्धिनी । चन्द्रवंशवधूश्चन्द्रा चन्द्रावलिसहायिनी ॥ ६१ ॥ चन्द्रावती चन्द्रलेखा चन्द्रकांतानुगांशुका ॥ भैरवी पिंगलाशंकी लीला वत्यागरीमयी ॥ ६२ ॥ धनश्रीदेवगांधारी स्वर्मणिर्गुणवर्द्धिनी ॥ व्रजमल्लार्यंधकरी विचित्रा जयकारिणी ॥ ६३ ॥ गांधारी मंजरी टोडी गुर्ज्जर्य्यासावरी जया ॥ कर्णाटी रागिणी गौडी वैराटी गारवाटिका ॥ ६४ ॥ चतुश्चन्द्रकला हेरी तैलंगी विजयावती ॥ ताली तालस्वरा गानक्रिया मात्राप्रकाशिनी ॥ ६५ ॥ वैशाखी चंचला चारुर्माचारी धुंघटी घटा ॥ वैरागरी सोरठी सा कैदारी जलधारिका ॥ ६६ ॥ कामाकरश्रीकल्याणी गौडकल्याणमिश्रिता ॥ रामसंजीवनी हेला मन्दारी कामरूपिणी ॥ ६७ ॥ सारंगी मारुती होढा सागरी कामवादिनी ॥ वैभासी मंगला चान्द्री रासमंडलमंडना ॥ ६८ ॥ कामधेनुः कामलता कामदा कमनीयका ॥ कल्पवृक्षस्थली स्थूला क्षुधा सौधनिवासिनी ॥ ६९ ॥ गोलोकवासिनी सुभ्रूर्यष्टिभृद्द्वारपालिका ॥ शृंगारप्रकरा शृंगा स्वच्छाक्षय्योपकारिका ॥ ७० ॥ पार्षदा सुमुखी सेव्या श्रीवृन्दावनपालिका ॥ निकुंजभृत्कुंजपुंजा गुंजाभरणभूषिता ॥ ७१ ॥ निकुंजवासिनी प्रेष्या गोवर्द्धनतटीभवा ॥ विशाखा ललितारामा नीरुजा मधुमाधवी ॥ ७२ ॥ एकानेकसखी शुक्ला सखीमध्या महामनाः ॥ श्रुतिरूपा ऋषिरूपा मैथिलाः कौशलाः स्त्रियः ॥ ७३ ॥ अयोध्यापुरवासिन्यो यज्ञसीताः पुलिंदकाः ॥ रमा वैकुण्ठवासिन्यः श्वेतद्वीप

सखीजनाः ॥ ७४ ॥ उर्ध्ववैकुण्ठवासिन्यो दिव्याजितपदाश्रिताः ॥ श्रीलोकाचलवासिन्यः श्रीसख्यः सागरोद्भवाः ॥ ७५ ॥ दिव्या अदिव्या दिव्यांगा व्यासास्त्रिगुणवृत्तयः ॥ भूमिगोप्यो देवनार्य्यो लता ओषधिवीरुधः ॥ ७६ ॥ जालंधर्य्यः सिंधुसुताः पृथुवर्हिष्मतीभवाः ॥ दिव्यांबरा अप्सरसः सौतला नागकन्यकाः ॥ ७७ ॥ परं धाम परं ब्रह्म पौरुषा प्रकृतिः परा ॥ तटस्था गुणभूर्गीता गुणागुणमयी गुणा ॥ ७८ ॥ चिद्घना सदसन्माला दृष्टिर्दृश्या गुणाकरा ॥ महत्तत्त्वमहंकारो मनो बुद्धिः प्रचेतना ॥ ७९ ॥ चेतोवृत्तिः स्वांतरात्मा चतुर्द्धा चतुरक्षरा ॥ चतुर्व्यूहश्चतुर्मूर्तिर्व्योमवायुरदो जलम् ॥ ८० ॥ मही शब्दो रसो गंधः स्पर्शो रूपमनेकधा ॥ कर्मेन्द्रियं कर्ममयी ज्ञानं ज्ञानेन्द्रियं द्विधा ॥ ८१ ॥ त्रिधाधिभूतमध्यात्ममधिदैवमधिस्थितम् ॥ ज्ञानशक्तिः क्रियाशक्तिः सर्वदेवाधिदेवता ॥ ८२ ॥ तत्त्वसंघा विराण्मूर्तिर्धारणा धारणामयी ॥ श्रुतिः स्मृतिर्वेदमूर्तिः संहिता गर्गसंहिता ॥ ८३ ॥ पाराशरी सैव सृष्टिः पारहंसी विधातृका ॥ याज्ञवल्की भागवती श्रीमद्भागवतार्चिता ॥ ८४ ॥ रामायणमयी रम्या पुराणपुरुषप्रिया ॥ पुराणमूर्तिः पुण्यांगी शास्त्रमूर्तिर्महोन्नता ॥ ८५ ॥ मनीषा धिषणा बुद्धिर्वाणी धीः शेमुषी मतिः ॥ गायत्री वेदसावित्री ब्रह्माणी ब्रह्मलक्षणा ॥ ८६ ॥ दुर्गापर्णा सती सत्या पार्वती चंडिकांबिका ॥ आर्या दाक्षायणी दाक्षी दक्षयज्ञविघातिनी ॥ ८७ ॥ पुलोमजा शचीन्द्राणी वेदी देववरार्पिता ॥ वायुना धारिणी धन्या वायवी वायुवेगगा ॥ ८८ ॥ यमानुजा संयमनी संज्ञाच्छाया स्फुरद्द्युतिः ॥ रत्नदेवी रत्नवृन्दा तारा तरणिमण्डला ॥८९॥ रुचिः शांतिः क्षमा शोभा दया दक्षा द्युतिस्त्रपा ॥ तलतुष्टिर्विभा पुष्टिः संतुष्टिः पुष्टभावना ॥ ९० ॥ चतुर्भुजा चारुनेत्रा द्विभुजाष्टभुजा बला ॥ शंखहस्ता पद्महस्ता चक्रहस्ता गदाधरा ॥ ९१ ॥ निषंगधारिणी चर्मखड्गपाणिर्धनुर्धरा ॥ धनुष्टंकारिणी योद्ध्री दैत्योद्भटविनाशिनी ॥ ९२ ॥ रथस्था गरुडारूढा श्रीकृष्णहृदयस्थिता ॥ वंशीधरा कृष्णवेषा स्रग्विणी वनमालिनी ॥ ९३ ॥ किरीटधारिणी याना मन्दा मन्दगतिर्गतिः ॥ चन्द्रकोटिप्रतीकाशा तन्वी कोमलविग्रहा ॥ ९४ ॥ भैष्मी भीष्मसुता भीमा रुक्मिणी रुक्मरूपिणी ॥ सत्यभामा जांबवती सत्या भद्रा सुदक्षिणा ॥ ९५ ॥ मित्रवृन्दा सखीवृन्दा वृन्दारण्यध्वजोर्ध्वगा ॥ श्रृंगारका

रिणी श्रृंगा श्रृंगभूः श्रृंगदाशुगा ॥ ९६ ॥ तितिक्षेक्षा स्मृतिः स्पर्धा स्पृहा श्रद्धा स्वनिर्वृतिः ॥ इशा तृष्णाभिधा प्रीतिर्हिता याच्ञा क्षमा कृषिः ॥ ९७ ॥ आशा निद्रा योगनिद्रा योगिनी योगदायुगा ॥ निष्ठा प्रतिष्ठा समितिः सत्त्वप्रकृतिरुत्तमा ॥ ९८ ॥ तमःप्रकृतिर्दुर्मर्षा रजःप्रकृतिरानतिः ॥ क्रियाऽक्रियाकृतिग्लानिः सात्त्विक्याध्यात्मिकी वृषा ॥ ९९ ॥ सेवा शिखामणिर्वृद्धि राहूतिः सुमतिर्द्युभूः ॥ राज्जुर्द्दिदाम्नी षड्वर्गा संहिता सौख्यदायिनी ॥ १०० ॥ मुक्तिः प्रोक्तिर्देशभाषा प्रकृतिः पिंगलोद्भवा ॥ नागभाषा नागभूषा नागरी नगरी नगा ॥ १ ॥ नौर्नौका भवनौर्भाव्या भवसागरसेतुका ॥ मनोमयी दारुमयी सैकती सिकतामयी ॥ २ ॥ लेख्या लेप्या मणिमयी प्रतिमा हेमनिर्मिता ॥ शैली शैलभवा शीला शीकारामा चलाचला ॥ ३ ॥ अस्थिता स्वस्थिता तूली वैदिकी तांत्रिकी विधिः ॥ संध्या संध्याभ्रवसना वेदसंधिः सुधामयी ॥ ४ ॥ सायंतनी शिखावेध्या सूक्ष्मा जीवकला कृतिः ॥ आत्मभूता भाविताऽणी प्रह्वा कमलकर्णिका ॥ ५ ॥ नीराजनी महाविद्या कंदली कार्यसाधिनी ॥ पूजा प्रतिष्ठा विपुला पुनंती पारलौकिकी ॥ ६ ॥ शुक्लशुक्तिर्मौक्तिका च प्रतीतिः परमेश्वरी ॥ विराजोष्णिग् विराड् वेणी वेणुका वेणुनादिनी ॥ ७ ॥ आवर्तिनी वार्तिकदा वार्त्ता वृत्तिर्विमानगा ॥ सासाढ्यरासिनी रासी रासमण्डलमंडली ॥ ८ ॥ गोपगोपीश्वरी गोपी गोपीगोपालवंदिता ॥ गोचारिणी गोपनदी गोपानन्दप्रदायिनी ॥ ९ ॥ पशव्यदा गोपसेव्या कोटिशो गोगणावृता ॥ गोपानुगा गोपवती गोविंदपदपादुका ॥ ११० ॥ वृषभानुसुता राधा श्रीकृष्णवशकारिणी ॥ कृष्णप्राणाधिका शश्वद्रसिका रसिकेश्वरी ॥ ११ ॥ अवटोदा ताम्रपर्णी कृतमाला विहायसी ॥ कृष्णा वेणी भीमरथी तापी रेवा महापगा ॥ १२ ॥ वैयासकी च कावेरी तुंगभद्रा सरस्वती ॥ चन्द्रभागा वेत्रवती गोविंदपदपादुका ॥ १३ ॥ गोमती कौशिकी सिंधुर्वाणगंगातिसिद्धिदा ॥ गोदावरी रत्नमाला गंगा मंदाकिनी बला ॥ १४ ॥ स्वर्णदी जाह्नवी वेला वैष्णवी मंगलालया ॥ बाला विष्णुप्रदीपोक्ता सिंधुसागरसंगता ॥ १५ ॥ गंगासागरशोभाढ्या सामुद्री रत्नदा धुनी ॥ भागीरथी स्वर्धुनी भूः श्रीवामनपदच्युता ॥ १६ ॥ लक्ष्मी रमा रामणीया भार्गवी विष्णुवल्लभा ॥

सीतार्चिर्जानकी माता कलंकरहिता कला ॥ १ ॥ कृष्णपादाब्जसंभूता सर्वा त्रिपथगामिनी ॥ धरा विश्वंभराऽनंता
भूमिर्धात्री क्षमामयी ॥ १८ ॥ स्थिरा धारित्री धरणिरुर्वी शेषफणास्थिता ॥ अयोध्या राघवपुरी कौशिकी रघुवंशजा ॥ १९ ॥
मथुरा माथुरी पंथा यादवी ध्रुवपूजिता ॥ माया पूर्बिल्वनीला द्वार्गंगाद्वारविनिर्गता ॥ १२० ॥ कुशावर्तमयी ध्रौव्या ध्रुवमण्डलमध्यगा ॥
॥ काशी शिवपुरी शेषा विंध्या वाराणसी शिवा ॥ २१ ॥ अवंतिका देवपुरी प्रोज्ज्वलोज्जयिनी जिता ॥ द्वारावती द्वारकामा
कुशभूता कुशस्थली ॥ २२ ॥ महापुरी सप्तपुरी नन्दिग्रामस्थलास्थिता ॥ शाल्वग्रामशिलादित्या शंभलग्राममध्यगा ॥ २३ ॥
वंशगोपालिनी क्षिप्रा हरिमन्दिरवर्त्तिनी ॥ बर्हिष्मती हस्तिपुरी शक्रप्रस्थनिवासिनी ॥ २४ ॥ दाडिमी सैंधवी जंबुः पौष्करी पुष्कर
प्रसूः ॥ उत्पलावर्तगमना नैमिषी नैमिषावृता ॥ २५ ॥ कुरुजांगलभूः काली हैमवत्यर्बुदी बुधा ॥ शूकरक्षेत्रविदिता श्वेतवाराह
धारिता ॥ २६ ॥ सर्वतीर्थमयी तीर्था तीर्थानां कीर्तिकारिणी ॥ हारिणी सर्वदोषाणां दायिनी सर्वसम्पदाम् ॥ २७ ॥ वर्द्धिनी
तेजसां साक्षाद्गर्भवासनिकृंतनी ॥ गोलोकधामधनिनी निकुंजनिजमंजरी ॥ २८ ॥ सर्वोत्तमा सर्वपुण्या सर्वसौंदर्यशृंखला ॥ सर्वतीर्थो
परिगता सर्वतीर्थाधिदेवता ॥ २९ ॥ नाम्नां सहस्रं कालिन्द्याः कीर्तिदं कामदं परम् ॥ महापापहरं पुण्यमायुर्वर्द्धनमुत्तमम् ॥ १३० ॥
एकवारं पठेद्रात्रौ चोरेभ्यो न भयं भवेत् ॥ द्विवारं प्रपठेन्मार्गे दस्युभ्यो न भयं क्वचित् ॥ ३१ ॥ द्वितीयां तु समारभ्य पठेत्पूर्णावधि
द्विजः ॥ दशवारमिदं भक्त्या ध्यात्वा देवीं कलिन्दजाम् ॥ ३२ ॥ रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात् ॥ गुर्विणी जनयेत्पुत्रं
विद्यार्थी पंडितो भवेत् ॥ ३३ ॥ मोहनं स्तंभनं शश्वद्वशीकरणमेव च॥ उच्चाटनं घातनं च शोषणं दीपनं तथा ॥ ३४ ॥ उन्मादनं तापनं
च निधिदर्शनमेव च ॥ यद्यद्वांछति चित्तेन तत्तत्प्राप्नोति मानवः ॥ ३५ ॥ ब्राह्मणो ब्रह्मवर्चस्वी राजन्यो जगती पतिः ॥ वैश्यो निधिपति
र्भूयाच्छूद्रः श्रुत्वा तु निर्मलः ॥ ३६ ॥ पूजाकाले तु यो नित्यं पठते भक्तिभावतः ॥ लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥ ३७ ॥
शतवारं पठेन्नित्यं वर्षावधिमतः परम् ॥ पटलं पद्धतिं कृत्वा स्तवं च कवचं तथा ॥ ३८ ॥ सप्तद्वीपमहीराज्यं प्राप्नुयान्नात्र संशयः ॥ निष्का

रणं पठेद्यस्तु यमुनाभक्तिसंयुतः ॥ ३९ ॥ त्रैवर्ग्यमेत्य सुकृती जीवन्मुक्तो भवेदिह ॥१४०॥ निकुंजलीलाललितं मनोहरं कलिन्दजाकूल लताकदम्बकम् ॥ वृन्दावनोन्मत्तमिलिन्दशब्दितं व्रजेत्स गोलोकमिदं पठेच्च यः ॥१४१॥ इति श्रीमद्गर्गाचार्य्यसंहितायां श्रीमाधुर्य्यखण्डे श्रीसौभरिमान्धातृसंवादे श्रीयमुनासहस्रनामस्तोत्रं समाप्तम् ॥ इति श्रीमंत्रमहार्णवे मध्यखण्डे यमुनातंत्रे पञ्चदशस्तरंगः ॥ १५ ॥

॥ अथासुरीमहाकल्पप्रयोगः ॥ मंत्रमहोदधौ–वक्ष्याम्यथर्ववेदोक्तमासुरीविधिमुत्तमम् ॥ तारादिरासुरीमंत्रो दशोत्तरशताक्षरः ॥ १ ॥ मंत्रो यथा–ॐ कटुके कटुकपत्रे सुभगे आसुरि रक्ते रक्तवाससे अथर्वणस्य दुहिते अघोरे अघोरकर्मकारिके अमुकस्य गतिं दह दह उपविष्टस्य गुदं दह दह सुप्तस्य मनो दह दह प्रबुद्धस्य हृदयं दह दह हन हन पच पच तावद्दह तावत्पच यावन्मे वशमायाति हुँफट्स्वाहा॥ इति दशोत्तरशताक्षरो मंत्रः। अस्य विधानम्–अस्य आसुरीमंत्रस्य अंगिरा ऋषिः। विराट् छंदः। आसुरी देवता। ॐबीजम्। स्वाहा शक्तिः। हुं कीलकम्। ममाभीष्टसिद्ध्यर्थे जपे विनियोगः॥ ॐ अंगिरऋषये नमः शिरसि १। विराट्छंदसे नमो मुखे २। आसुरीदेवतायै नमो हृदि ३। ॐ बीजाय नमो लिंगे ४। स्वाहाशक्तये नमः पादयोः ५। हुं कीलकाय नमो नाभौ ६। विनियोगाय नमः सर्वांगे ॥ इति ऋष्यादिन्यासः ॥ ॐ कटुके कटुकपत्रे हुँफट्स्वाहा अंगुष्ठाभ्यां नमः १। सुभगे आसुरि हुंफट्स्वाहा तर्जनीभ्यां नमः २। रक्ते रक्तवाससे हुंफट्स्वाहा मध्यमाभ्यां नमः ३। अथर्वणस्य दुहिते हुंफट्स्वाहा अनामिकाभ्यां नमः ४। अघोरे अघोरकर्मकारिके हुंफट् स्वाहा कनिष्ठिकाभ्यां नमः ५। अमकस्य गतिं दह २ उपविष्टस्य गुदं दह २ सुप्तस्य मनो दह २ प्रबुद्धस्य हृदयं दह २ हन २ पच २ तावद्दह तावत्पच यावन्मे वशमायाति हुंफट्स्वाहा करतलकरपृष्ठाभ्यां नमः ६॥ इति करन्यासः ॥ ॐ कटुके कटुकपत्रे हुँफट्स्वाहा हृदयाय नमः १। सुभगे आसुरि हुँफट्स्वाहा शिरसे स्वाहा २। रक्ते रक्तवाससे हुंफट्स्वाहा शिखायै वषट् ३। अथर्वणस्य दुहिते हुँफट्स्वाहा कवचाय हुं ४। अघोरे अघोरकर्मकारिके हुँफट्स्वाहा नेत्रत्रयाय वौषट् ५। अमुकस्य गतिं दह २ उपविष्टस्य गदं दह २ सुप्तस्य मनो दह २ प्रबुद्धस्य हृदयं दह २ हन २ पच २ तावद्दह तावत्पच यावन्मे वशमायाति हुँफट्स्वाहा

अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ इति न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम्–ॐ शरच्चंद्रकांतिर्वराभीतिशूलं सृणिं हस्तपद्मै र्दधानांबुजस्था ॥ विभूषांबराढ्याहियज्ञोपवीता मुदेऽथर्वपुत्री करोत्वासुरी नः ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणमयुतजपः । घृताक्तराजिकया दशांशतो होमः । एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथाच–अयुतं प्रजपेन्मंत्रं जुहुयात्तद्दशांशतः ॥ घृताक्तराजिकां वह्नौ ततः सिद्धो भवेन्मनुः ॥ सिद्धे मंत्रे प्रकुर्वीत प्रयोगानिष्टसिद्धये ॥ १ ॥ पंचांगामासुरीं[1] मंत्री गृहीत्वा मंत्रयेच्छतम् ॥ तया धूपितमात्मानं यो जिघ्रेत्स वशो भवेत् ॥ मध्वक्तामासुरीं[2] हुत्वा सहस्रं वशयेज्जगत् ॥ २ ॥ अन्यः कल्पः–राजिकाप्रतिमां कृत्वा दक्षांघ्रेर्मस्तकावधि ॥ अष्टोत्तरशतं खंडान् जुहुयादसिना कृतान् ॥ ३ ॥ नार्याः प्रतिकृतेर्वामपादादिहवनं चरेत् ॥ एवं कुर्यात्स सप्ताहं राजींधनचितेऽनले ॥ ४ ॥ स सपत्नोऽपि मृत्यंतं दासो जायेत मंत्रिणः ॥ स्त्रीलिंगोहः प्रकर्तव्यो मंत्रे नारीवशीकृतौ ॥ ५ ॥ अन्यः कल्पः–कटुतैलान्वितां राजीं निंबपत्रयुतां रिपोः ॥ नामयुङ्मनुना हुत्वा ज्वरिणं कुरुते रिपुम् ॥ ६ ॥ एवं राजीं सलवणां हुत्वा स्फोटो भवेदरेः ॥ अर्कदुग्धाक्ततद्धोमान्नेत्रे नाशयते रिपोः ॥ ७ ॥ अन्यः कल्पः–साधको राजिकां हुत्वा ब्राह्मणं वशयेद्ध्रुवम् ॥ क्षत्रियं तु गुडाभ्यक्तां वैश्यं दधियुतां च ताम् ॥ ८ ॥ शूद्रं लवणसंयुक्तां हुत्वा तां साष्टकं शतम् ॥ आसुरीसमिधं हुत्वा मध्वक्तां लभते निधिम् ॥ ९ ॥ अन्यः कल्पः–तोयपूर्णे घटे मंत्री राजिकापल्लवान्विते ॥ आवाह्य तां पूजयित्वा शतं मूलेन मंत्रयेत् ॥ १० ॥ तेनाभिषिक्तं मनुजेनालक्ष्मीराधयो रुजः ॥ उपसर्गाः पलायंते परित्यज्यातिदूरतः ॥ ११ ॥ अन्यः कल्पः–असुरीकुसुमं शीतं प्रियंगुं नागकेसरम् ॥ मनःशिला च तगरमेतत्सर्व

१–पंचांगां–मूलशाखापत्रपुष्पफलान्विताम् । २ आसुरीं–राजिकाम् । ३—मध्वक्तां—खण्डघृतक्षौद्रयुताम् । ४–राजिकाकाष्ठदीप्ते चिताग्नौ । ५–सपत्नोऽपि शत्रुरपि देहांतपर्यंतं दासः स्यात् किमुतान्यः । ६–स्त्रीलिंगोहः नार्या वशीकरणे प्रतिमाहेमादौ मन्त्रे स्थितानाममुकस्येति स्थाने देवदत्तस्योपविष्टस्येत्यादीनां षष्ठ्यन्तानां पदानां उपविष्टायाः सुभाया इत्या यूहो विधेयः । ७–गुडयुतां राजीं हुत्वा क्षत्रियं वशयेत् । दध्यक्तां हुत्वा वैश्यम् । होममानमष्टोत्तरशतं सर्वत्र । ८–उपसर्गा उपद्रवाः । ९–शीतं चंदनम् ।

विचूर्णितम् ॥ १२ ॥ शताभिमंत्रितं साध्यमूर्ध्नि क्षितं वैशंवदम् ॥ १३ ॥ अन्यः कल्पः–निंबकाष्ठसमिद्भेऽप्यासुरीं सर्षपान्वितम् ॥ अष्टोत्तरशतं हुत्वा सप्ताहं दक्षिणामुखः ॥ १४ ॥ विदध्यादचिराच्छत्रुं सूर्यसूनुगृहातिथिम् ॥ १५ ॥ किं कुर्यान्नृपतिः क्रुद्धः किं कुर्यू रिपवोऽखिलाः ॥ क्रुद्धः कालोऽपि किं कुर्य्यादासुरी चेदुपासिता ॥ १६ ॥ ग्रंथाननेकानालोक्य मंत्रा गुप्ततमा मया ॥ हिताय सुधियां ख्याता विस्तरादुपरम्यते ॥ १७ ॥ इत्यासुरीमहाकल्पः ॥ अथ कालरात्रीमंत्रप्रयोगः ॥ मंत्रमहोदधौ मंत्रो यथा– ऐं ह्रीं क्लीं श्रीं काह्वेश्वरि सर्वजनमनोहरे सर्वमुखस्तंभिनि सर्वराजवशंकरि सर्वदुष्टनिर्दलिनि सर्वस्त्रीपुरुषाकर्षिणि बंदिशृंखलास्त्रोटय २ सर्वशत्रून् भंजय २ द्वेष्टॄन् निर्दलय २ सर्वं स्तंभय २ मोहनास्त्रेण द्वेषिण उच्चाटय २ सर्वं वशं कुरु २ स्वाहा देहि २ सर्वं कालरात्रि कामिनि गणेश्वरि नमः ॥ इति त्रयस्त्रिंशदुत्तरशताक्षरो मंत्रः ॥ अस्यविधानम्-अस्य कालरात्रिमंत्रस्य दक्ष ऋषिः।जगती च्छंदः।अलर्कनिवासिनी कालरात्रिर्देवता । क्लीं बीजम् । मायाराज्ञीति शक्तिः । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः ॥ ॐ दक्षऋषये नमः शिरसि १ । जगतीच्छंदसे नमो मुखे २ । अलर्कनिवासिनीकालरात्रिदेवतायै नमो हृदि ३ । क्लींबीजाय नमो लिंगे ४ । मायाराज्ञीतिशक्त्ये नमः पादयोः ५ । विनियोगाय नमः सर्वांगे ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ अंगुष्ठाभ्यां नमः १ । ऐं तर्जनीभ्यां नमः २ । ह्रीं मध्यमाभ्यां नमः ३ । क्लीं अनामिकाभ्यां नमः ४ । श्रीं कनिष्ठिकाभ्यां नमः ५ ॥ इति पंचांगुलीषु करांगन्यासः ॥ ॐ ऐंह्रींक्लींश्रीं काह्वेश्वरि सर्वजनमनोहरे सर्वमुखस्तंभिनि हृदयाय नमः १ । सर्वराजवशंकरि सर्वदुष्टनिर्दलिनि सर्वस्त्रीपुरुषाकर्षिणि शिरसे स्वाहा २ । बंदिशृंखलास्त्रोटय २ सर्वशत्रून् भंजय २ शिखायै वषट् ३ । द्वेष्टॄन् निर्दलय २ सर्वं स्तंभय २ कवचाय हुं ४ । मोहनास्त्रेण द्वेषिण उच्चाटय २ सर्वं वशं कुरु २ स्वाहा नेत्रत्रयाय वौषट् ५ । देहि २ सर्वं कालरात्रि कामिनि गणेश्वरि नमः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः । एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम्–ॐ उद्यन्मार्तंड

१–वशंवदं वशकृतम् । २–सूर्यसूनुगृहातिथिं यमातिथिं मृतमित्यर्थः ।


कांतिं विगलितकवरीं कृष्णवस्त्रावृतांगीं दंडं[1] लिंगं कराब्जैर्वरमथ भुवनं संधधानां त्रिनेत्राम्॥ नानो[2]कल्पैर्विभासं स्मितमुखकमलां सेवितां देवसंघैर्मायाराज्ञीं [3]मनोभूशरविकलतनूमाश्रये कालरात्रिम् ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूजयेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति संपूज्य नव पीठशक्तीः पूजयेत्। पूर्वादिक्रमेण ॐ जयायै नमः १ । ॐ विजयायै नमः २ । ॐ अजितायै नमः ३ । ॐ अपराजितायै नमः ४ । ॐ नित्यायै नमः ५ । ॐ विलासिन्यै नमः ६ । ॐ दोग्ध्र्यै नमः ७ । ॐ अघोरायै नमः ८ । मध्ये ॐ मंगलायै नमः ९ ॥ इति पूजयेत् ॥ ततो भूर्जपत्रे बिंदुत्रिकोणषट्कोणवृत्ताष्टदलवृत्तषोडशदलवृत्तं च कार्यपरत्वे[4]न लेखन्यादिद्वारा लिखित्वा तस्योपरि त्रिरेखात्मकभूपुरं विनिर्माय 'ॐ कालरात्रियोगपीठात्मने नमः ' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा पुनर्ध्यात्वा बिंदौ मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य आवरणपूजां कुर्यात् ॥ तद्यथा—पुष्पांजलिमादाय मूलमुच्चार्य—ॐ संविन्मये परे देवि परामृतरसप्रिये ॥ देह्यनुज्ञां कालरात्रि परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं दद्यात् ॥ इत्याज्ञां गृहीत्वा आवरणपूजामारभेत । तद्यथा—तत्र त्रिकोणे पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण वामावर्तेन च । ॐ संमोहिन्यै नमः । संमोहिनीश्रीपादुकां पूजयामि तर्पयामि नमः १ ॥ इति सर्वत्र । ॐ मोहिन्यै नमः । मोहिनीश्रीपा० २ । ॐ विमोहिन्यै नमः । विमोहिनीश्रीपा० ३ ॥ इति पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य—ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥


---

१ दंडवरे दक्षयोः लिङ्गभुवने वामयोः भुवनं ब्रह्माण्डम् । २ नानाकल्पैर्विभासं विविधाभरणसमूहशोभिताम् । ३ मनोभूशरविकलतनूं कामबाणव्याकुलशरीराम् । ४ तद्यंत्रं विलिखेद्भूर्जे क्षीरद्रोः फलकेऽपि वा । शांतये त्वष्टगंधेन लेखन्या चंपकोत्थया ॥ कर्पूरागुरुकर्पूररोचनारक्तचंदनम् । कुंकुमं चंदनं वापि कस्तूरीत्यष्टगंधकम् ॥ सिंदूरहिंगुलाभ्यां च वश्याय विलिखेत्सुधीः। खारखोद्भवलेखन्या स्तंभने कोकिलच्छदैः ॥ हरितालहरिद्राभ्यां मारणे वायसच्छदैः । धत्तरभानुनिर्गुंडीखराश्वमहिषासृजा॥ एवं विलिखिते यंत्रे कुर्यादावरणार्चनम् ॥

ततः षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ हृदयाय नमः। हृदयश्रीपा० १। ॐ शिरसे स्वाहा। शिरःश्रीपा० २। ॐ शिखायै वषट्। शिखाश्रीपा० ३। ॐ कवचाय हुम्। कवचश्रीपा० ४। ॐ नेत्रत्रयाय वौषट्। नेत्रत्रयश्रीपा० ५। ॐ अस्त्राय फट्। अस्त्रश्रीपा० ६॥ इति षडंगानि पूजयित्वा पुष्पांजलिं दद्यात्॥ इति द्वितीयावरणम्॥ २॥ ततो वृत्ते वामावर्तेन च ॐ अं आं नमः १। ॐ इँ ईं नमः २। ॐ उँ ऊँ नमः ३। ॐ ऋँ ॠँ नमः ४। ॐ लृँ लॄँ नमः ५। ॐ एँ ऐं नमः ६। ॐ ओं औं नमः ७। ॐ अं अः नमः ८॥ इति षोडशस्वरान् पूजयित्वा पुष्पांजलिं दद्यात्॥ इति तृतीयावरणम्॥ ३॥ ततोऽष्टदलेषु वामावर्तेन ॐ ब्राह्म्यै नमः। ब्राह्मीश्रीपा० १। ॐ माहेश्वर्यै नमः। माहेश्वरीश्रीपा० २। ॐ कौमार्यै नमः। कौमारीश्रीपा० ३। ॐ वैष्णव्यै नमः। वैष्णवीश्रीपा० ४। ॐ वाराह्यै नमः। वाराहीश्रीपा० ५। ॐ इन्द्राण्यै नमः। इन्द्राणीश्रीपा० ६। ॐ चामुंडायै नमः। चामुंडाश्री० ७। ॐ महालक्ष्म्यै नमः। महालक्ष्मीश्रीपा० ८। इत्यष्टौ मातृः पूजयित्वा पुष्पांजलिं दद्यात्॥ इति चतुर्थावरणम्॥ ४॥ पुनर्वृत्ते ॐ कँ नमः १। ॐ खँ नमः २। ॐ गँ नमः ३। ॐ घँ नमः ४। ॐ ङँ नमः ५। ॐ चँ नमः ६। ॐ छँ नमः ७। ॐ जँ नमः ८। ॐ झँ नमः ९। ञँ नमः १०। ॐ टँ नमः ११। ॐ ठँ नमः १२। ॐ डँ नमः १३। ॐ ढँ नमः १४। ॐ णँ नमः १५। ॐ तँ नमः १६। ॐ थँ नमः १७। ॐ दँ नमः १८। ॐ धँ नमः १९। ॐ नँ नमः २०। ॐ पँ नमः २१। ॐ फँ नमः २२। ॐ बँ नमः २३। ॐ भँ नमः २४। ॐ मँ नमः २५। ॐ यँ नमः २६। ॐ रँ नमः २७। ॐ लँ नमः २८। ॐ वँ नमः २९। ॐ शँ नमः ३०। ॐ षँ नमः ३१। ॐ सँ नमः ३२। ॐ हँ नमः ३३। ॐ ळँ नमः ३४। ॐ क्षँ नमः ३५। इति पूजयित्वा पुष्पांजलिं दद्यात्॥ इति पंचमावरणम्॥ ५॥ ततः षोडशदलेषु वामावर्तेन च ॐ उर्वश्यै नमः। उर्वशी श्रीपा० १। ॐ मेनकायै नमः। मेनकाश्रीपा० २। ॐ रंभायै नमः। रंभाश्रीपा० ३। ॐ घृताच्यै नमः घृताची श्रीपादुकां पूजया० ४। ॐ मंजुघोषायै नमः। मंजुघोषाश्रीपा० ५। ॐ सहजन्यायै नमः। सहजन्याश्रीपा० ६। ॐ सुकेश्यै

अथ कालरात्रिपूजनयन्त्रम् ।






५३ ५४ ५५
६५ ६६ ६७
८० ८१ ८२

नमः । सुकेशीश्रीपा० ७ । ॐ तिलोत्तमायै नमः । तिलोत्तमाश्रीपा० ८ । ॐ गांधर्व्यै नमः । गांधर्वीश्रीपा० ९ । ॐ सिद्धकन्यायै नमः । सिद्धकन्याश्रीपा० १० । ॐ किन्नर्यै नमः । किन्नरीश्रीपा० ११ । ॐ नागकन्यकायै नमः । नागकन्यकाश्रीपा० १२ । ॐ विद्याधर्य्यै नमः । विद्याधरीश्रीपा० १३ । ॐ किंपुरुषायै नमः । किंपुरुषाश्रीपा० १४ । ॐ यक्षिण्यै नमः । यक्षिणीश्रीपा० १५ । ॐ पिशाच्यै नमः । पिशाचीश्रीपा० १६ ॥ इति षोडशदेवताः पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति षष्ठावरणम् ॥ ६ ॥ पुनर्वृत्ते ॐ परमात्मने नमः । परमात्मश्रीपा० १ । ऐं सरस्वत्यै नमः । सरस्वतीश्रीपा० २ । ह्रीं गौर्य्यै नमः । गौरीश्रीपा० ३ । क्लीं कामायै नमः । कामाश्रीपा० ४ । श्रीं रमायै नमः । रमाश्रीपा० ५ । द्रां द्राविण्यै नमः । द्राविणीश्रीपा० ६ । द्रीं क्षोभिण्यै नमः । क्षोभिणीश्रीपा० ७ । क्लीं वशीकारिण्यै नमः । वशीकारिणीश्रीपा० ८ । ब्लूं कर्षिण्यै नमः । कार्षिणीश्रीपा० ९ । सः संमोहिन्यै नमः । संमोहिनीश्रीपा० १० । इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति सप्तमावरणम् ॥ ७ ॥ ततो भूपुराभ्यंतरे प्राच्यादिक्रमेण ॐ अणिमायै नमः । अणिमाश्रीपा० १ । ॐ लघिमायै नमः । लघिमाश्रीपा० २ । ॐ महिमायै नमः । महिमाश्रीपा० ३ । ॐ ईशितायै नमः । ईशिताश्रीपा० ४ । ॐ वशितायै नमः । वशिताश्रीपा० ५ । ॐ कामपूरण्यै नमः । कामपूरणीश्रीपा० ६ । ॐ गरिमायै नमः । गरिमाश्रीपा० ७ । ॐ प्राप्त्यै नमः । प्राप्तिश्रीपा० ८ । इत्यष्टसिद्धीः पूजयित्वा पुष्पांजलिं दद्यात् । इत्यष्टमावरणम् ॥ ८ ॥ ततो भूगृहस्य प्रथमरेखायां चतुर्दिक्षु ॐ इच्छाशक्त्यै नमः । इच्छाशक्तिश्रीपा० १ । ॐ क्रियाशक्त्यै नमः । क्रियाशक्तिश्रीपा० २ । ॐ ज्ञानशक्त्यै नमः । ज्ञानशक्तिश्रीपा० ३ ॥ इति पूजयेत् ॥ ततो मध्यरेखायाम् ॐ रुद्राय नमः । रुद्रश्रीपा० १ । ॐ विष्णवे नमः । विष्णुश्रीपा० २ । ॐ ब्रह्मणे नमः । ब्रह्मश्रीपा० ३ ॥ इति पूजयेत् ॥ ततोऽन्तरेखायां ॐ सत्त्वाय नमः । सत्त्वश्रीपा० १ । ॐ रजसे नमः । रजःश्रीपा० २ । ॐ तमसे नमः । तमःश्रीपा० ३ ॥ इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति नवमावरणम् ॥९॥ ततः भूपुरबाह्ये प्राच्यादिचतुर्दिक्षु ॐ गणेशाय नमः । गणेशश्रीपा० १ । ॐ क्षेत्रपालाय नमः । क्षेत्रपालश्रीपा० २ । ॐबटुकाय नमः । बटुकश्रीपा० ३ । ॐ योगिनीभ्यो नमः । योगिनीश्रीपा० ४ ॥ इति द्वारपालान् पूजयित्वा पुष्पांजलिं दद्यात् ॥

इति दशमावरणम् ॥ १० ॥ ततो भूपुराद्बहिः पूर्वादिक्रमेण ॐ लं इन्द्राय नमः । इन्द्रश्रीपा० १ । ॐ रं अग्नये नमः । अग्निश्रीपा० २ । ॐ मं यमाय नमः । यमश्रीपा० ३ । ॐ क्षं निर्ऋतये नमः । निर्ऋतिश्रीपा० ४ । ॐ वं वरुणाय नमः । वरुणश्रीपा० ५ । ॐ शं वायवे नमः । वायुश्रीपा० ६ । ॐ कुं कुबेराय नमः । कुबेरश्रीपा० ७ । ॐ हं ईशानाय नमः । ईशानश्रीपा० ८ । पूर्वेशानयोर्मध्ये ॐ ॐ ब्रह्मणे नमः । ब्रह्मश्रीपा० ९ । वरुणनिर्ऋतिमध्ये ॐ ह्रीं अनंताय नमः । अनंतश्रीपा० १० ॥ इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इत्येकादशावरणम् ॥ ११ ॥ तत इन्द्रादिसमीपे ॐ वं वज्राय नमः १ । ॐ शं शक्तये नमः २ । ॐ दं दंडाय नमः ३ । ॐ खं खड्गाय नमः ४ । ॐ पां पाशाय नमः ५ । ॐ अं अंकुशाय नमः ६ । ॐ गं गदायै नमः ७ । ॐ त्रिं त्रिशूलाय नमः ८ । ॐ पं पद्माय नमः ९ । ॐ चं चक्राय नमः ॥ इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वादशावरणम् ॥ १२ ॥ इति बाह्यार्चनं कृत्वा पुनः देवीपार्श्वे प्राच्यादिचतुर्दिक्षु प्राच्याम् ॐ मायायै नमः । मायाश्रीपा० १ । ॐ कालरात्र्यै नमः । कालरात्रिश्रीपा० २ । ॐ वटवासिन्यै नमः । वटवासिनीश्रीपा० ३ । दक्षिणे ॐ गणेश्वर्यै नमः । गणेश्वरीश्रीपा० १ । ॐ काह्लाख्यायै नमः । काह्लाख्याश्रीपा० २ । ॐ व्यापिकायै नमः । व्यापिकाश्रीपा० ३ । पश्चिमे ॐ अलर्कवासिन्यै नमः । अलर्कवासिनीश्रीपा० १ । ॐ मायाराज्ञ्यै नमः । मायाराज्ञीश्रीपा० २ । ॐ मदनप्रियायै नमः । मदनप्रियाश्रीपा० ३ । उत्तरे ॐ रत्यै नमः । रतिश्रीपा० १ । ॐ लक्ष्म्यै नमः । लक्ष्मीश्रीपा० २ । ॐ काह्लेश्वर्यै नमः । काह्लेश्वरीश्रीपा० ३ ॥ इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति त्रयोदशावरणम् ॥ १३ ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य मूलेन मद्यादिबलिं दत्त्वा जपं कुर्यात् ॥ अस्य पुरश्चरणमयुतजपः । तद्दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री षट् प्रयोगान् साधयेत् ॥ तथा च–अयुतं प्रजपेन्मंत्रं दशांशं जुहुयात्तिलैः ॥ पयोरुहैर्वा विप्रेन्द्रान् संतर्प्य श्रेय आप्नुयात् ॥ १ ॥ एवं संपूजिता स्वेष्टं कालरात्रिः प्रयच्छति । सिद्धे मंत्री प्रकुर्वीत प्रयोगानिष्टसिद्धये ॥ २ ॥ अथ षट्प्रयोगविधानम् । तत्रादौ वशीकरणप्रयोगः ॥ साधकः शनिवासरे संध्याकाले तडागं गत्वा 'ॐ नमो जलौकायै जलौकायै सर्वजनं वशं कुरु कुरु हुम्'

म०५० इति मंत्रेण हरिद्राक्ताक्षतपुष्पैर्जलं संपूज्य गृहं गत्वा देवीं स्मरन्निशि भूमौ शयीत ॥ प्रातस्तस्मात्सरसो जलौकाद्वयमादाय म० खं० २
॥ ६७९॥ छायाशुष्कं कृत्वा संचूर्ण्य तच्चूर्णयुक्तेन कृष्णकार्पाससूत्रेण वर्तिं कृत्वा कुलालचक्रानीतमृन्निर्मिते पात्रे तां निधाय भ्रमतस्तैल कुमी० तं०
यंत्रात्तिलतैलमादाय तत्र निक्षिप्य वेश्यागृहादग्निमानीय कुचिलाप्रसिद्धतरोः तरं० १९

वशीकरणयंत्रम् ।



काष्ठैस्तां प्रज्वाल्य तेन तत्पात्रे दीपं कृत्वा हरिद्रारसकृते त्रिकोणषट्कोणचतुरस्रके यंत्रे मध्ये लाजान् प्रक्षिप्य तदुपरि दीपपात्रं स्थापयित्वा दीपे कालरात्रिमावाह्य सावरणां संपूज्य नवीनखर्परं दीपोपरि धृत्वा कज्जलं पातयेत् । तत्कज्जलमादाय पश्चिमाभिमुखः 'ॐ ऐं क्लीं ह्रीं श्रीं ग्लौं ब्लूँ ह्लौं नमः काह्वेश्वरि सर्वान्मोहय २ कृष्णे कृष्णवर्णे कृष्णांबरसमन्विते सर्वानाकर्षय २ शीघ्रं वशं कुरु २ हुं ऐं क्लीं श्रीं' इति मंत्रेण शतत्रयवारमभिमंत्रयेत् ॥ ततो दीपाद्देवीमात्मनि संयोज्य तत्कज्जलं भौमवारे नवनीतमर्दितं पात्रे संस्थाप्य तदग्रे वह्निं संस्थाप्य संस्कृत्य मधूकपुष्पैरष्टोत्तरशतं मूलेन हुत्वा कुमारीबटुकांस्त्रियो मधुरभोजनेन भोजयेत् ॥ तदंजनकृततिलको जगद्वशयेदित्यादिफलं स्पष्टम् ॥ तथा च—तेनांजनेन रचिततिलको मंत्रिसत्तमः ॥ दर्शनादेव वशयेन्नरनारीनरेश्वरान् ॥ दुग्धेनादौ प्रदत्तं तन्नराणां वशाकारकम् ॥ तेन स्पृष्टो नरो नूनं दासः स्पर्शयितुर्भवेत् ॥ वशीकरणमाख्यातं स्तंभनं प्रोच्यतेऽधुना ॥ १ ॥ अथ स्तंभनप्रयोगः ॥ रवौ हरिद्रारोचनाकुष्ठतगरैर्गोमूत्रपिष्टैर्मसिं कृत्वा हरिद्रारंजिते वस्त्रेऽष्टदलं ॥६७९॥
कृत्वाऽमुकं स्तंभयेति मध्ये ॐ ॐ ग्लौं ग्लौं चटचटेति वर्णान् दलेषु लिखेत् । तद्वस्त्रं पीतसूत्रेण संवेष्ट्य कोकिलतरोः सप्त कीलकान्कृत्वा


स्तंभनयन्त्रम् ।



तैर्विद्धार्कपत्रैः संवेष्ट्य वल्मीकरंध्रे प्राक्षिप्य मेषमूत्रमुपरि सिक्त्वा रंध्रोपरि शिलां संस्थाप्य तत्र स्थितो हरिद्रामणिभिर्मालामादाय नैर्ऋत्याभिमुखः 'ॐ ह्लां ह्लीं ह्लूं कामाक्षि मायारूपिणि सर्वमनोहारिणि स्तंभय २ रोधय २ मोहय २ क्लां क्लीं क्लूं कामाक्षि काह्लेश्वरि हुं हुं हुं' इति मंत्रसहस्रं जपेत् । एवं कृते रिपुस्तंभः ॥ २ ॥

१ दीमकरंध्र । २ मेषमूत्रेण परिपूरयेत् ।

मोहनकरयन्त्रम् ।




अथ मोहनप्रयोगः ॥ रविवारे हरिद्रां नारीदुग्धेन पिष्ट्वा तद्रसेन भूर्जपत्रे मध्यकामबीजयुतं वृत्तं कृत्वा दशकामबीजैः संवेष्ट्य पुनर्वृत्तं कृत्वा द्वादशकामबीजैः संवेष्ट्य पुनर्वृत्तं कृत्वा षोडशकामबीजैः संवेष्ट्योपरिबीजयुजं षट्कोणं कृत्वा सर्वं वाग्बीजं मध्यस्थं कुर्यात् ॥ तद्यंत्रोपरि स्थित्वा पंचदिनं प्रत्यहं क्रुद्धमानसः सहस्रं दशाक्षरं जपेत् ॥ मंत्रो यथा–'ॐ क्लीं कामाय क्लीं कामिन्यै क्लीम्' इति ॥ जपदशांशेन तिलैस्तैलेनैव जुहुयात् ॥ होमोत्थभस्मना तिलकेन तद्यंत्रधारणेन च विश्वं मोहयेत् ॥ तथाच–होमोत्थभस्मना कुर्वन् तिलकं नरसत्तमः ॥ मोहयेदखिलं विश्वं तद्यंत्रस्यापि धारणात् ॥ उक्तं मोहनमाकर्षं वक्ष्ये साधकसत्तम ॥ ३ ॥ अथाकर्षणप्रयोगः ॥ कृष्णाष्टम्यां कृष्णचतुर्दश्यां कुजरव्यन्यतरयुक्तायां प्रातर्नाभिमात्रं जले स्थित्वा मूलमेकादशशतं प्रजप्य गृहमागत्य शरीरं तैलेनाभ्यज्य पीठेऽञ्जनैर्नराकारं योषिदाकारं वा विलिख्य लज्जावतीपत्रैस्तं संपूज्य लज्जावतीमूलरसेन संप्रोक्ष्य तदग्रेऽमुं मंत्रं षष्ट्याधिकशतं जपेत् ॥ मंत्रो यथा–ॐ नमः कालिकायै सर्वाकर्षिण्यै अमुकीमाकर्षयाकर्षय शीघ्रमानयानय आं ह्रीं क्रां भद्रकाल्यै नमः॥ ततः पंचाशत्करवीरपुष्पैः अं अमुकीमाकर्षयाकर्षय नमः ॥ आं अमुकीमित्यादि पंचाशद्वर्णपूर्वकपंचाशन्मन्त्रैरेकैकमंत्रद्वारा वा प्रतिपुष्पस्तंमाकारं पूजयेत् ॥ ततो धूपदीपनैवेद्यानि कृत्वा तदग्रेऽग्निं प्रतिष्ठाप्य तत्राज्योक्तचणकैः शतं मधुनोक्तमनुना हुत्वा कुमारीकर्तितेन कृष्णकार्पाससूत्रेणाष्टाविंशतितंतुनिर्मितं स्वदेहमितं दोरकं कृत्वाऽऽकर्षमंत्रेणाष्टोत्तरशतं ग्रंथीन् दत्त्वा तद्धारणान्नरं नारीं चाकर्षतीति ॥ तथा च--कृष्णकार्पाससूत्रस्य कुमारीनिर्मितस्य च ॥ गुणं देहमितं कृत्वा अष्टाविंशतितंतुभिः ॥आकर्षमनुना दद्याद्ग्रंथीनष्टोत्तरं शतम् ॥ तद्दोरके धृते शीघ्रमायाति स्त्री नरोऽपि वा ॥ त्रिरात्राद्ग्राममध्यस्थोऽन्य


१तिलाज्यैर्वा जुहुयात् । २ लज्जावती लज्जालुः स्पर्शमात्रेण यत्पत्राणि संकुचंति सा लज्जालुः । ३ शतं षष्ट्यधिकं जपत्वा लोहितैः करवीरजैः॥पंचाशत्प्रतिमैर्मंत्री पूजयेल्लिखिताकृतिम्॥ मातृकावर्णमेकैकं तन्नामाकर्षयद्वयम् ॥ नम इत्यभिसंजप्य पुष्पमेकैकमर्पयेत्॥ धूपदीपनैवेद्यानि कृत्वा होमं समाचरेत् ॥ ४ नराकारं स्त्र्याकारं तत्प्रतिमां पूजयेत् । ५ चणकैराज्यसंमिश्रैराकर्षणमुदाहृतम् ।

देश्यो नवरात्रतः ॥ उक्तमाकर्षणमिदमुच्चाटनमथोच्यते ॥ ४ ॥ अथ उच्चाटनप्रयोगः ॥ कृष्णचतुर्दश्यां शून्यगृहे नीलवस्त्रावृतो मुक्तकचो मुक्ताशिखो दक्षिणाभिमुखः कुक्कुटासने चोपविश्य ग्रंथियुक्तया मुञ्जरज्ज्वा मालया निशि सहस्रद्वयममुं मंत्रं जपेत् ॥ मंत्रो यथा--'ॐ ह्वूं स्लूं म्लूं क्ष्लूं कालरात्रि महाध्वांक्षि अमकमाशूच्चाटयोच्चाटय छिंधि भिंधि स्वाहा ह्रौं कामाक्षि क्रौं' इति जपेत् ॥ ततः शतद्वयमनेनैवे मंत्रेण सर्षपैर्हुत्वा तैलोदकयुतेन सर्षपपिण्याकेन तेन मनुना बलिं दद्यात् ॥ एवं सप्ताहं कृते उच्चाटनसिद्धिः ॥ तथा च—एवं कृते सप्तरात्रं देशाद्दूरं व्रजेदरिः ॥ ५ ॥ अथ विद्वेषणप्रयोगः ॥ प्रीतिमतोर्द्वयोर्जन्मवृक्षोत्थं फलैकद्वयं विधाय तत्र रासभीक्षीरमर्दितेन विषाष्टकेनोपरि नामयुक्तमकारद्वयं विलिख्य तत्पृष्ठा निशि सहस्रममुं मंत्रं जपेत् ॥ मंत्रो यथा—'ॐ ह्रौं ग्लौं ह्लौं श्रौं भगवति दंडधारिणि अमकममुकं शीघ्रं विद्वेषय २ रोधय २ भंजय २ श्रीं मायाराइयै ॐ हुं हुं हुं' इति जपेत् ॥ ततः खरमहिषाश्वपुच्छरोमकृतया रज्ज्वा तत्फलकद्वयं मिथो बद्ध्वा वल्मीकरंध्रे निखाय पुनर्मंत्रं सहस्रं जपेत् ॥ एवं विद्वेषणसिद्धिः ॥ तथा च—वल्मीकरंध्रे निखनेत् पुनस्तावज्जपेन्नरः ॥ सप्ताहाज्जायते वैरं तयोः प्रीतिमतोरपि ॥ ६ ॥ अथ मारणप्रयोगः ॥ कुजवारयुतायां कृष्णचतुर्दश्यां दिने गोशालाचतुष्पथश्मशानान्यतरस्मान्मृदमानीय विडंगकरवीरार्कपुष्पयुतां कृत्वा श्मशाने निर्जनालये वा उपविश्य विशिखो नीलवस्त्रधरो भूत्वा नीलवस्त्रोपरि निशि तया मृदा पुत्तलीं कृत्वा हृदि वैरिनाम लिखित्वा प्राणान्प्रतिष्ठाप्य श्मशानवस्त्रेणाच्छाद्य तैलेनाभ्यज्य खराश्वमहिषरुधिरेण संस्नाप्य रक्तचंदनेन विलिप्य धत्तूरपुष्पैः संपूज्य तदग्रे श्मशानाग्निं संस्थाप्य तदग्नौ वचासर्षपभल्लातकधत्तूरबीजमिश्रितैरष्टोत्तरशतं जुहुयात् ॥ मंत्रो यथा—'ॐ म्रां म्रीं म्रूं मृतीश्वरि क्रुं कृत्ये अमुकं शीघ्रं मारय २ क्रों' इति मंत्रेण सर्वं कुर्यात् ॥ ततः पुत्तलीशिरश्छित्वाऽग्नौ हुत्वा पूर्णाहुतिं कुर्यात् । एवमेकविंशतिरात्र्यंते रिपुर्म्रियते । ततः प्रायश्चित्तं कुर्यात् । तथा च—कर्मस्वेवंविधेष्वादौ भैरवाय बलिं दिशेत् ॥ माषान्नपलमद्याद्यैरेवं सिद्धिर्भवेद्ध्रुवम् ॥ ७ ॥ इति कालरात्रिमंत्रप्रयोगः ॥

१ जन्मनक्षत्रतरूत्थम् २ । फलकद्वयं कृत्वा । ३ मुक्तशिखः ।

अथ वर्तालीपूजनयन्त्रम् ।







॥ श्रीगणेशाय नमः ॥ अथ वार्तालीमंत्रप्रयोगः । मंत्रमहोदधौ–ॐ ऐं ग्लौं ऐं नमो भगवति वार्तालि वाराहि वाराहमुखि ऐं ग्लौं ऐं अंधे अंधिनि नमो रुंधे रुंधिनि नमो जंभे जंभिनि नमो मोहे मोहिनि नमः स्तंभे स्तंभिनि नमः ऐं ग्लौं ऐं सर्वदुष्टप्रदुष्टानां सर्वेषां सर्ववाक्पदचित्तचक्षुर्मुखगतिजिह्वास्तंभं कुरु कुरु शीघ्रं वशं कुरु कुरु ऐं ग्लौं ऐं ठः ठः ठः ठः हुँ फट् स्वाहा ॥ इति चतुर्दशोत्तरशताक्षरो मंत्रः । अस्य विधानम्–अस्य श्रीवार्तालीमंत्रस्य शिव ऋषिः । जगती छंदः । वार्ताली देवता । (मतांतरे) ग्लौं बीजम् । स्वाहा शक्तिः । ममाखिला वासये जपे विनियोगः ॥ शिवऋषये नमः शिरसि १ । जगतीच्छंदसे नमो मुखे २ । वार्तालीदेवतायै नमो हृदि ३ । ग्लौं बीजाय नमो लिंगे ४ । स्वाहाशक्तये नमः पादयोः ५ । विनियोगाय नमः सर्वांङ्गे ६ ॥ इति ऋष्यादिन्यासः ॥ ॐ वार्तालि अंगुष्ठाभ्यां नमः १ । ॐ वाराहि तर्जनीभ्यां नमः २ । ॐ वाराहमुखि मध्यमाभ्यां नमः ३ । ॐ अंधे अंधिनि अनामिकाभ्यां नमः ४ । ॐ रुंधे रुंधिनि कनिष्ठिकाभ्यां नमः ५ । ॐ जंभे जंभिनि करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ वार्तालि हृदयाय नमः १ । ॐ वाराहि शिरसे स्वाहा २ । ॐ वाराहमुखि शिखायै वषट् ३ । ॐ अंधे अंधिनि कवचाय हुँ ४ । ॐ रुंधे रुंधिनि नेत्रत्रयाय वौषट् ५ । ॐ जंभे जंभिनि अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ एवं न्यासं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ ॐ रक्तांभोरुहकर्णिकोपरिगते शावासने संस्थितां मुंडस्रक्परिराजमानहृदयां नीलाश्मसद्रोचिषम् ॥ हस्ताब्जैर्मुशलं हलाभयवरान् संबिभ्रतीं सत्कुचां वार्तालीमरुणांबरां त्रिनयनां वंदे वराहाननाम् ॥ १ ॥ एवं ध्यायेत् ॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत् ॥ तद्यथा–पूर्वादिक्रमेण ॐ जयायै नमः १ । ॐ विजयायै नमः २ । ॐ जितायै नमः ३ । ॐ अपराजितायै नमः ४ । ॐ नित्यायै नमः ५ । ॐ विलासिन्यै नमः ६ । दोग्ध्र्यै नमः ७ । ॐ अघोरायै नमः ८ । मध्ये ॐ मंगलायै नमः ९ ॥ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रपत्रं ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण प्रोञ्छ्य तस्योपरि

गोरोचनहरिद्राचंदनागुरुकुंकुमेन त्रिकोणपंचास्रषट्कोणाष्टदलशतदलं सहस्रदलं च विनिर्माय तस्योपरि भूपुरं लिखित्वा 'ॐ ग्लौं वार्ताल्यै कैलासाचलमध्यस्थितायै नमः'[1] इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य पुनर्ध्यात्वा त्रिकोणांतरे मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तद्यथा पुष्पांजलिमादाय—संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि वार्तालि परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं दद्यात् ॥ इत्याज्ञां गृहीत्वा षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ वार्तालि हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः १ ॥ इति सर्वत्र । ॐ वाराहि शिरसे स्वाहा । शिरःश्रीपा० २ । ॐ वराहमुखि शिखायै वषट् । शिखाश्रीपा० ३ । ॐ अंधे अंधिनि कवचाय हुं। कवचश्रीपा० ४ । ॐ रुंधे रुंधिनि नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ५ । ॐ जंभे जंभिनि अस्त्राय फट् । अस्त्रश्रीपा० ६ ॥ इति षडंगानि पूजयेत् ॥ ततस्त्रिकोणे ऐशान्यादिक्रमेण ॐ वार्ताल्यै नमः वार्तालीश्रीपा० १ । ॐ वाराह्यै नमः वाराहीश्रीपा० २ । ॐ वराहमुख्यै नमः । वराहमुखीश्रीपा० ३ ॥ इति पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य—अभीष्टसिद्धिं देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततः पंचास्रेऽग्न्यादिक्रमेण ॐ अंधिन्यै नमः अंधिनीश्रीपा० १ । ॐ रुंधिन्यै नमः रुंधिनीश्रीपा० २ । ॐ जंभिन्यै नमः जंभिनीश्रीपा० ३ । ॐ मोहिन्यै नमः मोहिनीश्रीपा० ४ । ॐ स्तंभिन्यै नमः स्तंभिनीश्रीपा० ५ ॥ इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततः पुनः षट्कोणोपरि आग्नेय्यादिक्रमेण ॐ डाकिन्यै नमः डाकिनीश्रीपादुकां पूज० १ । ॐ राकिन्यै नमः राकिनीश्रीपा० २ । ॐ लाकिन्यै नमः लाकिनीश्रीपा० ३ । ॐ काकिन्यै नमः काकिनीश्रीपा० ४ । ॐ शाकिन्यै नमः शाकिनीश्रीपा० ५ । ॐ हाकिन्यै नमः हाकिनीश्रीपा० ६ ॥ इति पूजयेत् । ततः षट्कोणे दक्षिणे पार्श्वे

१ स्वर्णे रूप्ये तथा ताम्रे भूर्जपत्रेऽथ दारुणि । लिखेद्गोरोचनारात्रिचन्दनागुरुकुंकुमैः ॥ यानि पंचाष्टषट्कोणाष्टपत्रशतपत्रकम् । सहस्रदलभूबिंबसंवीतद्वारसंयुतम् ॥ कैलासाचलमध्यस्थं पीठमेतद्विचिंतयेत् ॥

वार्तालीस्तंभनयन्त्रम्।




देवदत्त.

ॐ स्तंभिन्यै दक्षहस्तेन वरधरायै वामकरेण मुशलधरायै नमः स्तंभिनीश्रीपा० १। इति स्तंभिनीं पूजयेत् । ततः षट्कोणे वामपार्श्वे ॐ क्रोधिन्यै दक्षहस्तेन कपालधारिण्यै नमः क्रोधिनीश्रीपा० २। इति पूजयित्वा षट्कोणाग्रे देवीसुतं चंडं पूजयेत् ॥ तद्यथा—शूलं नागं च डमरुं कपालं दधतं करैः ॥ इन्द्रनीलनिभं नग्नं जटाभारविराजितम् ॥ १ ॥ इति ध्यात्वा 'ॐ देवीसुताय चंडोच्चंडाय नमः' इति पूजयेत् ३ । इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततः पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण ॐ वार्तार्ल्यै नमः वार्तालीश्रीपा० १ । ॐ वाराह्यै नमः वाराहीश्रीपा० २ । ॐ वराहमुख्यै नमः वराहमुखीश्रीपा० ३ । ॐ अंधिन्यै नमः अंधिनीश्रीपा० ४। ॐ रुंधिन्यै नमः रुंधिनीश्रीपा० ५ । ॐ जंभिन्यै नमः जंभिनीश्रीपा० ६ । ॐ मोहिन्यै नमः मोहिनीश्रीपा० ७। ॐ स्तंभिन्यै नमः। स्तंभिनीश्रीपा० ८ ॥ इत्यष्टौ पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततः शतपत्रे प्राचीक्रमेण रुद्रा एकादश वीरभद्रादयः। अर्का द्वादश धात्रादयः। वसवोऽष्टौ धरादयः । अश्विनौ नासत्यदस्रौ । इति त्रयस्त्रिंशद्देवा एकैकपत्रे त्रिकें पूज्याः । शेषैकपत्रे ॐ जंभिनीस्तंभिनीभ्यां नमः जंभिनीस्तंभिनीश्रीपा०। ॐ सिंहाय नमः १। ॐ महिषाय नमः २। इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति पंचमावरणम् ॥ ५ ॥ ततः सहस्रपत्रे 'क्रौं वाराह्यै नमः' इति मंत्रेण सहस्रवारं वाराहीमेव पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति षष्ठावरणम् ॥ ६ ॥ ततो भूपुराभ्यंतरे प्राचीद्वारदेशे ॐ वं वटुकाय नमः १ । दक्षिणे ॐ क्षं क्षेत्रपालाय नमः २। पश्चिमे ॐ यां योगिनीभ्यो नमः ३ उत्तरे ॐ गं गणपतये नमः ४ ॥ इति गणेशं पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति सप्तमावरणम् ॥ ७ ॥ ततो भूपुराद्बहिः इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयित्वा पुष्पांजलिं दद्यात्॥ इत्यावरणपूजां कृत्वा धूपादि नमस्कारांतं संपूज्य पूजांते बटुकादिभ्यो बलिमंत्रेण बलिं दद्यात् ॥ तद्यथा'—ॐ एह्येहि देवीपुत्र बटुकनाथ कपिलजटाभारभासुर त्रिनेत्र ज्वालामुख सर्वविघ्नान्नाशय नाशय सर्वोपचारसहितं बलिं गृह्ण गृह्ण स्वाहा' इति मंत्रेण बटवे बलिं दत्त्वा अंगुष्ठतर्जनीलग्नमुद्रां प्रदर्शयेत् ॥ १ ॥ 'ॐ क्षाँ क्षीं क्षूं क्षैं क्षौं

१ शतपत्रेषु संपूज्या रुद्रार्कौ वसवोऽश्विनौ। त्रिरेकैकास्यपत्रेषु जंभिनी स्तंभिनीयुता ॥

क्षः हुं स्थाने क्षेत्रपालेश सर्वकामं पूरय स्वाहा' इति मंत्रेण क्षेत्रपालाय बलिं दत्त्वा वामहस्तांगुष्ठानामिकालग्नक्षेत्रपालबलिमुद्रां प्रदर्शयेत् ॥ २ ॥ उर्द्ध्वं ब्रह्मांडतो वा दिवि गगनतले भूतले निष्कले वा पाताले वाऽनले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा ॥ क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन प्रीता देव्यः सदा नः शुभबलिविधिना पांतु वीरेन्द्रवंद्याः ॥ 'यां योगिनीभ्यः स्वाहा ' इति मंत्रेण योगिनीभ्यो बलिं दत्त्वा अनामामध्यमांगुष्ठलग्नयोगिनीबलिमुद्रां प्रदर्शयेत् ॥ ३ ॥ 'ॐ गां गीं गँ गँ गणपतये वरवरद सर्वजनं मे वशमानय सर्वोपचारसहितं बलिं गृह्णगृह्ण स्वाहा ' इति मंत्रेण गणेशाय बलिं दत्त्वा किंचिद्वक्रीकृतमध्यां गणनाथबलिमुद्रां प्रदर्शयेत् ॥ ४ ॥ इति बलिं दत्त्वा हस्तौ प्रक्षाल्याचामेत् ॥ ततः पुनर्देवीं ध्यात्वा जपं कुर्यात् ॥ अस्य पुरश्चरणं सप्तदशसहस्रजपः । तिलैर्बंधूककुसुमैर्मधुरान्वितैर्दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्रीं: प्रयोगान् साधयेत् ॥ तथा च-सप्तदशसहस्राणि प्रजपेत्तद्दशांशतः ॥ तिलैर्बंधूककुसुमैर्जुहुयान्मधुरान्वितैः ॥ ॥ १ ॥ एवं संपूज्य संस्तुत्य नत्वात्मन्युपसंहरेत् ॥ सिद्धिमंत्रः प्रकुर्वीत प्रयोगाञ्छिवभाषितान् ॥ २ ॥ हरिद्रया चन्दनेन लाक्षया गुरुणापि च ॥ पुरेण विविधैर्मांसैर्जुहुयादिष्टसिद्धये ॥ ३ ॥ हारिद्रमालया कुर्याज्जपं स्तंभनकर्मणि ॥ स्फाटिकैः पद्मबीजैश्च रुद्राक्षैः शुभकर्मणि ॥ ४ ॥ स्वर्णादिपत्रैः सुरया बंधूककुसुमैस्तिलैः ॥ वाराहीं तर्पयेत्सम्यक् कामसंपूर्तये नरः ॥ ५ ॥ चतुःशतं तु तापिच्छै[1] र्जुहुयात्स्तंभनेच्छया ॥ लाजचूर्णतिलैः कुर्यात्खरमेषासृजाऽन्वितैः ॥ ६ ॥ पिंडं मनोहरं तं तु पूजयेत्तर्पयेदपि ॥ सपत्नसदनं[2] सांगमेतस्मै विनिवेदयेत् ॥ ७ ॥ कुंडे पिंडं निधायामुं जुहुयात्तत्र चायुतम् ॥ एकविंशतिरात्रीषु लाजै रक्तसमान्वितैः ॥ ८ ॥ एवं कृते वैरिवृंदं भक्ष्यते योगिनीगणैः ॥ देवीयंत्रं समालिख्य नूत्ने कौलालखर्परे ॥ ९ ॥ वज्रमध्ये साध्यनाम लिखेत्कर्मसमन्वितम्[3] ॥ कृष्णपुष्पैः समभ्यर्च्य निक्षिपेदरिवेश्मनि ॥ १० ॥ रिपुमुच्चाटयेच्छीघ्रं स्थितं वर्षशतान्यपि ॥ वादित्रे यंत्रमालिख्य वादये

१ तापिच्छं नाम तमालपत्रम् । २ सपत्नसदनं शत्रुगृहमे तस्मै पिंडाय । ३ अमुकमुच्चाटयेतिक्रिया युतम् ।


त्समरांतरे ॥ ११ ॥ श्रुत्वा तद्रवसंत्रस्ताः पलायंते विरोधिनः ॥ पाषाणे लिखितं राज्यां पीतपुष्पेषु निःक्षिपेत् ॥ १२ ॥ संपूजितमधोवक्त्रं वा त्वं संस्तंभयेद्द्विषाम् ॥ तापकार्यग्निनिक्षिप्तं जले दोषप्रदं भवेत् ॥ १३ ॥ सौध्यर्क्षतरुगर्भस्थं शत्रूणां दुःखदायकम् ॥ किं बहूक्तेन सर्वेष्टं साधयेत्साधितं नृणाम् ॥ १४ ॥ इति चतुर्दशोत्तरशताक्षरीवार्तालीमंत्रप्रयोगः ॥

॥ श्रीगणेशाय नमः ॥ अथ मिश्रतरङ्गप्रारंभः ॥ तत्रादौ महिषमर्दिनीमंत्रप्रयोगः ॥ मंत्रो यथा शारदातिलके–महिषमर्दिनि स्वाहा ॥ इत्यष्टाक्षरमंत्रः। अस्य विधानम्--ॐअस्य श्रीमहिषमर्दिनीमंत्रस्य नारद ऋषिः। गायत्री छंदः। महिषमर्दिनी देवता। सर्वेष्टसिद्धये जपे विनियोगः ॥ ॐ नारदऋषये नमः शिरसि १। गायत्रीच्छंदसे नमो मुखे २। महिषमर्दिनीदेवतायै नमो हृदि ३। विनियोगाय नमः सर्वांगे ४ ॥ इति ऋष्यादिन्यासः ॥ महिषहिंसिके हुंफट् अंगुष्ठाभ्यां नमः १। महिषश (त्रो) त्त्रीशाङ्कि हुंफट् तर्जनीभ्यां नमः २। महिषं भीषय भीषय हुंफट् मध्यमाभ्यां नमः ३। महिषं हन हन देवि हुंफट् अनामिकाभ्यां नमः ४। महिषसूदिनि हुंफट् कनिष्ठिकाभ्यां नमः ५॥ इति करन्यासः ॥ महिषहिंसिके हुंफट् हृदयाय नमः १। महिषश (त्रो) त्त्रीशाङ्कि हुंफट् शिरसे स्वाहा २। महिषं भीषय भीषय हुंफट् शिखायै वषट् ३। महिषं हन हन देवि हुंफट् कवचाय हुम् ४। महिषसूदिनि हुंफट् अस्त्राय फट् ५॥ इति पंचांगन्यासः ॥ इति न्यासविधिं कृत्वा ध्यायेत् ॥ अथ ध्यानम् ॥ गारुडोपलसन्निभां मणिमौलिकुंडलमंडितां नौमि भालविलोचनां महिषोत्तमांगनिषेदुषीम् ॥ चक्रशंखकृपाणखेटकबाणकार्मुकशूलकांस्तर्जनीमपि बिभ्रतीं निजबाहुभिः शशिशेखराम् ॥ १ ॥ एवं ध्यात्वा सर्वतोभद्रमंडले 'मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति पीठदेवताः संपूज्य पीठशक्तीः पूजयेत् ॥ तद्यथा पूर्वादिक्रमेण–

१–राज्या हरिद्रया। २ पाषाणे लिखित्वाऽग्नौ निक्षिप्तं तापकरि। ३ साध्यस्य यजन्मनक्षत्रं तद्वृक्षमध्ये क्षिप्तं तेषां दुःखदं तच्च निर्णयप्रकणे ज्ञेयम्। ४ विश्वसारतंत्रे प्रणवाद्यां जपेद्विद्यां मायाद्यां वा जपेत्सुधीः ॥ वधूबीजादिकां वापि कमलाद्यां जपेत्तथा ॥ सर्वकालेषु सर्वत्र कामाद्यां प्रजपेत्सुधीः ॥ वाग्भवाद्यां जपेत्तां तु देवीं वाक्यविशुद्धये ॥ इति नवाक्षरो मंत्रः॥ विनाबीजैर्महाविद्या निर्वीर्या परिकीर्तिता ॥ पुटिता बीजयुग्मेन मुखे युग्मकदेशके ॥ दशाक्षरीसमा नास्ति विद्या त्रिभुवनेश्वरी। प्रणवं च तथा माया भवेद्विद्या पुनर्दश ॥ कामं प्रणवमित्युक्ता भवेद्विद्या पुनर्दश ॥ इति विशेषः। ५ पंचांगानि मनोर्यत्र तत्र नेत्रमनु त्यजेत्।

ॐ जयायै नमः १ । ॐ विजयायै नमः २ । ॐ अजितायै नमः ३ । ॐ अपराजितायै नमः ४ । ॐ नित्यायै नमः ५ । ॐ विलासिन्यै नमः ६ । ॐ दोग्ध्र्यै नमः ७ । ॐ अघोरायै नमः ८ । मध्ये ॐ मंगलायै नमः ९ ॥ इति पीठशक्तीः संपूज्य स्वर्णादिनिर्मितं यंत्रमग्न्युत्तारणपूर्वकं 'ह्रीं आधारशक्तये नमः' इति पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य तत्र प्राणप्रतिष्ठां च कृत्वा पनर्ध्यात्वा मूलेन मूर्तिं प्रकल्प्य आवाहनादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तत्र क्रमः--षट्कोणकेसरेषु अग्निकोणे–महिषहिंसिके हुं फट् हृदयाय नमः १। निर्ऋतिकोणे–माहिषश (त्रो) त्वीशाङ्क्षि हुं फट् शिरसे स्वाहा २ । वायुकोणे–महिषं भीषय भीषय हुं फट् शिखायै वषट् ३ । ईशानकोणे–महिषं हन हन देवि हुंफट् कवचायै हुम् ४। देवीपश्चिमे–महिषसूदिनि हुंफट् अस्त्राय फट् ५ ॥ इति पंचांगानि पूजयेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततोऽष्टदलेषु पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य पूर्वादिक्रमेण--ॐ आं दुर्गायै नमः । दुर्गाश्रीपादुकां पूजयामि तर्पयामि नमः १ ॥ इति सर्वत्र ॥ ॐ ईं वरवर्णिन्यै नमः । वरवर्णिनीश्रीपा० २ । ॐ ऊं आर्य्यायै नमः ।

महिषमर्दिनीपूजनयन्त्रम्।



आर्य्याश्रीपा० ३ । ॐ ॠं कनकप्रभायै नमः । कनकप्रभाश्रीपा० ४। ॐ ॡं कृत्तिकायै नमः । कृत्तिकाश्रीपादु० ५ । ॐ ऐं अभयप्रदायै नमः । अभयप्रदाश्रीपा० ६ । ॐ औं कन्यायै नमः । कन्याश्रीपा० ७ । ॐ अः सरूपायै नमः । सुरूपाश्रीपा० ८ ॥

इत्यष्टौ शक्तीः पूजयेत् ॥ इति द्वितीयावरणम् ॥ २ ॥ पत्राग्रेषु पूर्वादिक्रमेण । यं चक्राय नमः १ । रं शंखाय नमः २ । लं खड्गाय नमः ३ । वं खेटकाय नमः ४ । शं बाणाय नमः ५ । षं धनुषे नमः ६ । सं शूलाय नमः ७ । हं कपालाय नमः ८ ॥ इत्यस्त्राणि पूजयेत् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततो भूपुरे इन्द्रादीन् वज्रादींश्च पूजयेत् । इत्यावरणपूजां कृत्वा धूपादिनीराजनांतं संपूज्य जपं कुर्य्यात् ॥ अस्य पुरश्चरणमष्टलक्षजपः ॥ तत्सहस्रं होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात् । एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथाच–अष्टलक्षं जपेन्मंत्रं तत्सहस्रं तिलैः शुभैः ॥ वशयेत्तिल होमेन नरान्नरपतीनपि ॥ १ ॥ सिद्धार्थैर्जुहुयान्मंत्री रोगान्मुच्येत तत्क्षणात् ॥ पद्मैर्हुत्वा जयेच्छत्रून्दूर्वाभिः शांतिमाप्नुयात् ॥ २ ॥ पलाशकुसुमैर्वृष्टिर्धान्यैर्धान्यश्रियं व्रजेत ॥ काकपक्षैः कृतो होमो द्वेषं वितनुते नृणाम् ॥ ३ ॥ मरीच होमान्मरणं रिपुराप्नोति सर्वथा ॥ क्षुद्रादिचोरभूताद्यान्ध्यात्वा देवीं विनाशयेत् ॥ ४ ॥ इति माहिषमर्दिनीमंत्रप्रयोगः ॥


॥ श्रीगणेशाय नमः ॥ अथ महिषमर्दिनीकवचप्रारंभः ॥ अथ वक्ष्ये महादेवीकवचं सर्वकामदम् ॥ यस्य प्रसादमासाद्य भवेत्साक्षात्सदाशिवः ॥ १ ॥ ॐ कारं पूर्वमुच्चार्य मंत्री मंत्रस्य सिद्धये ॥ प्रपठेत्कवचं नित्यं मंत्रवर्णस्य सिद्धये ॥ २ ॥ ॐ महिषमर्दिन्याः कवचस्य भगवान्महाकाल ऋषिः । अनुष्टुप्छंदः । आद्या शक्तिः । महिषमर्दिनी देवता । चतुर्वर्गफलप्राप्तये जपे विनियोगः ॥ ३ ॥ क्लीं पातु मस्तके देवी कामिनी कामदायिनी ॥ मकारे पातु मां देवी चक्षुर्युग्मं महेश्वरी ॥ ४ ॥ हिकारे पातु वदने हिंगुलासुरनायिका ॥ षकारे पातु मां श्वेता जिह्वायां स्वपराजिता ॥ ५ ॥ मकारे पातु मां देवी मर्दिनी सुरनायिका ॥ दिकारे पातु मां देवी सावित्री कालनाशिनी ॥ ६ ॥ निकारे पातु मां नित्या हृदये वासपार्श्वयोः ॥ नाभौ लिंगे गुदे कंठे कर्णयोः पार्श्वयोस्तथा ॥ ७ ॥ शिखायां कवचे पादे मुखजंघायुगे तथा ॥ सर्वांगे पातु मां स्वाहा सर्वशक्तिसमन्विता ॥ ८ ॥ कामाद्या पातु मां स्वाहा सर्वांगे पातु मर्दिनी ॥ दशाक्षरा महाविद्या सर्वांगे पातु मर्दिनी ॥ ९ ॥ मर्दिनी पातु सततं मर्दिनी रक्षयेत्सदा ॥ राजस्थाने तथा दुर्गे सिंहव्याघ्र

भयादिषु ॥ १० ॥ श्मशाने प्रांतरे दुर्गे नौकायां वह्निमध्यतः ॥ दुर्गा पातु सदा देवी आर्या पातु सदाशिवा ॥ ११ ॥ प्रभा पातु महे
शानी गगने पातु सर्वदा ॥ कृत्तिका पातु सततमभया सर्वदाऽवतु ॥ १२ ॥ प्रभा पांतु महामाया मांयां पातु सदा मम ॥ नंदिनी
पातु सततं सुप्रभा सर्वदाऽवतु ॥ १३ ॥ विजया पातु सर्वत्र देव्यंगे नव शक्तयः ॥ शक्तयः पातु सततं मुद्राः पांतु सदा मम ॥ १४ ॥
जया पातु सदा सूक्ष्मा विशुद्धा पातु सर्वदा ॥ डाकिन्यः पांतु सततं सिद्धाः पांतु सदा मम ॥ १५ ॥ सर्वत्र सर्वदा पातु देवी महिष
मर्दिनी ॥ इति ते कथितं दिव्यं कवचं सर्वकामदम् ॥ १६ ॥ यत्र तत्र न वक्तव्यं गोपितव्यं प्रयत्नतः ॥ गोपितं सर्वतंत्रेषु विश्वसारे
प्रकाशितम् ॥ १७ ॥ सर्वत्र सुलभा विद्या कवचं दुर्लभं महत् ॥ शठाय भक्तिहीनाय निंदकाय महेश्वरि ॥ १८ ॥ न्यूनांगे ह्यति
रिक्तांगे क्रूरे मिथ्यातिभाषिणि ॥ न स्तवं दर्शयेद्दिव्यं कवचं सुरदुर्लभम् ॥ १९ ॥ यत्र तत्र न न वक्तव्यं शंकरेण च भाषितम् ॥
दत्त्वा तेभ्यो महेशानि नश्यंति सिद्धयः क्रमात् ॥ २० ॥ मंत्राः पराङ्मुखा यांति शापं दत्त्वा सुदारुणम् ॥ अशुभं च भवेत्तस्य
तस्माद्यत्नेन गोपयेत् ॥ २१ ॥ गोरोचनाकुंकुमेन भूर्जपत्रे महेश्वरि ॥ लिखित्वा शुभयोगेन ब्राह्मेंद्रे वैधृतौ तथा ॥ २२ ॥ आयु
ष्मत्सिद्धियोगे च बालवे कौलवेऽपि वा ॥ वणिजे श्रवणायां च रेवत्यां वा पुनर्वसौ ॥ २३ ॥ उत्तरात्रय्योगेषु तथा पूर्वात्रयेषु च ॥
अश्विन्यां वाऽथ रोहिण्यां तृतीयानवमीतिथौ ॥ २४ ॥ अष्टम्यां वा चतुर्दश्यां षष्ठ्यां वा पंचमीतिथौ ॥ अमायां वा पूर्णिमायां
निशायां प्रांतरे तथा ॥ २५ ॥ एकालिंगे श्मशाने च शून्यागारे शिवालये ॥ गुरुणा वैष्णवैर्वापि स्वयंभूकुसुमैस्तथा ॥ २६ ॥
शुक्लैर्वा रक्तकुसुमैश्चंदनै रक्तसंयुतैः ॥ शवांगारचितावस्त्रे लिखित्वा धारयेत्पुनः ॥ २७ ॥ तस्य सर्वार्थसिद्धिः स्याच्छंकरेणैव भाषि
तम् ॥ कुमारीं पूजयित्वा च देवीसूक्तं निवेद्य च ॥ २८ ॥ पठित्वा पूजयेद्विप्रान्धनवान्वेदपारगान् ॥ आखेटकमुपाख्यानं कुमार्यैव
दिनत्रयम् ॥ २९ ॥ तदा धरेन्महारक्षां कवचं सर्वकामदम् ॥ नाधयो व्याधयस्तस्य दुःखशोकैर्भयं क्वचित् ॥ ३० ॥
वादी मूको भवेद्दृष्ट्वा नृपतिः सेवकायते ॥ मासमेकं पठेद्यस्तु प्रत्यहं नियतः शुचिः ॥ ३१ ॥ दिवा भवेद्धविष्याशी

रात्रौ शक्तिपरायणः ॥ षट्सहस्रप्रमाणेन प्रत्यहं प्रजपेत्सदा ॥ ३२ ॥ षण्मासैर्वा त्रिभिर्मासैर्विद्वरो भवति ध्रुवम् ॥ अपुत्रो लभते पुत्रं निर्धनो धनमाप्नुयात् ॥ ३३ ॥ अरोगी बलवांश्चैव नृपतिर्दासतामियात् ॥ रजस्वलाभगे नित्यं जपेद्विद्यां समाहितः ॥ एवं यः कुरुते धीमान्स एव श्रीसदाशिवः ॥ ३४ ॥ इति विश्वसारतंत्रे महिषमर्दिन्याः कवचं समाप्तम् ॥ श्रीगणेशाय नमः ॥ अथ रेणुकाशबरीमंत्रप्रयोगः ॥ मंत्रमहोदधौ मंत्रो यथा–ॐ श्रीं ह्रीं क्रों ऐं ॥ इति पंचाक्षरो मंत्रः ॥ अस्य विधानम्–अस्य रेणुकाशबरी मंत्रस्य भैरव ऋषिः । पंक्तिश्छंदः । रेणुकाशबरी देवता । ममाभीष्टसिद्ध्यर्थे जपे विनियोगः॥ ॐ भैरवऋषये नमः शिरसि १ । पंक्तिच्छंदसे नमो मुखे २ । रेणुकाशबरीदेवतायै नमो हृदि ३ । विनियोगाय नमः सर्वाङ्गे ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ नमः अंगुष्ठाभ्यां नमः १ । श्रींनमस्तर्जनीभ्यां नमः २ । ह्रीं नमो मध्यमाभ्यां नमः ३ । क्रों नमः अनामिकाभ्यां नमः ४ । ऐं नमः कनिष्ठिकाभ्यां नमः ५ । ॐ श्रीं ह्रीं क्रों ऐं करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ नमो हृदयाय नमः १ । श्रीं नमः शिरसे स्वाहा २ । ह्रीं नमः शिखायै वषट् ३ । क्रों नमः कवचाय हुं ४ । ऐं नमः नेत्रत्रयाय वौषट् ५ । ॐ श्रीं ह्रीं क्रों ऐं अस्त्राय फट् ६ ॥ इति हृदयादि षडंगन्यासः ॥ ॐ हेमाद्रिसानावुद्याने नानाद्रुममनोहरे ॥ रत्नमंडपमध्यस्थवेदिकायां स्थितां स्मरेत् ॥ इत्युद्यानं स्मृत्वा तत्र ध्यायेत् ॥ ॐ गुंजाफलाकल्पितहाररम्यां श्रुत्योः शिखंडं शिखिनो वहंतीम् । कोदंडबाणौ दधतीं कराभ्यां कटिस्थवल्कां शबरीं स्मरामि ॥ १ ॥ इति ध्यायेत् । ततः सर्वतोभद्रमंडले आधारशक्त्यादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ आं आधारशक्त्यादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति पीठदेवताः संपूज्य नव पीठशक्तीः पूजयेत् ॥ तथा च पर्वादिक्रमेण ॐ जयायै नमः १ । ॐ विजयायै नमः २ । ॐ अजितायै नमः ३ । ॐ अपराजितायै नमः ४ । ॐ नित्यायै नमः ५ । ॐ विलासिन्यै नमः ६ । ॐ दोग्ध्र्यै नमः ७ । ॐ अघोरायै नमः ८ । मध्ये ॐ मंगलायै नमः ९ ॥ इति पूजयेत् ॥ ततः स्वर्णादिनिर्मितं यंत्रं मूर्तिं वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण प्रोञ्छ्य 'ॐ सर्वबुद्धिप्रदे वर्णनीये सर्वसिद्धिप्रदे डाकिनीये ॐ रेणुकाशबरि एह्येहि नमः'

इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात्॥तद्यथा–पुष्पांजलिमादाय–ॐसंविन्मये परे देवि परामृतरसप्रिये॥अनुज्ञां देहि मे मातः परिवारार्चनाय ते॥

रेणुकाशबरीपूजनयन्त्रम् ।



इति पठित्वा पुष्पांजलिं च दत्त्वा देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् । ततः षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च ॐ हृदयाय नमः । हृदयश्रीपादुकां पूजयामि तर्पयामि नमः १ । इति सर्वत्र॥ श्रीं शिरसे स्वाहा । शिरःश्रीपा० २ । ह्रीं शिखायै वषट् । शिखाश्रीपा० ३ । क्रीं कवचाय हुम् । कवचश्रीपा० ४ । ऐं नेत्रत्रयाय वौषट् । नेत्रत्रयश्रीपा० ५ । ॐ श्रींह्रींक्रींऐं अस्त्राय फट् । अस्त्रश्रीपा० ६ । इति षडंगानि पूजयेत् ॥ ततः पुष्पांजलिमादाय मूलमुच्चार्य्य–ॐ अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ १ ॥ इति पठित्वा पुष्पांजलिं च दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततोऽष्टदलेषु पूज्यपूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण ॐ हुंकार्य्यै नमः । हुंकारीश्रीपा० १ । ॐ खेचर्य्यै नमः । खेचरीश्रीपा० २ । ॐ चंडास्यायै नमः । चंडास्याश्रीपा० ३ । ॐ छोदिन्यै नमः । छादनीश्रीपा० ४ । ॐ क्षेपणायै नमः । क्षेपणाश्रीपा० ५ । ॐ स्त्रियै नमः । स्त्रीश्रीपा० ६ । ॐ हुंकार्य्यै नमः । हुंकारीश्रीपा० ७ । ॐ क्षेमकार्य्यै नमः । क्षेमकारीश्रीपा० ८ ॥ इत्यष्टौ शक्तीः संपूज्य पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततो भूपुरे पूर्वादि


क्रमेण इन्द्रादिदशदिक्पालान् वज्राद्यायुधानि च पूजयेत् ॥ इत्यावरणपूजां कृत्वा धूपादिनमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्चरणं पंचलक्षजपः । बिल्वकाष्ठदीपाग्नौ बिल्वफलैर्दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च–ध्यात्वैवं प्रजपेल्लक्षपंचकं तद्दशांशतः ॥ फलैर्बैल्वैः प्रजुहुयात्तत्काष्ठैरेधितेऽनले ॥ १ ॥ एवं सिद्धं मनुं सम्यक्कृत्वा कर्माणि योजयेत् ॥ मल्लीपुष्पैर्जना वश्या इक्षुदंडैर्धनाक्षयः ॥ २ ॥ पंचगव्यैर्धेनवः स्युरशोककुसुमैः सुताः ॥ इन्दीवरैः कृते होमे नृपपत्नी वशंवदा ॥ ३ ॥ अन्नास्तिरन्नैः सकलं मधूकैर्वांछितं भवेत् ॥ प्रोदिता शाबरी विद्या कलौ त्वरितसिद्धिदा ॥ ४ ॥ इति रेणुकाशाबरीपंचाक्षरमंत्रप्रयोगः ॥


श्रीगणेशायनमः ॥ अथान्नपूर्णामंत्रप्रयोगो मंत्रमहोदधौ–अन्नपूर्णेश्वरीमंत्रं वक्ष्येऽभीष्टप्रदायकम् ॥ कुबेरो यामुपास्याशु लब्धवान्निधिनाथताम् ॥ शंभोः सख्यं दिगीशत्वं कैलासाधीशतामपि ॥ १ ॥ मंत्रो यथा–ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि अन्नपूर्णे स्वाहा ॥ इति विंशत्यक्षरो मंत्रः ॥ अस्य विधानम्–अस्यान्नपूर्णामंत्रस्य द्रुहिण[1] ऋषिः । कृतिश्छंदः । अन्नपूर्णेशी देवता । ममाखिलसिद्ध्यर्थं जपे विनियोगः॥ ॐ द्रुहिणऋषये नमः शिरसि १ । कृतिच्छंदसे नमः मुखे २ । अन्नपूर्णादेवतायै नमो हृदि३ । विनियोगाय नमः सर्वाङ्गे ४ ॥ इति ऋष्यादिन्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यां नमः १ । ॐ ह्रीं तर्जनीभ्यां नमः २ । ॐ ह्रूं मध्यमाभ्यां नमः ३ । ॐ ह्रैं अनामिकाभ्यां नमः ४ । ॐ ह्रौं कनिष्ठिकाभ्यां नमः ॐ ह्रः करतलकरपृष्ठाभ्यां नमः ६ ॥ इति करन्यासः ॥ ॐ ह्रां हृदयाय नमः १ । ॐ ह्रीं शिरसे स्वाहा २ । ॐ ह्रूं शिखायै वषट् ३ । ॐ ह्रैं कवचाय हुं ४ । ॐ ह्रौं नेत्रत्रयाय वौषट् ५ ॥ ॐ ह्रः अस्त्राय फट् ६ ॥ इति हृदयादिषडंगन्यासः ॥ ॐ नमो मुखे १ । ह्रीं नमो दक्षनासापुटे २ । श्रीं नमो वामनासापुटे ३ । क्लीं नमो दक्षनेत्रे ४ । नमो नमो वामनेत्रे ५ । भगवति नमो दक्षिणकर्णे ६ । माहेश्वरि नमो वामकर्णे ७ । अन्नपूर्णे नमो लिंगे ८ ।

[1] द्रुहिणो ब्रह्मा ।

स्वाहा नमो गुदे ९ ॥ इति वर्णन्यासः ॥ इति न्यासं कृत्वा ध्यायेत् ॥ तप्तस्वर्णनिभा शशांकमुकुटा रत्नप्रभाभासुरा नानावस्त्रविराजिता त्रिनयना भूमीरमाभ्यां युता ॥ दर्वीं हाटकभाजनं च दधती रम्योच्चपीनस्तनी नित्यं तं शिवमाकलय्य मुदिता ध्येयान्नपूर्णेश्वरी ॥ ॥ १ ॥ इति ध्यायेत्॥ ततः पीठादौ रचिते सर्वतोभद्रमंडले मंडूकादिपरतत्त्वांतपीठदेवताः संस्थाप्य 'ॐ मं मंडूकादिपरतत्त्वांतपीठदेवताभ्यो नमः' इति पीठदेवताः संपूज्य नवपीठशक्तीः पूजयेत् ॥तद्यथा पूर्वाद्यष्टसु दिक्षु–ॐ जयायै नमः १ । ॐ विजयायै नमः २ । ॐ अजितायै नमः ३ । ॐ अपराजितायै नमः ४ । ॐ नित्यायै नमः ५ । ॐ विलासिन्यै नमः ६ । ॐ दोग्ध्र्यै नमः ७ । ॐ अघोरायै नमः ८ । मध्ये ॐ मंगलायै नमः ९ ॥ इति पीठशक्तीः पूजयेत् ॥ ततः स्वर्णादिनिर्मितपत्रे त्रिकोणं विलिख्य तदुपरि षट्कोणचतुर्दलाष्टदलं च तदुपरि षोडशदलं तदुपरि भूपुरेण युतं यंत्रं कृत्वा ताम्रपात्रे निधाय घृतेनाभ्यज्य तदुपरि दुग्धधारां जलधारां च दत्त्वा स्वच्छवस्त्रेण प्रोञ्छ्य 'ॐ ह्रीं अन्नपूर्णे पद्मासनाय नमः ॥' इति मंत्रेण पुष्पाद्यासनं दत्त्वा पीठमध्ये संस्थाप्य प्रतिष्ठां च कृत्वा मूलेन मूर्तिं प्रकल्प्य पाद्यादिपुष्पांतैरुपचारैः संपूज्य देव्याज्ञां गृहीत्वा आवरणपूजां कुर्यात् ॥ तद्यथा पुष्पांजलिमादाय--संविन्मये परे देवि परामृतरसप्रिये ॥ अनुज्ञां देहि देवेशि परिवारार्चनाय मे ॥ १ ॥ इति पठित्वा पुष्पांजलिं दद्यात् ॥ इत्याज्ञां गृहीत्वा त्रिकोणे आग्नेय्यादिक्रमेण अग्निकोणे ॐ ह्रौं नमः शिवाय । शिवश्रीपादुकां पूजयामि तर्पयामि नमः १ । इति मंत्रेण शिवं पूजयेत् ॥ वायुकोणे ॐ नमो भगवते वराहरूपाय भूर्भुवःस्वःपतये भूपतित्वं मे देहि दापय स्वाहा । वराहश्रीपा० २ । इति मंत्रेण वराहं पूजयेत् ॥ ईशानकोणे ॐ नमो नारायणाय । नारायणश्रीपा० ३ । इति मंत्रेण नारायणं पूजयेत् ॥ इति संपूज्य पुष्पांजलिं गृहीत्वा– अभीष्टसिद्धिं मे देहि शरणागतवत्सले ॥ भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥ इति पठित्वा पुष्पांजलिं दत्त्वा पूजितास्तर्पिताः संतु इति वदेत् ॥ इति प्रथमावरणम् ॥ १ ॥ ततः षट्कोणकेसरेषु आग्नेय्यादिचतुर्दिक्षु मध्ये दिक्षु च--ॐ ह्रां हृदयाय नमः । हृदयश्रीपा० १ । ॐ ह्रीं शिरसे स्वाहा । शिरःश्रीपा० २ । ह्रूं शिखायै वषट् । शिखाश्रीपा० ३ । ॐ ह्रैं कवचाय हुम् ।

अन्नपूर्णापूजनयन्त्रम् ।





॥५८९॥

कवचश्रीपा० ४ । ॐ ह्रौं नेत्रत्राय वौषट् । नेत्रत्रयश्रीपा० ५ । ॐ ह्रः अस्त्राय फट् । अस्त्रश्रीपा० ६ ॥ इति षडंगानि पूजयेत् ॥ देवीवामभागे ॐ ग्लौं अन्नं मह्यन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा । ग्लौं पृथिव्यै नमः । पृथिवीश्रीपा० ७ । इति मंत्रेण भूमिं पूजयेत् ॥ देवीदक्षिणतः ॐ श्रीं अन्नं मह्यन्नं मे देह्यन्नाधिपतये ममान्नं प्रदापय स्वाहा । श्रीं श्रीलक्ष्म्यै नमः । लक्ष्मीश्रीपा० ८ । इति मंत्रेण लक्ष्मीं संपूज्य पुष्पांजलिं दद्यात् ॥ इति द्वितीयावरणम् ॥ २ ॥ ततश्चतुर्दले पूज्य पूजकयोरंतरालं प्राची तदनुसारेण अन्या दिशः प्रकल्प्य प्राचीक्रमेण चतुर्दिक्षु ॐ अपरायै नमः । अपराश्रीपा० १ । ह्रीं भुवनेश्वर्य्यै नमः । भुवनेश्वरीश्रीपादुकां० २ । श्रीं कमलायै नमः । कमलाश्रीपा० ३ । क्लीं सुभगायै नमः । सुभगाश्रीपा० ४ ॥ इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति तृतीयावरणम् ॥ ३ ॥ ततोऽष्टदले प्राचीक्रमेण ॐ ब्राह्म्यै नमः । ब्राह्मीश्रीपा० १ । ॐ माहेश्वर्य्यै नमः । माहेश्वरीश्रीपा० २ । ॐ कौमार्य्यै नमः । कौमारीश्रीपा० ३ । ॐ वैष्णव्यै नमः । वैष्णवीश्रीपा० ४ । ॐ वाराह्यै नमः । वाराहीश्रीपा० ५ । ॐ इन्द्राण्यै नमः । इन्द्राणीश्रीपा० ६ । ॐ चामुंडायै नमः । चामुंडाश्रीपा० ७ । ॐ महालक्ष्म्यै नमः । महालक्ष्मीश्रीपा० ८ ॥ इत्यष्टदेवीः पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति चतुर्थावरणम् ॥ ४ ॥ ततः षोडशदले प्राचीक्रमेण ॐ अं अमृतायै नमः । अमृताश्रीपा० १ । ॐ मां मानदायै नमः। मानदाश्रीपा० २ । ॐ तुं तुष्ट्यै नमः । तुष्टिश्रीपा० ३ । ॐ पुं पुष्ट्यै नमः । पुष्टिश्रीपा० ४ । ॐ प्रीं प्रीत्यै नमः । प्रीतिश्रीपा० ५ । ॐ रं रत्यै नमः । रतिश्रीपा० ६ । ॐ ह्रीं ह्रियै नमः । ह्रीश्रीपा० ७ । ॐ श्रीं श्रियै नमः । श्रीश्रीपा० ८ । ॐ स्वां स्वधायै नमः । स्वधाश्रीपा० ९ । ॐ स्वां स्वाहायै नमः । स्वाहाश्रीपा० । १० । ॐ ज्यों ज्योत्स्नायै नमः । ज्योत्स्नाश्रीपा० ११ । ॐ हं हेमवत्यै नमः । हेमवतीश्रीपा० १२ । ॐ छां छायायै नमः । छायाश्रीपा० १३ । ॐ पूं पूर्णिमायै नमः । पूर्णिमाश्रीपा० १४ । ॐ निं नित्यायै नमः । नित्याश्रीपा० १५ । ॐ अं अमावस्यायै नमः । अमावस्याश्रीपा० १६ ॥ इति पूजयित्वा पुष्पांजलिं दद्यात् ॥ इति पंचमावरणम् ॥ ५ ॥ ततो भूपुराद्बहिः पूर्वादिक्रमेण इन्द्रादिदश

दिक्पालन् वज्राद्यायुधानि च संपूज्य पुष्पांजलिं दद्यात् ॥ इत्यावरणपूजां कृत्वा धूपादि नमस्कारांतं संपूज्य जपं कुर्यात् ॥ अस्य पुरश्च रणं लक्षजपः । घृतमिश्रितचरुणा दशांशतो होमः । तत्तद्दशांशेन तर्पणमार्जनब्राह्मणभोजनानि कुर्यात् ॥ एवं कृते मंत्रः सिद्धो भवति । सिद्धे मंत्रे मंत्री प्रयोगान् साधयेत् ॥ तथा च–लक्षं जपोऽयुतं होमो घृतयुक्तस्य वै चरोः ॥ जयादिनवशक्त्याढ्ये पीठे पूजा समी रिता ॥ १ ॥ इत्थं जपादिभिः सिद्धे मंत्रेऽस्मिन्धनसंचयैः ॥ कुबेरसदृशो मंत्री जायते जनवंदितः ॥ २ ॥ इति विंशत्यक्षरान्नपूर्णामंत्र प्रयोगः ॥ मंत्रांतरं मंत्रमहोदधौ । मंत्रो यथा–ॐ ह्रीं नमो भगवति माहेश्वर्यन्नपूर्णे स्वाहा ॥ इत्यष्टादशाक्षरो मंत्रः ॥ द्विनेत्रवेदवेदाब्धि नेत्रार्णैरंगमीरितम् ॥ इति प्रथमो मंत्रः ॥ अन्यः–ॐ ह्रीं श्रीं क्लीं नमो भगवति माहेश्वरि ममाभिमतमन्नं देहि देह्यन्नपूर्णे स्वाहा ॥ इत्येकत्रिंशदक्षरो मंत्रः ॥ युगांगवेदसप्ताब्धिषडर्णैरंगकल्पना ॥ इति द्वितीयो मंत्रः ॥ अन्यः--ॐ श्रीं ह्रीं नमो भगवति प्रसन्नपारिजातेश्वर्यन्नपूर्णे स्वाहा ॥ इति चतुर्विंशत्यक्षरो मंत्रः ॥ रामाक्षिवेदनिधिभिर्वेदद्व्यर्णैः षडंगकम् ॥ इति तृतीयो मंत्रः ॥ अन्यश्च–ॐ श्रीं ह्रीं नमो भगवति माहेश्वरि प्रसन्नवरदेऽन्नपूर्णे स्वाहा ॥ इति पंचविंशत्यक्षरो मंत्रः ॥ स्याद्रामषड्युगषड्वेदनेत्रार्णैस्तत्षडंगकम् ॥ इति चतुर्थो मंत्रः ॥ एषां चतुर्णां मंत्राणामन्यत्सर्वं तु पूर्ववत् ॥ इत्यन्नपूर्णामंत्रभेदाः ॥ ॥ श्रीगणेशाय नमः ॥ अथान्नपूर्णाकवचप्रारंभः ॥ देव्युवाच ॥ भवता त्वन्नपूर्णाया या या विद्याः सुदुर्लभाः ॥ कृपया कथिताः सर्वाः श्रुताश्चाधिगता मया ॥ १ ॥ सांप्रतं श्रोतुमिच्छामि कवचं मंत्रविग्रहम् ॥ ईश्वर उवाच ॥ शृणु पार्वति वक्ष्यामि सावधानावधारय ॥ २ ॥ ब्रह्मविद्यास्वरूपं च महदैश्वर्यदायकम् ॥ पठनाद्धारणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत् ॥ ३ ॥ त्रैलोक्यरक्षणस्यास्य कवचस्य ऋषिः शिवः ॥ छंदो विराट् देवता स्यादन्नपूर्णा समृद्धिदा ॥ ४ ॥ धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥ ह्रीं नमो भगवत्यंते माहेश्वरिपदं ततः ॥ ५ ॥ अन्नपूर्णे ततः स्वाहा चैषा सप्तदशाक्षरी ॥ पातु मामन्नपूर्णा सा या ख्याता भुवनत्रये ॥ ६ ॥ विमाया प्रणवाद्यैषा तथा सप्तदशाक्षरी ॥ पात्वन्नपूर्णा सर्वांगे रत्नकुंभान्नपात्रदा ॥ ७ ॥ श्रीबीजाद्या तथैवैषा द्विरंध्रार्णा तथा मुखम् ॥ प्रण

वाग्या भ्रुवौ पातु कंठं वाग्बीजपूर्विका ॥ ८ ॥ कामबीजादिका चैषा हृदयं तु महेश्वरी ॥ ऐं श्रीं ह्रीं च नमोंऽते तु भगवतीपदं ततः ॥
॥ ९ ॥ माहेश्वरी पदं चान्नपूर्णे स्वाहेति पातु मे ॥ नाभिमेकार्णविंशार्णा पायान्माहेश्वरी सदा ॥ १० ॥ तारं माया रमा कामः
षोडशार्णा ततः परम् ॥ शिरःस्था सर्वदा पातु विंशत्यर्णात्मिका परा ॥ ११ ॥ अन्नपूर्णा महाविद्या ह्रीं पातु भुवनेश्वरी ॥ शिरः
श्रीं ह्रीं तथा क्लीं च त्रिपुटा पातु मे गुदम् ॥ १२ ॥ षड्दीर्घभाजा बीजेन षडंगानि पुनंतु माम् ॥ इन्द्रो मां पातु पूर्वं च वह्निकोणे
ऽनलोऽवतु ॥ १३ ॥ यमो मां दक्षिणे पातु नैर्ऋत्यां निर्ऋतिश्च माम् ॥ पश्चिमे वरुणः पातु वायव्यां पवनोऽवतु ॥ १४ ॥ कुबेरश्चो
त्तरे पातु चैशान्यां शंकरोऽवतु ॥ ऊर्द्ध्वाधः पातु सततं ब्रह्मानंतो यथाक्रमात् ॥ १५ ॥ पांतु वज्राद्यायुधानि दशदिक्षु यथा
क्रमम् ॥ इति ते कथितं पुण्यं त्रैलोक्यरक्षणं परम् ॥ १६ ॥ यद्धृत्वा पठनाद्देवाः सर्वैश्वर्यमवाप्नुयुः ॥ ब्रह्मा विष्णुश्च रुद्रश्च धारणा
त्पठनाद्यतः ॥ १७ ॥ सृजत्यवति हंत्येव कल्पे कल्पे पृथक् पृथक् ॥ पुष्पांजल्यष्टकं देव्यै मूलेनैव समर्पयेत् ॥ १८ ॥ कवचस्यास्य
पठनात्पूजायाः फलमाप्नुयात् ॥ वाणी वक्त्रे वसेत्तस्य सत्यं सत्यं न संशयः ॥ १९ ॥ अष्टोत्तरशतं चास्य पुरश्चर्याविधिः स्मृतः ॥
भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि ॥ २० ॥ कंठे वा दक्षिणे बाहौ सोऽपि पुण्यवतां वरः ॥ सर्वाण्यस्त्राणि शस्त्राणि तद्गात्रं
प्राप्य पार्वति ॥ माल्यानि कुसुमानीव सुखदानि भवंति हि ॥ २१ ॥ इति भैरवतंत्रेऽन्नपूर्णाकवचं समाप्तम् ॥ अथान्नपूर्णास्तोत्र
प्रारंभः ॥ ॐ नमः कल्याणदे देवि नमः शंकरवल्लभे ॥ नमो मुक्तिप्रदे देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥ १ ॥ नमो मायागृहीतांगि नमः
शंकरवल्लभे ॥ माहेश्वरि नमस्तुभ्यमन्नपूर्णे नमोऽस्तु ते ॥ २ ॥ अन्नपूर्णे हव्यवाहपत्नीरूपे हरप्रिये ॥ कलाकाष्ठास्वरूपे च ह्यन्नपूर्णे
नमोऽस्तु ते ॥ ३ ॥ उद्यद्भानुसहस्राभे नयनत्रयभूषिते ॥ चन्द्रचूडे महादेवि ह्यन्नपूर्णे नमोऽस्तु ते ॥ ४ ॥ विचित्रवसने देवि त्वन्नदान
रतेऽनघे ॥ शिवनृत्यकृतामोदे ह्यन्नपूर्णे नमोऽस्तु ते ॥ ५ ॥ षट्कोणपद्ममध्यस्थे षडंगयुवतीमये ॥ ब्राह्म्यादिमातृरूपे च ह्यन्नपूर्णे
नमोऽस्तु ते ॥ ६ ॥ देवि चन्द्रकलापीठे सर्वसाम्राज्यदायिनि ॥ सर्वानंदकरे देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥ ७ ॥ साधकाभीष्टदे देवि

भवदुःखविनाशिनि ॥ कुचभारनते देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥ ८ ॥ इन्द्राद्यर्चितपादाब्जे रुद्रादिरूपधारिणि ॥ सर्वसंपत्प्रदे देवि ह्यन्नपूर्णे नमोऽस्तु ते ॥ ९ ॥ पजाकाले पठेद्यस्तु स्तोत्रमेतत्समाहितः ॥ तस्य गेहे स्थिरा लक्ष्मीर्जायते नात्र संशयः ॥ १० ॥ प्रातःकाले पठेद्यस्तु मंत्रजापपुरःसरम् ॥ तद्गृहेऽन्नसमृद्धिः स्याद्वर्द्धमाना दिने दिने ॥ ११ ॥ यस्मै कस्मै न दातव्यं न प्रकाश्यं कदाचन ॥ प्रकाशात्सिद्धिहानिस्तद्गोपायेद्यत्नतः सुधीः ॥ १२ ॥ इति श्रीभैरवतंत्रेऽन्नपूर्णास्तोत्रं समाप्तम् ॥


